CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ।।२ ।।

पदच्छेद

ब्रह्मा उवाच

अस्ति गुह्य-तमम् विप्र सर्वभूत (सर्वेषाम् भूतानाम्) उपकारकम् ।
देव्याः तु कवचम् पुण्यम् तत् शृणुष्व महामुने ।।२ ।।

अन्वित-पदार्थ

ब्रह्मा = ब्रह्मा जी,
उवाच = बोले,
विप्र = हे ऋषि मार्कण्डेय,
गुह्य-तमम् - परम गोपनीय,
सर्व-भूत (सर्वेषां भूतानाम्) = सभी प्राणियों का,
उपकारकम् = उपकार करनेवाला,
पुण्यम् (च) = और पवित्र,
देव्याः = देवी का,
कवचम् तु = कवच,
अस्ति = है,
महामुने = हे महामुने !,
तत् = उसे,
शृणुष्व = सुनिए ।।२ ।।

मन्त्र

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ।।३ ।।

पदच्छेद

प्रथमम् शैलपुत्री च द्वितीयम् ब्रह्मचारिणी ।
तृतीयम् चन्द्रघण्टा इति कूष्माण्डा इति चतुर्थकम् ।।३ ।।

अन्वित-पदार्थ

प्रथमम् = पहली,
शैलपुत्री = हिमालय की पुत्री पार्वती,
द्वितीयम् = दूसरी,
ब्रह्मचारिणी = ब्रह्मचारिणी,
तृतीयम् = तीसरी,
चन्द्रघण्टा इति = चन्द्रघंटा,
चतुर्थकम् च = और चौथी,
कूष्माण्डा इति = कूष्माण्डा ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ।।४ ।।

पदच्छेद

पञ्चमम् स्कन्द-माता इति षष्ठम् कात्यायनी इति च ।
सप्तमम् कालरात्रिः इति महा-गौरी इति च अष्टमम् ।।४ ।।

अन्वित-पदार्थ

पञ्चमम् = पाँचवीं,
स्कन्दमाता इति = स्कन्दमाता,
षष्ठम् = छठी,
कात्यायनी इति = कात्यायनी,
सप्तमम् = सातवीं,
कालरात्रिः इति = कालरात्रि,
च अष्टमम् = और आठवीं,
महागौरी इति = महागौरी ।।४ ।।

मन्त्र

नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ।।५ ।।

पदच्छेद

नवमम् सिद्धि-दात्री च नव-दुर्गाः प्र-कीर्तिताः ।
उक्तानि एतानि नामानि ब्रह्मणा एव महात्मना ।।५ ।।

अन्वित-पदार्थ

च = और,
नवमम् = नवीं,
सिद्धि-दात्री = सिद्धिदात्री,
इति = ये,
नव-दुर्गाः = नवदुर्गायें,
प्रकीर्तिताः = कही गईं हैं,
एतानि = ये,
नामानि = नाम,
महात्मना = भगवान्,
ब्रह्मणा एव = वेद द्वारा ही,
उक्तानि = कहे गये हैं ।।५ ।।

मन्त्र

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ।।६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

अग्निना दह्यमानः तु शत्रुमध्ये (शत्रूणाम् मध्ये) गतः रणे।
विषमे दुर् गमे च एव भय-आर्ताः (भयात् आर्ताः)शरणम् गताः ।।६ ।।

अन्वित-पदार्थ

अग्निना = आग से,
दह्यमानः त = जलते हुए,
शत्रूणाम् मध्ये = शत्रुओं के बीच,
रणे = युद्ध में,
गतः = घिरे हुए,
विषमे = कठिन,
दुर् गमे च एव = संकट में पड़े,
भयात् आर्ताः = भय से दुखी,
(ये) = जो,
शरणम् = शरण में,
गताः = गये ।।६ ।।

मन्त्र

न तेषां जायते किंचिदशुभं रणसंकटे।
नापदं तस्य पश्यामि शोकदुःखभयं नहि ।।७ ।।

पदच्छेद

न तेषाम् जायते किम् चित् अशुभम् रण-संकटे (रणस्य संकटे)।
न आपदम् तस्य पश्यामि शोक-दुःख-भयम् न हि ।।७ ।।

अन्वित-पदार्थ

तेषाम् = उनका,
किम् चित् = कुछ,
अशुभम् = अमंगल,
रणस्य संकटे = युद्ध के संकट में,
न भवति = नहीं होता,
तस्य = उस शरणागत की,
आपदम् = विपत्ति,
न पश्यामि = देखने को नहीं मिलती,
च शोकम् = शोक,
दुःखम् - दुःख,
भयम् = भय,
न हि पश्यामि = देखने को नहीं मिलते ।।७ ।।

मन्त्र

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ।।८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

यैः तु भक्त्या स्मृताः नूनम् तेषाम् वृद्धिः प्र जायते ।
ये त्वाम् स्मरन्ति देवेशि रक्षसे तान्न संशयः ।।८ ।।

अन्वित-पदार्थ

यैः तु = जिनसे भी,
(त्वं) भक्त्या = तुम भक्ति पूर्वक,
स्मृताः = स्मरण की गई,
नूनम् = निश्चय ही,
तेषाम् = उनकी,
वृद्धिः = वृद्धि,
प्रजायते = होती है,
देवानाम् ईशि = हे देवेश्वरी !
त्वाम् = तुम्हें,
ये = जो,
स्मरन्ति = स्मरण करते हैं,
न संशयः = निःसन्देह,
तान् = उनकी,
रक्षसे = रक्षा करती हो ।।८ ।।

मन्त्र

प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ।।९ ।।

पदच्छेद

प्रेत सम् स्था तु चामुण्डा वाराही महिष आसना ।
ऐन्द्री गज सम् आरूढा वैष्णवी गरुड आसना ।।९ ।।

अन्वित-पदार्थ

चामुण्डा = चामुण्डा देवी,
प्रेत सम् स्था = प्रेत पर बैठी हुई,
वाराही = वाराही,
महिष आसना = भैंसे पर सवार हुई,
ऐन्द्री = इन्द्राणी,
गजम् आरूढा = हाथी पर बैठी हुई,
वैष्णवी = वैष्णवी,
गरुड आसना = गरुड पर बैठी हुई ।।९ ।।

मन्त्र

माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ।।१० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

माहेश्वरी वृष-आरूढा कौमारी शिखि-वाहना ।
लक्ष्मी: पद्म-आसना देवी पद्म-हस्ता हरि-प्रिया ।।१० ।।

अन्वित-पदार्थ

माहेश्वरी = पार्वती,
वृष-आरूढा = बैल पर बैठी हुई,
कौमारी = स्कन्द की पत्नी देवसेना,
शिखि वाहना = मोर पर बैठी हुई,
पद्महस्ता = हाथ में कमल धारण करनेवाली,
हरे: प्रिया = हरि की पत्नी,
लक्ष्मी: = लक्ष्मी,
देवी = देवी,
पद्म-आसना = कमल पर बैठी हुई ।।१० ।।

मन्त्र

श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ।।११ ।।

पदच्छेद

श्वेत-रूप-धरा देवी ईश्वरी वृष-वाहना ।
ब्राह्मी हंस-सम् आरूढा सर्व आभरण भूषिता ।।११ ।।

अन्वित-पदार्थ

श्वेतरूपधरा = श्वेतरूप धारण करनेवाली,
ईश्वरी = ईश्वरी,
देवी = देवी,
वृषवाहना = बैल पर बैठी हुई,
सर्व आभरण भूषिता = सभी आभूषणों से सुशोभित,
ब्राह्मी = ब्राह्मी देवी,
हंससमारूढा = हंस पर बैठी हुई ।।११ ।।

मन्त्र

इत्येता मातर: सर्वा: सर्वयोगसमन्विता: ।
नानाभरणशोभाढ्या नानारत्नोपशोभिता: ।।१२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

इति एताः मातरः सर्वाः सर्व-योग-सम्अन्विताः ।
नाना आभरण-शोभा आढ्या नाना-रत्न उप शोभिताः ।।१२ ।।

अन्वित-पदार्थ

नाना = अनेक प्रकार के,
आभरण = गहनों की,
शोभा आढ्या = शोभा से सम्पन्न,
नाना = अनेक प्रकार के,
रत्न उप शोभिता = रत्नों से शोभित,
इति एताः = ये इतनी,
सर्वाः = सभी,
मातरः = मातायें,
सर्वयोग = सब प्रकार की योग शक्ति से,
सम् अन्विताः (सन्ति) = युक्त हैं ।।१२ ।।

मन्त्र

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ।।१३ ।।

पदच्छेद

दृश्यन्ते रथम् आरूढाः देव्यः क्रोध-सम् आकुलाः ।
शङ्खम् चक्रम् गदाम् शक्तिम् हलम् च मुसल आयुधम् ।।१३ ।।

अन्वित-पदार्थ

रथम् = रथ पर,
आरूढाः = बैठी हुईं,
देव्यः = देवियाँ,
क्रोध-सम् आकुलाः = क्रोध से युक्त,
दृश्यन्ते = दिखाई देती हैं,
शङ्खम् = शंख,
चक्रम् = चक्र,
गदाम् = गदा,
शक्तिम् = शक्ति,
हलम् = हल,
च मुसलम् = और मुसल,
आयुधम् (धारयन्ति) = आयुध धारण करती हैं ।।१३ ।।

मन्त्र

खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ।।१४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

खेटकम् तोमरम् च एव परशुम् पाशम् एव च।
कुन्त आयुधम् त्रिशूलम् च शार्ङ्गम् आयुधम् उत्तमम्।।१४।।

अन्वित-पदार्थ

(एताः) खेटकम् = ये खेटक,
तोमरम् = तोमर,
परशुम् च = परशु,
पाशम् एव च = रस्सी,
कुन्तम् = भाला,
त्रिशूलम् च = और त्रिशूल,
आयुधम् = आयुध,
च उत्तमम् = और उत्तम,
शार्ङ्गम् = शार्ङ्ग धनुष,
आयुधम् (धारयन्ति) = अस्त्र धारण करती हैं।।१४।।

मन्त्र

दैत्यानां देहनाशाय भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै।।१५।।

पदच्छेद

दैत्यानाम् देह-नाशाय भक्तानाम् अभयाय च।
धारयन्ति आयुधानि इत्थम् देवानाम् च हिताय वै।।१५।।

अन्वित-पदार्थ

दैत्यानाम् = दैत्यों के,
देहनाशाय = शरीर का विनाश करने के लिए,
भक्तानाम् च = भक्तों को,
अभयाय = अभय प्रदान करने के लिए
देवानाम् च = और देवताओं की,
हिताय व = रक्षा करने के
(देव्यः) = देवियाँ,
इत्थम् = इस प्रकार के,
आयुधानि = आयुधों को,
धारयन्ति = धारण करती हैं।।१५।।

मन्त्र

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे।
महाबले महोत्साहे महाभयविनाशिनि।।१६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

नमः ते अस्तु महा-रौद्रे महा-घोर-पराक्रमे।
महा-बले महा उत्साहे महा-भय-विनाशिनि ।।१६ ।।

अन्वित-पदार्थ

महारौद्रे = हे प्रचण्ड कोपवाली,
महा-घोर-पराक्रमे = हे अत्यन्त घोर पराक्रमवाली,
महाबले = हे अपार शक्तिवाली,
महा उत्साहे = हे महान उत्साहवाली,
महाभय = हे महान भय का,
विनाशिनि = विनाश करनेवाली,
(देवि) = देवि !,
ते नमः अस्त = तुझे नमस्कार है ।।१६ ।।

मन्त्र

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि।
प्राच्यां रक्षतु मामैन्द्री आग्नेयामग्निदेवता ।।१७ ।।

पदच्छेद

त्राहि माम् देवि दुस् प्र ईक्षे शत्रूणाम् भय-वर्द्धिनि।
प्राच्याम् रक्षतु माम् ऐन्द्री आग्नेयाम् अग्नि-देवता ।।१७ ।।

अन्वित-पदार्थ

शत्रूणाम् = हे शत्रुओं का,
भय-वर्धिनि = भय बढ़ानेवाली,
दुष्प्रेक्षे देवि = हे ऐसी देवी जिसकी ओर देखना कठिन है,
माम् = मेरी,
त्राहि = रक्षा करें,
ऐन्द्री = इन्द्र शक्ति,
माम् = मेरी,
प्राच्याम् = पूर्व में,
अग्नि-देवता = अग्नि शक्ति,
आग्नेयाम् = अग्नि कोण में,
रक्षतु = रक्षा करे ।।१७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ।।१८ ।।

पदच्छेद

दक्षिणे अवतु वाराही नैर्ऋत्याम् खड्ग-धारिणी।
प्रतीच्याम् वारुणी रक्षेत् वायव्याम् मृग-वाहिनी ।।१८ ।।

अन्वित-पदार्थ

दक्षिणे = दक्षिण दिशा में,
वाराही = वाराही देवी,
नैर्ऋत्याम् = नैर्ऋत्य में,
खड्ग-धारिणी = तलवार धारण करनेवाली देवी,
(माम्) अवतु = मेरी रक्षा करे,
प्रतीच्याम् = पश्चिम दिशा में,
वारुणी = वारुणी,
वायव्याम् = वायु कोण में,
मृग-वाहिनी = हरिण पर सवार देवी,
माम् रक्षेत् = मेरी रक्षा करे ।।१८ ।।

मन्त्र

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी।
उर्ध्वं ब्रह्माणि मे रक्षेदधस्तात् वैष्णवी तथा ।।१९ ।।

पदच्छेद

उदीच्याम् पातु कौमारी ऐशान्याम् शूलधारिणी।
उर्ध्वम् ब्रह्माणि मे रक्षेद् अधस्तात् वैष्णवी तथा ।।१९ ।।

अन्वित-पदार्थ

कौमारी = कौमारी,
उदीच्याम् = उत्तर दिशा में,
शूल-धारिणी (च) = और शूल धारिणी,
ऐशान्याम् = ईशान कोण में,
पातु = रक्षा करे,
ब्रह्माणि = ब्रह्माणी,
मे = मेरी,
उर्ध्वम् = ऊपर,
तथा = और,
अधस्तात् = नीचे,
वैष्णवी = वैष्णवी देवी,
रक्षेत् = रक्षा करे ।।१९ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ।।२० ।।

पदच्छेद

एवम् दश दिशः रक्षेत् चामुण्डा शव-वाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ।।२० ।।

अन्वित-पदार्थ

एवम् = इसी तरह,
शव-वाहना = शव पर सवार,
चामुण्डा = चामुण्डा देवी,
दश दिशः = दसो दिशाओं की,
रक्षेत् = रक्षा करे,
जया = जया देवी,
म = मेरी,
अग्रतः = आगे की ओर,
विजया च = और विजया,
पृष्ठतः = पीछे की ओर,
पातु = रक्षा करे ।।२० ।।

मन्त्र

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ।।२१ ।।

पदच्छेद

अजिता वाम-पार्श्वे तु दक्षिणे च अपराजिता ।
शिखाम् उद्योतिनी रक्षेत् उमा मूर्ध्नि वि-वस्थिता ।।२१ ।।

अन्वित-पदार्थ

वाम-पार्श्वे तु = बायें भाग में,
अजिता = अजिता,
च दक्षिणे = और दाहिने भाग में,
उद्योतिनी = उद्योतिनी,
शिखाम् = चोटी की,
मूर्ध्नि च = और सिर पर,
व्यवस्थिता - विराजमान होकर,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपराजिता = अपराजिता, **उमा** = उमा,
(रक्षेत्) = रक्षा करे, **रक्षेत्** = रक्षा करे ।।२१ ।।

मन्त्र

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके।। २२ ।।

पदच्छेद

मालाधरी ललाटे च भ्रुवौ रक्षेत् यशस्विनी ।
त्रिनेत्रा च भ्रुवो: मध्ये यम-घण्टा च नासिके ।।२२ ।।

अन्वित-पदार्थ

ललाटे = ललाट में, **भ्रुवो: मध्ये** = भौंहों के बीच,
मालाधरी = मालाधरी, **त्रिनेत्रा** = त्रिनेत्रा,
भ्रुवौ च = और भौंहों में, **नासिके च** = और नथुनों में,
यशस्विनी = यशस्विनी, **यमघण्टा** = यमघण्टा,
रक्षेत् = रक्षा करे, **(रक्षेत्)** = रक्षा करे ।।२२ ।।

मन्त्र

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ।।२३ ।।

पदच्छेद

शङ्खिनी चक्षुषो: मध्ये श्रोत्रयो: द्वार-वासिनी ।
कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी ।।२३ ।।

अन्वित-पदार्थ

चक्षुषो: = आखों के, **कालिका** = कालिका,
मध्ये = बीच में, **कर्णमूले तु** = और कानों के मूल में,
शङ्खिनी = शंखिनी, **शाङ्करी** = शांकरी देवी,
द्वार-वासिनी = द्वारवासिनी, **रक्षेत्** = रक्षा करे ।।२३ ।।
श्रोत्रयो: = कानों की,
कपोलौ = गालों की,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका।
अधरे चामृतकला जिह्वायां च सरस्वती ।।२४ ।।

पदच्छेद

नासिकायाम् सुगन्धा च उत्तर-ओष्ठे (उत्तरे ओष्ठे) च चर्चिका।
अधरे च अमृतकला जिह्वायाम् च सरस्वती ।।२४ ।।

अन्वित-पदार्थ

नासिकायाम् = नासिका में,
सुगन्धा = सुगन्धा,
उत्तरे च = और ऊपर के,
ओष्ठे = ओठ में,
चर्चिका = चर्चिका,
(रक्षेत्) = रक्षा करे,
अधर = नीचे के ओठ में,
अमृतकला = अमृतकला,
जिह्वायाम् च = और जीभ में,
सरस्वती = सरस्वती,
(रक्षेत्) = रक्षा करे ।।२४ ।।

मन्त्र

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके।। २५ ।।

पदच्छेद

दन्तान् रक्षतु कौमारी कण्ठ-देशे (कण्ठे देशे) तु चण्डिका।
घण्टिकाम् चित्रघण्टा च महामाया च तालुके।। २५ ।।

अन्वित-पदार्थ

कौमारी = कौमारी,
दन्तान् = दाँतों की,
चण्डिका च = और चण्डिका,
कण्ठे देशे = कंठ प्रदेश में,
रक्षेत् = रक्षा करे,
चित्र घण्टा = चित्रघण्टा,
घण्टिकायाम् = गले की घंटी में,
महामाया च = और महामाया,
तालुके = मुंह के तालु में,
(रक्षेत्) = रक्षा करे ।।२५ ।।

मन्त्र

कामाक्षी चिबुकं रक्षेत् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ।।२६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

कामाक्षी चिबुकम् रक्षेत् वाचम् मे सर्व-मङ्गला।
ग्रीवायाम् भद्र-काली च पृष्ठ-वंशे धनुः धरी ।।२६ ।।

अन्वित-पदार्थ

कामाक्षी = कामाक्षी,
चिबुकम् = ठोढ़ी की,
रक्षेत् = रक्षा करे,
सर्व-मङ्गला = सर्वमंगला,
मे = मेरे,
वाचम् = वचन की,
रक्षेत् = रक्षा करे,
भद्रकाली = भद्रकाली,
ग्रीवायाम् = गले में,
धनुर्धरी च = और धनुर्धरी,
पृष्ठ-वंशे = मेरु दण्ड में,
(रक्षेत्) = रक्षा करे ।।२६ ।।

मन्त्र

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ।।२७ ।।

पदच्छेद

नील-ग्रीवा बहिःकण्ठे नलिकाम् नल-कूबरी।
स्कन्धयोः खड्गिनी रक्षेत् बाहू मे वज्र-धारिणी ।।२७ ।।

अन्वित-पदार्थ

बहिःकण्ठे = गले के बाहरी भाग में,
नील-ग्रीवा = नीलग्रीवा,
नलिकाम् = गले की नली की,
नलकूबरी = नलकूबरी,
स्कन्धयोः = दोनों कंधों की,
खड्गिनी = खड्गिनी,
च मे = और मेरे,
बाहू = दोनों बाहों की,
वज्रधारिणी = वज्रधारिणी,
रक्षेत् = रक्षा करे ।।२७ ।।

मन्त्र

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ।।२८ ।।

पदच्छेद

हस्तयोः दण्डिनी रक्षेत् अम्बिका च अङ्गुलीषु च।
नखान् शूल ईश्वरी रक्षेत् कुक्षौ रक्षेत् कुल ईश्वरी ।।२८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

दण्डिनी = दण्डिनी,
हस्तयोः = हाथों की,
अम्बिका च = और अम्बिका,
अङ्गुलीषु = अंगुलियों में,
रक्षेत् = रक्षा करे,
शूलेश्वरी = शूलेश्वरी,
नखान् = नाखूनों की,
रक्षेत् = रक्षा करे,
कुलेश्वरी = कुलेश्वरी,
कुक्षौ = कोख में,
रक्षेत् = रक्षा करे ।।२८।।

मन्त्र

स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी ।।२९।।

पदच्छेद

स्तनौ रक्षेत् महादेवी मनः शोक-विनाशिनी ।
हृदये ललिता देवी उदरे शूल-धारिणी ।।२९।।

अन्वित-पदार्थ

महादेवी = महादेवी,
स्तनौ = दोनों स्तनों में,
रक्षेत् = रक्षा करे,
शोकविनाशिनी = शोकविनाशिनी,
मनः = मन की,
(रक्षेत्) = रक्षा करे,
ललिता देवी = ललिता देवी,
हृदय = हृदय में,
शूलधारिणी च = और शूलधारिणी,
उदरे = पेट में,
(रक्षेत्) = रक्षा करे ।।२९।।

मन्त्र

नाभौ च कामिनी रक्षेत् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ।।३०।।

पदच्छेद

नाभौ च कामिनी रक्षेत् गुह्यम् गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रम् गुदे महिष-वाहिनी ।।३०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

कामिनी = कामिनी,
नाभौ (च) = नाभि में,
रक्षेत् = रक्षा करे,
तथा = और,
गुह्येश्वरी = गुह्येश्वरी,
गुह्यम् = गुप्तांग की,
(रक्षेत्) = रक्षा करे,
पूतना = पूतना,
कामिका (च) = और कामिका,
मेढ्रम् = पुरुष जननेन्द्रिय की,
गुदे (च) = और गुदा में,
महिषवाहिनी = महिषवाहिनी,
(रक्षेत्) = रक्षा करे ।।३० ।।

मन्त्र

कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ।।३१ ।।

पदच्छेद

कट्याम् भगवती रक्षेत् जानुनी विन्ध्य-वासिनी ।
जङ्घे महा-बला रक्षेत् सर्व-काम-प्र-दायिनी ।।३१ ।।

अन्वित-पदार्थ

भगवती = भगवती,
कट्याम् = कमर में,
जानुनी (च) = और दोनों घुटनों की,
विन्ध्य-वासिनी = विन्ध्यवासिनी,
रक्षेत् = रक्षा करे,
सर्वकामप्रदायिनी = सारी कामनाओं को पूरा करनेवाली,
महा-बला = महाबला,
जङ्घे = जाघों की,
रक्षेत् = रक्षा करे ।।३१ ।।

मन्त्र

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ।।३२ ।।

पदच्छेद

गुल्फयोः नारसिंही च पाद-पृष्ठे तु तैजसी ।
पाद अङ्गुलीषु श्रीः रक्षेत् पाद अधः तल-वासिनी ।।३२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

नारसिंही = नारसिंही,
गुल्फयोः = टखनों की,
तैजसी = तैजसी,
पादपृष्ठे तु = पैरों के पिछले भाग में,
श्रीः = श्री,
पादाङ्गुलीषु = पैर की अंगुलियों में,
तल-वासिनी च = और तलवासिनी,
पादाधः = पैरों के निचले भाग की,
रक्षेत् = रक्षा करे ।।३२ ।।

मन्त्र

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ।।३३ ।।

पदच्छेद

नखान् दंष्ट्रा-कराली च केशान् च एव उर्ध्व-केशिनी ।
रोम-कूपेषु कौबेरी त्वचम् वाक् ईश्वरी तथा ।।३३ ।।

अन्वित-पदार्थ

दंष्ट्राकराली = विकराल दातोंवाली,
नखान् = नाखूनों की,
उर्ध्वकेशिनी च = और उर्ध्वकेशिनी,
केशान् = बालों की,
रक्षेत् = रक्षा करे,
कौबेरी = कौबेरी,
रोमकूपेशु = रोम-छिद्रों में,
तथा = और,
वागीश्वरी = वागीश्वरी,
त्वचम् = चमड़े की,
(रक्षेत्) = रक्षा करे ।।३३ ।।

मन्त्र

रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ।।३४ ।।

पदच्छेद

रक्त-मज्जा-वसा-मांसानि-अस्थि-मेदांसि पार्वती ।
अन्त्राणि कालरात्रिः च पित्तम् च मुकुट-ईश्वरी ।।३४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

पार्वती = पार्वती,
रक्त = रक्त,
मज्जा = मज्जा,
वसा = चर्बी,
मांसानि = मांस,
अस्थि = हड्डी,
मेदांसि = मेद की,
(रक्षेत्) = रक्षा करे,
कालरात्रिः = कालरात्रि,
अन्त्राणि = आँतों की,
मुकुटेश्वरी च = और मुकुटेश्वरी,
पित्तं = पित्त की,
(रक्षेत्) = रक्षा करे ।।३४ ।।

मन्त्र

पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ।।३५ ।।

पदच्छेद

पद्मावती पद्म-कोशे कफे चूडामणिः तथा ।
ज्वाला-मुखी नख-ज्वालाम् अभेद्या सर्व-सन्धिषु ।।३५ ।।

अन्वित-पदार्थ

पद्मावती = पद्मावती,
पद्मकोषे = मूलाधार, सहस्रार आदि कमल चक्रों में,
तथा = और,
चूडामणि = चूड़ामणि,
कफे = कफ में,
(रक्षेत्) = रक्षा करे,
ज्वालामुखी = ज्वालामुखी,
नख-ज्वालाम् = नाखूनों के तेज की,
अभेद्या च = और अभेद्या देवी,
सर्वसन्धिषु = सभी जोड़ों में,
(रक्षेत्) = रक्षा करे ।।३५ ।।

मन्त्र

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनोबुद्धिं रक्षेन्मे धर्मधारिणी ।।३६ ।।

पदच्छेद

शुक्रम् ब्रह्माणि मे रक्षेत् छायाम् छत्र ईश्वरी तथा ।
अहंकारम् मनः बुद्धिम् रक्षेत् मे धर्म-धारिणी ।।३६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ब्रह्माणि = ब्रह्माणी,
म = मेरे,
शुक्रम् = वीर्य की,
रक्षेत् = रक्षा करे,
तथा = और,
छत्रेश्वरी = छत्रेश्वरी,
छायाम् = छाया की,
रक्षेत् = रक्षा करे,
धर्मधारिणी =धर्मधारिणी,
मे = मेरे,
मनः = मन,
बुद्धिम् = बुद्धि,
अहंकारम् = अहंकार की,
रक्षेत् = रक्षा करे।।३६।।

मन्त्र

प्राणापानौ तथा व्यानमुदानं च समानकम्।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना।।३७।।

पदच्छेद

प्राण अपानौ तथा व्यानम् उदानम् च समांनकम्।
वज्र-हस्ता च मे रक्षेत् प्राणम् कल्याण-शोभना।।३७।।

अन्वित-पदार्थ

वज्रहस्ता = हाथों में वज्र धारण करनेवाली,
मे = मेरे,
प्राण-अपानौ = प्राण, अपान,
व्यानम् = व्यान,
उदानम् = उदान,
तथा = और,
समानकम् = समान वायुओं की,
रक्षेत् = रक्षा करे,
कल्याणशोभना = कल्याणशोभना,
मे = मेरे,
प्राणम् = प्राण की,
रक्षेत् = रक्षा करे।।३७।।

मन्त्र

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा।।३८।।

पदच्छेद

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्त्वम् रजः तमः च एव रक्षेत् नारायणी सदा।।३८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

रसे = रस,
रूपे = रूप,
गन्धे = गन्ध,
शब्दे = शब्द,
स्पर्शे च = और स्पर्श इन पाँचों तन्मात्राओं में,
योगिनी = योगिनी,
रक्षेत् = रक्षा करे,
सत्त्वम् = सत्त्व,
रजः = रज़,
तमः च एव = और तम इन तीन गुणों की,
सदा = हमेशा,
नारायणी = नारायणी,
रक्षेत् = रक्षा करे ।।३८ ।।

मन्त्र

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ।।३९ ।।

पदच्छेद

आयू रक्षतु वाराही धर्मम् रक्षतु वैष्णवी ।
यशः कीर्तिम् च लक्ष्मीम् च धनम् विद्याम् च चक्रिणी ।।३९ ।।

अन्वित-पदार्थ

वाराही = वाराही,
आयू = आयु की,
रक्षतु = रक्षा करे,
वैष्णवी च = और वैष्णवी,
धर्मम् = धर्म की,
रक्षतु = रक्षा करे,
यशः = यश,
कीर्तिम् = कीर्ति,
लक्ष्मीम् = लक्ष्मी,
धनम् = धन,
विद्याम् च = और विद्या की,
चक्रिणी = चक्रिणी,
रक्षतु = रक्षा करे ।।३९ ।।

मन्त्र

गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ।।४० ।।

पदच्छेद

गोत्रम् इन्द्राणि मे रक्षेत् पशून् मे रक्ष चण्डिके।
पुत्रान् रक्षेत् महालक्ष्मीः भार्याम् रक्षतु भैरवी ।।४० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

इन्द्राणि = हे इन्द्राणि !,
मे = मेरे,
गोत्रम् = गोत्र की,
रक्षेत् = रक्षा करो,
चण्डिके = हे चण्डिके !,
(त्वं) मे = तुम मेरे,
पशून् = पशुओं की,
रक्ष = रक्षा करो,
महालक्ष्मीः = महालक्ष्मी,
पुत्रान् = पुत्रों की,
रक्षेत् = रक्षा करे,
भैरवी = भैरवी,
भार्याम् = पत्नी की,
रक्षेत् = रक्षा करे ।।४० ।।

मन्त्र

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ।।४१ ।।

पदच्छेद

पन्थानम् सुपथा रक्षेत् मार्गम् क्षेम-करी तथा ।
राज-द्वारे महा-लक्ष्मीः विजया सर्वतः स्थिता ।।४१ ।।

अन्वित-पदार्थ

सुपथा = सुपथा,
पन्थानम् = पथ की,
रक्षेत् = रक्षा करे,
तथा = और,
क्षेमकरी = क्षेमकरी,
मार्गम् = मार्ग की,
(रक्षेत्) = रक्षा करे,
महालक्ष्मीः = महालक्ष्मी,
राजद्वारे = राज दरबार में,
रक्षेत् = रक्षा करे,
विजया = विजया,
सर्वतः स्थिता = सब जगह रहकर,
रक्षेत् = रक्षा करे ।।४१ ।।

मन्त्र

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ।।४२ ।।

पदच्छेद

रक्षा-हीनम् तु यत् स्थानम् वर्जितम् कवचेन तु ।
तत् सर्वम् रक्ष मे देवि जयन्ती पाप-नाशिनी ।।४२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

कवचेन = कवच से,
वर्जितम् = रहित,
रक्षा-हीनम् = रक्षा रहित,
यत् = जो,
स्थानम् = स्थान,
(अस्ति) = है,
पाप-नाशिनी = पापों का नाश करनेवाली,
जयन्ती = जय प्रदान करनेवाली,
देवी = हे देवि !
मे = मेरे,
तत्सर्वम् = उन सभी स्थानों की,
रक्ष = रक्षा करो ।।४२ ।।

मन्त्र

पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ।
कवचेनावृतं नित्यं यत्र यत्रैव गच्छति ।।४३ ।।

पदच्छेद

पदम् एकम् न गच्छेत् तु यदि इच्छेत् शुभम् आत्मनः ।
कवचेन आवृतम् नित्यम् यत्र यत्र एव गच्छति ।।४३ ।।

अन्वित-पदार्थ

(नरः) यदि = मनुष्य यदि,
आत्मनः = अपना,
शुभम् = कल्याण,
इच्छेत् त = चाहे तो,
(कवचेन विना) = कवच के बिना,
एकम् = एक,
पदम् = पद भी,
न गच्छेत् = न जाये,
कवचेन = कवच से,
आवृतम् = सुरक्षित,
यत्र-यत्र एव = जहाँ-जहाँ भी,
गच्छति = जाता है ।।४३ ।।

मन्त्र

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।।४४ ।।

पदच्छेद

तत्र तत्र अर्थ-लाभः च विजयः सार्वकामिकः ।
यम् यम् चिन्तयते कामम् तम् तम् प्राप्नोति निश्चितम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तत्र-तत्र = वहाँ-वहाँ,
अर्थस्य लाभः = धन का लाभ,
सार्वकामिकः च = और सभी कामनाओं को पूरा करनेवाली,
विजयः = विजय,
(भवति) = होती है,
यम्-यम् = जिस-जिस,
कामम् = इच्छा के बारे में,
चिन्तयते = सोचता है,
तम्-तम् = उस-उस को,
निश्चितम् = निश्चय,
प्राप्नोति = पाता है ।।४४ ।।

मन्त्र

परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ।
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ।।४५ ।।

पदच्छेद

परम् ऐश्वर्यम् अतुलम् प्राप्स्यते भूतले पुमान् ।
निर्भयः जायते मर्त्यः संग्रामेषु अपराजितः ।।४५ ।।

अन्वित-पदार्थ

पुमान् = मनुष्य,
भूतले = इस धरती पर,
अतुलम् = अतुलनीय,
परमम् = महान,
ऐश्वर्यम् = ऐश्वर्य को,
प्राप्स्यते = पाता है,
मर्त्यः = मनुष्य,
संग्रामेषु = युद्ध में,
अपराजितः = अपराजित होकर,
निर्भयः = निर्भय,
जायते = हो जाता है ।।४५ ।।

मन्त्र

त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ।
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ।।४६ ।।

पदच्छेद

त्रैलोक्ये तु भवेत् पूज्यः कवचेन आवृतः पुमान् ।
इदम् तु देव्याः कवचम् देवानाम् अपि दुर्लभम् ।।४६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

कवचेन = कवच से,
आवृतः = सुरक्षित,
पुमान् = पुरुष,
त्रैलोक्येतु = तीनों लोकों में,
पूज्यः = पूज्य,
भवेत् = होता है,
देव्याः तु = देवी का,
इदम् = यह,
कवचम् = कवच,
देवानाम् अपि = देवताओं को भी,
दुर्लभम् = दुर्लभ,
(अस्ति) = है ।।४६ ।।

मन्त्र

यः पठेत्प्रयतो नित्यं त्रिसंन्ध्यं श्रद्धयान्वितः ।
दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ।।४७ ।।

पदच्छेद

यः पठेत् प्र यतः नित्यम् त्रि संन्ध्यम् श्रद्धया अन्वितः ।
दैवी कला भवेत् तस्य त्रैलोक्येषु अपराजितः ।।४७ ।।

अन्वित-पदार्थ

यः = जो,
नित्यम् = प्रतिदिन,
त्रिसंन्ध्यम् = प्रातः, दोपहर और मध्याह्न इन तीनों संध्याओं में,
श्रद्धया अन्वितः = श्रद्धा से युक्त होकर,
प्रयतः = संयमित होकर,
पठेत् = पढ़े,
तस्य = उसे,
दैवीकला = देवी की कला,
भवेत् = प्राप्त होती है,
त्रैलोक्येषु = तीनों लोकों में,
(सः) अपराजितः = वह अपराजित,
(भवति) = होता है ।।४७ ।।

मन्त्र

जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ।
नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ।।४८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

जीवेत् वर्ष-शतम् स अग्रम् अपमृत्यु-विवर्जितः ।
नश्यन्ति व्याधयः सर्वे लूता-विस्फोटक आदयः ।।४८ ।।

अन्वित-पदार्थ

(सः) अपमृत्यु (ना) = अकाल मृत्यु से
विवर्जितः = रहित होकर,
वर्ष-शतम् = सौ वर्ष,
स अग्रम = से आगे तक,
जीवेत् = जीता है,
(तस्य) = उसके,
लूता = मकड़ी,
विस्फोटक = फोड़े-फुंसी,
आदयः = आदि,
सर्वे = सभी,
व्याधयः = रोग,
नश्यन्ति = नष्ट हो जाते हैं ।।४९ ।।

मन्त्र

स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ।
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।।४९ ।।

पदच्छेद

स्थावरम् जङ्गमम् च एव कृत्रिमम् च अपि यद् विषम् ।
अभिचाराणि सर्वाणि मन्त्र-यन्त्राणि भूतले ।।४९ ।।

अन्वित-पदार्थ

भूतले (यत्) = संसार में जो भी,
स्थावरम् = स्थावर,
जङ्गमम् = जंगम,
कृत्रिमम् च = और कृत्रिम,
विषम् (सन्ति) = विष हैं,
सर्वाणि - सभी,
अभिचाराणि = मारण-मोहन आदि अभिचार,
मंत्राणि = मंत्र,
यंत्राणि च = और यंत्र,
(सन्ति) = हैं ।।४९ ।।

मन्त्र

भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ।
सहजा कुलजा माला डाकिनी शाकिनी तथा ।।५० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

भूचराः खेचराः च एव जलजाः च उपदेशिकाः ।
सहजा कुलजा माला डाकिनी शाकिनी तथा ।।५० ।।

अन्वित-पदार्थ

भूचराः = धरती पर विचरण करनेवाले,
खेचराः = आकाशचारी,
जलजाः = जल में उत्पन्न,
उपदेशिकाः च = और उपदेश मात्र से शीघ्र प्रसन्न होनेवाले देवता,
सहजा = जन्म के साथ उत्पन्न,
कुलजा = खानदान के देवता,
माला = कंठमाला,
डाकिनी = डाकिनी,
तथा = और,
शाकिनी = शाकिनी नामक प्रेतिनियाँ ।।५० ।।

मन्त्र

अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ।
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।।५१ ।।

पदच्छेद

अन्तरिक्ष-चराः घोराः डाकिन्यः च महाबलाः ।
ग्रह-भूत-पिशाचाः च यक्ष गन्धर्व राक्षसाः ।।५१ ।।

अन्वित-पदार्थ

अन्तरिक्षचराः = आकाश में विचरण करनेवाली,
घोराः = भयंकर,
महाबलाः = अतिबलवती,
डाकिन्यः = डाकिनियाँ,
ग्रहाः = ग्रह,
भूताः = भूतगण,
पिशाचाः च = और पिशाच,
यक्षः = यक्ष,
गन्धर्वाः = गन्धर्व,
राक्षसाः च = और राक्षसगण ।।५१ ।।

मन्त्र

ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ।
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।।५२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ब्रह्म-राक्षस-वेताला: कूष्माण्डा: भैरव आदय: ।
नश्यन्ति दर्शनात् तस्य कवचे हृदि संस्थिते ।।५२ ।।

अन्वित-पदार्थ

(यस्य) हृदि = जिसके हृदय में,
कवचे = कवच,
संस्थिते = विद्यमान है,
तस्य = उसके,
दर्शनात् = साक्षात्कार होने पर,
ब्रह्मराक्षसा: = ब्रह्मराक्षस,
वेताला: = वेताल,
कूष्माण्डा: = कूष्माण्ड,
भैरवा: = भैरव,
आदय: = आदि ऊपर कहे गये सभी,
नश्यन्ति = नष्ट हो जाते हैं ।।५२ ।।

मन्त्र

मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ।
यशसा वर्द्धते सोऽपि कीर्तिमण्डितभूतले ।।५३ ।।

पदच्छेद

मान-उन्नति: भवेत् राज्ञ: तेज: वृद्धिकरम् परम् ।
यशसा वर्द्धते स: अपि कीर्ति-मण्डित:-भूतले ।।५३ ।।

अन्वित-पदार्थ

तस्य राज्ञ: = उसे राजा द्वारा,
मानोन्नति: = सम्मान और उन्नति,
भवेत् = प्राप्त होती है,
(इदं कवचं) परम = यह कवच अत्यन्त,
तेज: वृद्धिकरम् (अस्ति) = तेज बढ़ानेवाला है,
स: = वह कवचधारी,
भूतल = संसार में,
यशसा = यश से,
वर्धते = बढ़ता है,
कीर्तिमण्डित: = कीर्ति से सुशोभित,
अपि = भी,
भवति = होता है ।।५३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा।
यावद्भूमण्डलं धत्ते सशैलवनकाननम्।।५४।।

पदच्छेद

जपेत् सप्त-शतीम् चण्डीम् कृत्वा तु कवचम् पुरा।
यावत् भूमण्डलम् धत्ते स-शैल-वन-काननम्।।५४।।

अन्वित-पदार्थ

(यः) पुरा त = जो पहले,
कवचम् = कवच का पाठ,
कृत्वा = करके,
सप्तशतीम् = सात सौ श्लोकों वाले,
चण्डीम् = चण्डी पाठ का,
जपेत् = पारायण करता है,
(तस्य) = उसकी,
यावत् = जब तक,
भूमण्डलम् = धरती,
स शैल = पर्वतों सहित,
वन-काननम् = वन और कानन को,
धत्ते = धारण करती है।।५४।।

मन्त्र

तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्।।५५।।

पदच्छेद

तावत् तिष्ठति मेदिन्याम् सन्ततिः पुत्र-पौत्रिकी।
देह-अन्ते परमम् स्थानम् यत् सुरैः अपि दुर्लभम्।।५५।।

अन्वित-पदार्थ

तावत् = तब तक,
मेदिन्याम् = धरती पर,
पुत्र पौत्रिकी = पुत्र-पौत्रों की,
सन्ततिः = सन्तान परम्परा,
तिष्ठति = बनी रहती है,
(सः) देहान्ते = वह देह त्याग के बाद,
सुरैः अपि = देवताओं से भी,
दुर्लभम् = दुर्लभ,
यत् = जो,
परमम् स्थानम् = परम पद है।।५६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

प्राप्नोति पुरुषः नित्यं महामाया प्रसादतः ।
लभते परमं रूपं शिवेन सह मोदते ।।५६ ।।

पदच्छेद

प्राप्नोति पुरुषः नित्यम् महा-माया-प्रसादतः ।
लभते परमम् रूपम् शिवेन सह मोदते ।।५६ ।।

अन्वित-पदार्थ

(सः) पुरुषः = वह पुरुष,
महामायायाः = महामाया की,
प्रसादतः = कृपा से (उस परमपद को),
नित्यम् = सदा के लिए,
प्राप्नोति = प्राप्त करता है,
(तत्र) परम् = वहाँ उत्तम,
रूपम् = रूप,
लभते = प्राप्त करता है,
शिवेन सह च = और शिव के साथ,
मोदते = आनन्दित होता है ।।५६ ।।

।। इति देव्याः कवचम् सम्पूर्णम् ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथ अर्गलास्तोत्रम् ।।

ॐ नमश्चण्डिकायै

चण्डिका देवी को नमस्कार है

मन्त्र

मार्कण्डेय उवाच

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ।।१ ।।

पदच्छेद

मार्कण्डेय उवाच

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमः अस्तु ते ।।१ ।।

अन्वित-पदार्थ

मार्कण्डेयः = मार्कण्डेय ऋषि,
उवाच = बोले,
जयन्ती = जयन्ती,
मंगला = मंगला,
काली = काली,
भद्रकाली = भद्रकाली,
कपालिनी = कपालिनी,
दुर्गा = दुर्गा,
क्षमा = क्षमा,
शिवा = शिवा,
धात्री = धात्री,
स्वाहा = स्वाहा,
स्वधा = स्वधा,
(इति नामभिः प्रसिद्धा जगदम्बिके) = इन नामों से प्रसिद्ध हे जगदम्बिके,
ते = तुझे,
नमः = नमस्कार,
अस्तु = हो ।।१ ।।

मन्त्र

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तुते ।।२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

जय त्वम् देवि चामुण्डे जय भूत-अर्ति-हारिणि।
जय सर्व-गते देवि काल-रात्रि नमः अस्तु ते ।।२ ।।

अन्वित-पदार्थ

देवि = हे देवि !
चामुण्डे = चामुण्डे !
त्वं जय (अस्तु) = तुम्हारी जय हो,
भूतार्तिहारिणी (देवि) = प्राणियों का कष्ट हरनेवाली देवि !,
(त्वं) जय (अस्तु) = तुम्हारी जय हो,
सर्वगते = हे सब में व्याप्त,
देवि = देवि !,
(त्वं) जय (अस्तु) = तुम्हारी जय हो,
कालरात्रि = हे कालरात्रि !,
ते = तुझे,
नमः = नमस्कार,
अस्तु = हो ।।२ ।।

मन्त्र

मधुकैटभविद्राविविधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।३ ।।

पदच्छेद

मधु-कैटभ-विद्रावि विधातृ वरदे नमः।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।३ ।।

अन्वित-पदार्थ

मधु-कैटभ = मधु और कैटभ दैत्यों को,
विद्रावि = विदीर्ण करनेवाली,
विधातृ = हे ब्रह्मा को,
वरदे = वरदान देनेवाली,
नमः = तुझे नमस्कार है,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।४ ।।

पदच्छेद

महिष असुर निर नाशि भक्तानाम् सुखदे नमः ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।४ ।।

अन्वित-पदार्थ

महिषासुर = महिष नामक असुर का,
निर्णाशि = नाश करनेवाली,
भक्तानाम् = भक्तों को,
सुखदे = सुख देनेवाली,
(देवि तुभ्यं) नमः = हे देवि ! तुझे नमस्कार है,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।४ ।।

मन्त्र

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।५ ।।

पदच्छेद

रक्तबीज-वधे देवि चण्ड-मुण्ड-विनाशिनि ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।५ ।।

अन्वित-पदार्थ

रक्तबीज = हे रक्तबीज असुर का,
वधे = वध करनेवाली,
देवि = देवि !,
चण्डमुण्ड = हे चण्ड और मुण्ड नामक असुरों का,
विनाशिनी = नाश करनेवाली,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।६ ।।

पदच्छेद

शुम्भस्य एव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।६ ।।

अन्वित-पदार्थ

शुम्भस्य = हे शुम्भ का,
निशुम्भस्य = निशुम्भ का,
एव (च) = और
धूम्राक्षस्य = धूम्राक्ष का,
मर्दिनि = मर्दन करनेवाली,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।६ ।।

मन्त्र

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।७ ।।

पदच्छेद

वन्दित-अङ्घ्रि-युगे देवि सर्व-सौभाग्य-दायिनि।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।७ ।।

अन्वित-पदार्थ

वन्दित = हे वन्दित,
अङ्घ्रि-युगे = चरण युगले,
देवि = देवि,
सर्व-सौभाग्य = हे सभी प्रकार के सौभाग्य को,
दायिनि = देनेवाली,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।८।।

पदच्छेद

अचिन्त्य-रूप-चरिते सर्व-शत्रु-विनाशिनि।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।८।।

अन्वित-पदार्थ

अचिन्त्य = हे अचिन्त्य,
रूप = रूप,
चरिते (च) = तथा चरित्रवाली,
सर्वेषाम् शत्रूणाम् = हे शत्रुओं का,
विनाशिनि = विनाश करनेवाली,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।८।।

मन्त्र

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।९।।

पदच्छेद

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरित आपहे।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।९।।

अन्वित-पदार्थ

दुरित आपहे = पापों को दूर
चण्डिके = चण्डिके !,
सर्वदा = सदा,
भक्त्या = भक्तिपूर्वक,
नतेभ्यः = नमन करनेवालों को,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१० ।।

पदच्छेद

स्तुवद्भ्यः भक्तिपूर्वम् त्वाम् चण्डिके व्याधि-नाशिनि ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१० ।।

अन्वित-पदार्थ

व्याधि-नाशिनि = रोगों का नाश करनेवाली,
चण्डिके = चण्डिके !,
भक्ति-पूर्वम् = भक्तिपूर्वक,
त्वाम् = तुम्हारी,
स्तुवद्भ्यः = स्तुति करनेवालों को,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१०।।

मन्त्र

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।११ ।।

पदच्छेद

चण्डिके सततम् ये त्वाम् अर्चयन्ति इह भक्तितः ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।११ ।।

अन्वित-पदार्थ

चण्डिके = चण्डिके,
इह = इस संसार में,
सततम् ये = लगातार जो,
त्वाम् = तुम्हें,
भक्तितः = भक्तिपूर्वक,
अर्चयन्ति = पूजते हैं, उन्हें,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।११।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१२।।

पदच्छेद

देहि सौभाग्यम् आरोग्यम् देहि मे परमम् सुखम् ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१२।।

अन्वित-पदार्थ

मे = मुझे,
सौभाग्यम् = सौभाग्य,
आरोग्यम् = आरोग्य,
परमम् (च) = और परम,
सुखम् = सुख,
देहि = दो,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१२।।

मन्त्र

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१३।।

पदच्छेद

विधेहि द्विषताम् नाशम् विधेहि बलम् उच्चकैः ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१३।।

अन्वित-पदार्थ

द्विषताम् = आप शत्रुओं का,
नाशम् = विनाश,
विधेहि = करें,
उच्चकैः (च) = और अत्यधिक,
बलम् = शक्तिमान,
विधेहि = बनावें,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१४ ।।

पदच्छेद

विधेहि देवि कल्याणम् विधेहि परमाम् श्रियम् ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१४ ।।

अन्वित-पदार्थ

देवि = हे देवि !,
कल्याणम् = कल्याण,
विधेहि = करें,
परमाम् (च) = और अपार,
श्रियम् = धन,
विधेहि = प्रदान करें,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१४।।

मन्त्र

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१५ ।।

पदच्छेद

सुर-असुर-शिरः रत्न-निघृष्ट-चरणे-अम्बिके।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१५ ।।

अन्वित-पदार्थ

सुरासुराभ्याम् च = देवताओं और असुरों के,
शिरःरत्नैः = शिर के रत्नों से,
निघृष्ट = घिसे जाते हुए,
चरणे = चरणोंवाली,
अम्बिके = अम्बिके !,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१६ ।।

पदच्छेद

विद्यावन्तम् यशस्वन्तम् लक्ष्मीवन्तम् जनम् कुरु।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१६ ।।

अन्वित-पदार्थ

(त्वं निजं) जनम् = तुम अपने भक्त को,
विद्यावन्तम् = विद्वान्,
यशस्वन्तम् = यशस्वी,
लक्ष्मीवन्तम् (च) = और धनवान,
कुरु = बनाओ,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१६।।

मन्त्र

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१७ ।।

पदच्छेद

प्र-चण्ड-दैत्य-दर्पघ्ने चण्डिके प्रणताय मे।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१७ ।।

अन्वित-पदार्थ

प्रचण्डदैत्यानाम् = भीषण दैत्यों के,
दर्पघ्ने = अहंकार को चूर करनेवाली,
चण्डिके = चण्डिके !,
मे = मुझे,
प्रणताय = शरणागत को,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१८।।

पदच्छेद

चतुःभुजे चतुः-वक्त्र-सम्-स्तुते परम-ईश्वरि।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१८।।

अन्वित-पदार्थ

चतुर्वक्त्रेण = चार मुँहवाले ब्रह्मा से,
संस्तुते = स्तुति की जानेवाली,
चतुर्भुजे = चार हाथोंवाली,
परमेश्वरि = श्रेष्ठतम स्वामिनी !,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१८।।

मन्त्र

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।१९।।

पदच्छेद

कृष्णेन सम् स्तुते देवि शश्वत् भक्त्या सदा अम्बिके।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।१९।।

अन्वित-पदार्थ

कृष्णेन = भगवान श्रीकृष्ण द्वारा,
सदा = सदा,
शाश्वत् (च) = और निरन्तर,
भक्त्या = भक्तिपूर्वक,
संस्तुते = स्तुति की जाती हुई,
देवि = देवि,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।१९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।२० ।।

पदच्छेद

हिम-अचल-सुता-नाथ-सम् स्तुते परम ईश्वरि ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।२० ।।

अन्वित-पदार्थ

हिमाचलस्य = हिमालय की,
सुतायाः = पुत्री के,
नाथेन = पति भगवान शंकर द्वारा,
संस्तुते = स्तुति की जाती हुई,
परमेश्वरि = परमेश्वरी,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।२०।।

मन्त्र

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।२१ ।।

पदच्छेद

इन्द्राणी-पति-सत् भाव-पूजिते परम ईश्वरि ।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।२१ ।।

अन्वित-पदार्थ

इन्द्राण्याः = शची के,
पत्याः = पति इन्द्र द्वारा,
सद्भावेन = सद्भाव से,
पूजिते = पूजित होनेवाली,
परमेश्वरि = परमेश्वरि !,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।२१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।२२ ।।

पदच्छेद

देवि प्र चण्ड दोर्-दण्ड-दैत्य-दर्प-वि नाशिनि।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।२२ ।।

अन्वित-पदार्थ

प्रचण्डानाम् = प्रचण्ड,
दोर्दण्डानाम् = भुजदण्डवाले,
दैत्यानाम् = दैत्यों का,
दर्पविनाशिनि = अहंकार चूर करनेवाली,
देवि = हे देवि !,
(त्वम्) = तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।२२।।

मन्त्र

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।२३ ।।

पदच्छेद

देवि भक्त-जन-उद्दाम-दत्त-आनन्द-उदये अम्बिके।
रूपम् देहि जयम् देहि यशः देहि द्विषः जहि ।।२३ ।।

अन्वित-पदार्थ

भक्तजनेभ्यः = भक्त जनों के लिए,
उद्दाम = अपार,
दत्त आनन्द उदये = आनन्द का उदय करानेवाली,
देवि = देवि !,
अम्बिके = अम्बिके !,
(हे देवि ! त्वम्) = हे देवि ! तुम,
रूपम् देहि = रूप दो,
जयम् देहि = जय दो,
यशः देहि = यश दो,
द्विषः (च) जहि = और शत्रुओं का विनाश करो ।।२३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ।।२४ ।।

पदच्छेद

पत्नीम् मनोरमाम् देहि मनः वृत्त-अनुसारिणीम् ।
तारिणीम् दुर्ग-संसार-सागरस्य कुल उद्भवाम् ।।२४ ।।

अन्वित-पदार्थ

मनः वृत्तानुसारिणीम् = मन की इच्छानुसार चलनेवाली,
दुर्गस्य = दुर्गम,
संसारसागरस्य = संसार सागर के,
तारिणाम् = पार पहुँचानेवाली,
कुलोद्भवाम् = उत्तम कुल में उत्पन्न,
मनोरमाम् = मन में बसनेवाली,
पत्नीम् = पत्नी,
देहि = दीजिए ।।२४ ।।

मन्त्र

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ।।२५ ।।

पदच्छेद

इदम् स्तोत्रम् पठित्वा तु महा-स्तोत्रम् पठेत् नरः ।
स तु सप्त-शती-संख्या-वरम् आप्नोति सम्पदाम् ।।२५ ।।

अन्वित-पदार्थ

(यः) नरः = जो मनुष्य,
इदम् = इस अर्गला,
स्तोत्रम् तु = स्तोत्र को,
पठित्वा = पढ़ कर,
महास्तोत्रम् = दुर्गासप्तशती का,
पठेत् = पाठ करे,
स तु = वह,
सप्तशती = सात सौ,
संख्या = संख्या की सप्तशती के पाठ का,
वरम् = फल,
आप्नोति = पाता है,
सम्पदाम् (च आप्नोति) = और सम्पत्ति पाता है ।।२५ ।।

।। इति देव्या अर्गलास्तोत्रं सम्पूर्णम्।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथ कीलकम् ।।

ॐ नमश्चण्डिकायै

चण्डिका देवी को नमस्कार है

मन्त्र

मार्कण्डेय उवाच

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ।।१ ।।

पदच्छेद

मार्कण्डेयः उवाच

विशुद्ध-ज्ञान-देहाय त्रिवेदी-दिव्य चक्षुषे ।
श्रेयः प्राप्ति-निमित्ताय नमः सोम-अर्द्ध-धारिणे ।।१ ।।

अन्वित-पदार्थ

मार्कण्डेयः = मार्कण्डेय मुनि
उवाच = बोले,
विशुद्धज्ञानदेहाय = शुद्ध ज्ञान ही जिनका शरीर है,
त्रिवेदीदिव्य चक्षुषे = तीनों वेद जिनके दिव्य नेत्र हैं,
श्रेयः = कल्याण,
प्राप्तिनिमित्ताय = प्राप्ति के जो कारण हैं,
सोमार्ध = अर्ध चन्द्र,
धारिणे = धारण करनेवाले उस शिव को,
नमः = नमस्कार है ।।१ ।।

मन्त्र

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ।।२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

सर्वम् एतत् विजानीयात् मन्त्राणाम् अभि कीलकम्[१]।
सः अपि क्षेमम् अवाप्नोति सततम् जाप्य तत्परः ।।२ ।।

अन्वित-पदार्थ

मन्त्राणाम् = मन्त्रों का यह सप्तशती,
अभिकीलकम् (अस्ति) = अभिकीलक है अर्थात् शापरूपी विघ्न का निवारक है,
एतत् = इस सप्तशती को,
सर्वम् = सम्पूर्ण रूप से,
विजानीयात् = जानना चाहिए,
सततम् = निरन्तर,
जाप्य = अन्य मन्त्रों को जपने में,
तत्परः = जो लगा हुआ है,
सः = वह,
अपि = भी,
क्षेमम् = कल्याण,
अवाप्नोति = प्राप्त करता है ।।२ ।।

मन्त्र

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवीं स्तोत्रमात्रेण सिद्ध्यति ।।३ ।।

पदच्छेद

सिद्ध्यन्ति उच्चाटन आदीनि वस्तूनि सकलानि अपि ।
एतेन स्तुवताम् देवीं स्तोत्र मात्रेण सिद्ध्यति ।।३ ।।

अन्वित-पदार्थ

सकलानि = अन्य मन्त्रों का जप करनेवालों के सभी,
उच्चाटन आदीनि वस्तूनि = मारण मोहन उच्चाटन आदि,
अपि = भी,
सिद्ध्यन्ति = सिद्ध होते हैं किन्तु,
एतेन = इस सप्तशती से,
देवीं = देवी की,
स्तुवताम् = स्तुति करने से,
स्तोत्रमात्रेण = केवल पाठ से,
सिद्ध्यति = सब कुछ सिद्ध हो जाता है ।।३ ।।

---

१. कील का अर्थ है काँटा या खूँटी जिसका भाव यहाँ विघ्न से है। सप्तशती उन विघ्नों का अभिकीलन करती है अर्थात् उन बाधाओं को दूर करती है। ब्रह्मा, वसिष्ठ और विश्वामित्र के शापों से उद्धार करती है।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

न मन्त्रं नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्ध्येत् सर्वमुच्चाटनादिकम् ।।४ ।।

पदच्छेद

न मन्त्रम् न औषधम् तत्र न किञ्चित् अपि विद्यते ।
विना जाप्येन सिद्ध्येत् सर्वम् उच्चाटन आदिकम् ।।४ ।।

अन्वित-पदार्थ

तत्र = सप्तशती पाठ करनेवालों को,
मन्त्रम् = मन्त्र,
औषधम् = दवा,
किञ्चित् अपि = या अन्य साधनों की आवश्यकता,
न विद्यते = नहीं पड़ती,
जाप्येन विना = अन्य मन्त्रों के जप के बिना,
सर्वम् = सभी,
उच्चाटन = उच्चाटन,
आदिकम् = आदि अभिचार कर्म,
सिद्ध्येत् = सिद्ध होते हैं ।।४ ।।

मन्त्र

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ।।५ ।।

पदच्छेद

समग्राणि अपि सिद्ध्यन्ति लोक-शङ्काम् इमाम् हरः ।
कृत्वा निमन्त्रयामास सर्वम् एव इदम् शुभम् ।।५ ।।

अन्वित-पदार्थ

समग्राणि अपि = सभी,
सिद्ध्यन्ति = सिद्ध होते हैं अर्थात्सप्तशती पाठ और अन्य मन्त्रों के जप इन दोनों से ही सिद्धि मिलती है,
हरः = भगवान शिव ने,
इमाम् = इस,
लोकशंकाम् = लोक शंका को,
कृत्वा = समक्ष रखकर कि जब दोनों से सिद्धि मिलती है तो श्रेष्ठ कौन है ?,
निमन्त्रयामास = लोगों को बुलाकर समझाया,
सर्वम् इदम् = सब में यह सप्तशती,
शुभम् = उत्तम है ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम्।।६।।

पदच्छेद

स्तोत्रं वै चण्डिकायाः तु तत् च गुप्तं चकार सः।
समाप्तिः न च पुण्यस्य तां यथावत् नियन्त्रणाम्।।६।।

अन्वित-पदार्थ

सः च = और तब उस महादेव ने,
तत् वै = उस,
चण्डिकायाः = चण्डिका के,
स्तोत्रम् = स्तोत्र को,
गुप्तम् = गुप्त,
चकार = कर दिया,
(अस्य) पुण्यस्य च = और कहा कि इस सप्तशती स्तोत्र के पुण्य की,
समाप्तिः न = समाप्ति नहीं होती जब कि अन्य की हो जाती है,
(अतः) ताम् = उन्होंने उस सप्तशती को,
यथावत् = श्रेष्ठ,
नियन्त्रणाम् = ठहराया।।६।।

मन्त्र

सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः।।७।।

पदच्छेद

सः अपि क्षेमम् अव आप्नोति सर्वम् एवम् न संशयः।
कृष्णायाम् वा चतुर्दश्याम् अष्टम्याम् वा समाहितः।।७।।

अन्वित-पदार्थ

सः अपि = अन्य मन्त्रों का जापक भी देवी पाठ करने पर,
सर्वम् = सभी प्रकार का,
क्षेमम् = कल्याण,
संशयः न = इसमें कोई शंका नहीं है,
कृष्णायाम् = कृष्ण पक्ष की,
चतुर्दश्याम् वा = चाहे चतुर्दशी को,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अवाप्नोति = प्राप्त करता है,
एवम् = इस प्रकार,
वा = अथवा,
अष्टम्याम् = अष्टमी को,
समाहितः = संयमित चित्त से ।।७।।

मन्त्र

ददाति प्रतिगृह्णाति[1] नान्यथैषा प्रसीदति ।
इत्थं रूपेण कीलेन महादेवेन कीलितम् ।।८।।

पदच्छेद

ददाति प्रति गृह्णाति न अन्यथा एषा प्रसीदति ।
इत्थम् रूपेण कीलेन महादेवेन कीलितम् ।।८।।

अन्वित-पदार्थ

ददाति = भक्त अपना सर्वस्व समर्पित करता है,
प्रतिगृह्णाति = फिर उसे देवी के प्रसाद के रूप में ग्रहण करता है,
एषा = यह देवी,
अन्यथा = इसके सिवाय,
न प्रसीदति = प्रसन्न नहीं होती,
इत्थम् = इस,
रूपेण = प्रकार के,
कीलेन = सिद्धि में बाधक कील से,
महादेवेन = महादेव द्वारा,
कीलितम् = यह सप्तशती स्तोत्र कीलित कर दिया गया है ।।८।।

मन्त्र

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ।।९।।

पदच्छेद

यः निष्कीलाम् विधाय एनाम् नित्यम् जपति सम् स्फुटम् ।
सः सिद्धः सः गणः सः अपि गन्धर्वः जायते नरः ।।९।।

अन्वित-पदार्थ

यः = जो,
सः नरः = वह मनुष्य,

---

१. अर्पित करके प्रसाद स्वरूप ग्रहण करने को 'दानप्रतिग्रह-करण' कहते हैं।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एनाम् = इस सप्तशती स्तोत्र को,
निष्कीलाम् = कील के विघ्न से मुक्त,
विधाय = करके,
नित्यम् = प्रतिदिन,
संस्फुटम् = स्पष्ट उच्चारण पूर्वक,
जपति = जो जपता है,
सिद्धः (भवति) = सिद्ध हो जाता है,
सः गणः (भवति) = वह देवी का गण हो जाता है,
सः अपि = वही,
गन्धर्वः = गन्धर्व,
जायते = हो जाता है ।।९ ।।

मन्त्र

न चैवाप्यटस्तस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ।।१० ।।

पदच्छेद

न च एव अपि अटः तस्य भयम् क्व अपि इह जायते ।
न अपमृत्यु-वशम् याति मृतः मोक्षम् अवाप्नुयात् ।।१० ।।

अन्वित-पदार्थ

इह च = और इस संसार में,
तस्य = उस,
अटः = विचरण करनेवाले को,
क्व अपि = कहीं भी,
भयम् = भय,
न एव = नहीं,
जायते = उत्पन्न होता,
न (च) = और न,
अपमृत्यु = अकालमृत्यु के,
वशम् = वश में,
याति = होता है,
मृतः = मरने पर,
मोक्षम् = मोक्ष,
अवाप्नुयात् = प्राप्त करता है ।।१० ।।

मन्त्र

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ।।११ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणः विनश्यति।
ततः ज्ञात्वा एव सम्पन्नम् इदम् प्रारभ्यते बुधैः ।।११ ।।

अन्वित-पदार्थ

ज्ञात्वा = निष्कीलन विधि जानकर,
प्रारभ्य = सप्तशती को प्रारम्भ करके,
कुर्वीत = करना चाहिए,
न कुर्वाणः = ऐसा न करनेवाला,
विनश्यति = नष्ट हो जाता है अर्थात् उसे सिद्धि नहीं प्राप्त होती,
ततः = इसलिए,
ज्ञात्वा एव = जानकर ही,
सम्पन्नम् = यह पूर्णता को प्राप्त होता है,
इदम् = ऐसा होने पर ही यह,
बुधैः = विद्वानों द्वारा,
प्रारभ्यते = प्रारम्भ किया जाता है ।।११ ।।

मन्त्र

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ।।१२ ।।

पदच्छेद

सौभाग्य आदि च यत् किञ्चित् दृश्यते ललना जने।
तत् सर्वम् तत् प्रसादेन तेन जाप्यम् इदम् शुभम् ।।१२ ।।

अन्वित-पदार्थ

ललना जने च = स्त्रियों में,
यत् किञ्चित् = जो कुछ,
सौभाग्य आदि = सौभाग्य आदि,
दृश्यते = दिखाई देता है,
तत् सर्वम् = वह सब,
तत्प्रसादेन = उसी की कृपा से होता है,
तेन = इसलिए,
इदम् = यह,
जाप्यम् = सप्तशती पाठ,
शुभम् = कल्याणकारक है ।।१२ ।।

मन्त्र

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ।।१३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

शनैः तु जप्यमाने अस्मिन् स्तोत्रे सम्पत्तिः उच्चकैः ।
भवति एव समग्रः अपि ततः प्रारभ्यमेव तत् ।।१३ ।।

अन्वित-पदार्थ

अस्मिन् स्तोत्रे = इस स्तोत्र के,
शनैः = मन्द स्वर से,
जप्यमाने तु = पाठ करने पर भी,
सम्पत्तिः (भवति) = सम्पत्ति प्राप्त होती है,
उच्चकैः = उच्च स्वर से पाठ करने पर
समग्रः अपि = सारी सफलता,
भवति = प्राप्त होती है,
ततः = इसलिए,
तत् एव = उसी उच्च स्वर से ही,
प्रारभ्यम् = पाठ प्रारम्भ करना चाहिए ।।१३ ।।

मन्त्र

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ।।१४ ।।

पदच्छेद

ऐश्वर्यम् यत् प्रसादेन सौभाग्य-आरोग्य-सम्पदः ।
शत्रु-हानिः परः मोक्षः स्तूयते सा न किं जनैः ।।१४ ।।

अन्वित-पदार्थ

यत्प्रसादेन = जिस देवी की कृपा से,
ऐश्वर्यम् = ऐश्वर्य,
सौभाग्यम् = सौभाग्य,
आरोग्यम् = नीरोगता,
सम्पदः (च) = और सम्पत्तियाँ मिलती हैं,
शत्रुहानिः भवति = शत्रु की हानि होती है,
परः = मरने पर,
मोक्षः (भवति) = मोक्ष होता है,
सा = वह देवी,
जनैः = लोगों द्वारा,
किम् न = क्यों नहीं,
स्तूयते = स्तुत की जाती ? अर्थात् ऐसी दयामयी देवी की स्तुति करनी ही चाहिए ।।१४ ।।

।। इति देव्याः कीलकस्तोत्रं सम्पूर्णम् ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथप्रथमोऽध्यायः ।।

मन्त्र

।। ॐ ऐं मार्कण्डेय उवाच ।। १ ।।

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ।।२।।

पदच्छेद

मार्कण्डेयः उवाच ।।१ ।।
सावर्णिः सूर्य-तनयः यः मनुः कथ्यते अष्टमः ।
निशामय तत् उत्-पत्तिम् वि-स्तरात् गदतः मम ।।२ ।।

अन्वित-पदार्थ

मार्कण्डेयः = मार्कण्डेय मुनि,
उवाच = बोले ।।१ ।।
सूर्यतनयः = सूर्य के पुत्र,
सावर्णिः = सवर्ण गोत्र में उत्पन्न,
यः = जिन्हें,
अष्टम मनुः = आठवाँ मनु,
कथ्यते = कहा जाता है,
तस्य उत्पत्तिम् = उनकी उत्पत्ति का वृत्तान्त,
मम = मुझे,
विस्तरात् गदतः = विस्तार पूर्वक बोलते हुए,
निशामय = तुम सुनो ।।२ ।।

मन्त्र

महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ।।३ ।।

पदच्छेद

महामायाअनुभावेन (महा-माया-अनु-भावेन) यथा
मन्वन्तराधिपः (मनु-अन्तरस्य अधि-पः)।
सः बभूव महा-भागः सावर्णिः तनयः रवेः ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

रवेः = रवि के,
तनयः = आत्मज,
सः सावर्णिः = वे सावर्णि नामक,
महाभागः = महानुभाव,
महामायायाः = महामाया की,
अनुभावेन = कृपा कटाक्ष से,
यथा = जिस प्रकार,
मन्वन्तरस्य = मन्वन्तर के,
अधिपः = स्वामी,
बभूव = बने थे ।।३ ।।

मन्त्र

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ।।४ ।।

पदच्छेद

स्वारोचिषे अन्तरे पूर्वं चैत्रवंशसमुद्भवः (चैत्र-वंशे सम्-उद्भवः)।
सुरथः नाम राजा अभूत् समस्ते क्षितिमण्डले (क्षिति-मण्डले) ।।४ ।।

अन्वित-पदार्थ

पूर्वं = प्राचीन काल में,
स्वारोचिषे अन्तर = स्वारोचिष मन्वन्तर में,
समस्ते क्षितेः = सारी धरती के,
मण्डले = भूभाग में,
चैत्रवंशे = चैत्रवंश में,
समुद्भवः = उत्पन्न,
सुरथः = सुरथ,
नाम = नामक,
राजा = नरपति,
अभूत् = हुए थे ।।४ ।।

मन्त्र

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ।।५ ।।

पदच्छेद

तस्य पालयतः सम्यक् प्रजाः पुत्रान् इव औरसान् ।
बभूवुः शत्रवः भूपाः कोला-विध्वंसिनः तदा ।।५ ।।

अन्वित-पदार्थ

तदा = उस समय,
प्रजाः = प्रजा का,
तस्य = उस राजा का,
कोलाविध्वंसिनः =

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

औरसान् = सगे,
पुत्रान् इव = पुत्रों के समान,
सम्यक् = भली प्रकार से,
पालयतः = पालन करते हुए,
कोलाविध्वंसी नामक,
भूपाः = राजाओं का संघ,
शत्रवः = शत्रु,
बभूवुः = हो गया ।।५ ।।

मन्त्र

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ।
अन्यैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ।।६ ।।

पदच्छेद

तस्य तैः अभवत् युद्धम् अति-प्रबल-दण्डिनः ।
अन्यैः अपि सः तैः युद्धे कोला-विध्वंसिभिः जितः ।।६ ।।

अन्वित-पदार्थ

तस्य = उस,
अति-प्रबलस्य = अत्यन्त प्रबल,
दण्डिनः = राजनीतिक प्रभाव वाले राजा का,
तैः = उन,
कोला-विध्वंसिभिः = कोलाविध्वंसियों के साथ,
युद्धं = युद्ध,
अभवत् = हुआ,
सः = वह सुरथ राजा,
युद्धे = युद्ध में,
तैः = उन से,
अन्यैः अपि = तथा उसी प्रकार के अन्य शत्रुओं द्वारा,
जितः = जीत लिया गया ।।६ ।।

मन्त्र

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ।।७ ।।

पदच्छेद

ततः स्वपुरम् (स्वस्य पुरम्) आ-यातः निजदेशाधिपः (निज- देशस्य अ-धिपः) अभवत् ।
आ-क्रान्तः सः महा-भागः तैः तदा प्रबलारिभिः (प्रबल-अरिभिः) ।।७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = पराजय के बाद,
स्वस्य पुरम् = अपने नगर में,
आयातः = आकर,
निजदेशस्यः = अपनी राजधानी का,
अधिपः = स्वामी,
अभवत् = हुआ,
तदा = तब वहाँ भी,
सः = वह,
महाभागः = महानुभाव,
तैः = उन,
प्रबलैः = प्रबल,
अरिभिः = शत्रुओं द्वारा,
आक्रान्तः = घिर गया ।।७।।

मन्त्र

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ।।८।।

पदच्छेद

अमात्यैः बलिभिः दुष्टैः दुर्बलस्य दुरात्मभिः ।
कोशः बलम् च अपहृतम् अपि स्वपुरे (स्वस्य पुरे) ततः ।।८।।

अन्वित-पदार्थ

ततः = उसके बाद,
तत्र = वहाँ,
स्वस्य पुरे = अपने नगर में,
अपि = भी,
दुर्बलस्य = उस दुर्बल राजा का,
दुष्टैः = दुष्ट,
बलिभिः = शक्तिशाली,
दुरात्मभिः = दुराचारी,
अमात्यैः = मन्त्रियों द्वारा,
कोशः = खजाना,
बलम् च = तथा सेना,
अपहृतम् = छीन लिया गया ।।८।।

मन्त्र

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।
एकाकी हयमारुह्य जगाम गहनं वनम् ।।९।।

पदच्छेद

ततः मृगयाव्याजेन (मृगयायाः व्याजेन) हृत-स्वाम्यः सः भूपतिः ।
एकाकी हयम् आ-रुह्य जगाम गहनम् वनम् ।।९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = इसके पश्चात्,
हत-स्वाम्यः = अपना सर्वस्व खो चुका,
सः भूपतिः = वह राजा सुरथ,
एकाकी = अकेले,
हयम् = घोड़े पर,
आरुह्य = सवार होकर,
मृगयायाः = शिकार के,
व्याजेन = बहाने से,
गहनं वनम् = घने जंगल की ओर,
जगाम = चला गया ।।९।।

मन्त्र

स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ।।१०।।

पदच्छेद

सः तत्र आ-श्रमम् अद्राक्षीत् द्विजवर्यस्य
(द्विजानां वर्यस्य) मेधसः ।
प्रशान्तश्वापदाकीर्णं (प्र-शान्तैः श्वापदैः आ-कीर्णम्)
मुनिशिष्योप-शोभितम् (मुनेः शिष्यैः उप-शोमितम्) ।।१०।।

अन्वित-पदार्थ

तत्र = वहाँ,
सः = उस राजा ने,
द्विजानां = ब्राह्मणों में,
वर्यस्य = श्रेष्ठ,
मेधसः = सुमेधा के,
प्रशान्तं = स्वाभाविक रूप से शान्त,
श्वापदैः = जंगली पशुओं से,
आकीर्ण = घिरे हुए,
मुनेः = मुनि के,
शिष्यैः = शिष्यों से,
उपशोभितम् = शोभायमान,
आश्रमम् = आश्रम को,
अद्राक्षीत् = देखा ।।१०।।

मन्त्र

तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ।।११।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तस्थौ कश्चित् सः कालम् च मुनिना तेन सत्कृतः।
इतश्च-इतश्च विचरन् तस्मिन् मुनिवराश्रमे
(मुनि-वरस्य आश्रमे) ।।११ ।।

अन्वित-पदार्थ

सः = वह राजा,
तेन = उस,
मुनिना = मुनि के द्वारा,
सत्कृतः = सत्कार प्राप्त करके,
कश्चित् कालम् च = तथा कुछ समय तक,
इतश्च-इतश्च विचरन् = इधर-उधर घूमते हुए,
मुनिवरस्य = मुनिवर के,
तस्मिन् = उस,
आश्रम = आश्रम में,
तस्थौ = रुक गया ।।११ ।।

मन्त्र

सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ।।१२ ।।

पदच्छेद

सः अचिन्तयत् तदा तत्र ममत्वाकृष्टचेतनः
(ममत्वेन आकृष्ट-चेतनः)।
मम पूर्वैः पालितम् पूर्वम् मया हीनम् पुरम् हि तत् ।।१२ ।।

अन्वित-पदार्थ

तदा = तब,
तत्र = वहाँ आश्रम में,
ममत्वेन = ममता के कारण,
आकृष्टचेतनः = आकर्षित चित्त वाला,
सः = वह राजा,
अचिन्तयत् = सोचने लगा कि,
पूर्वं = पहले,
मम = मेरे,
पूर्वैः = पूर्वजों द्वारा,
पालितं = सुरक्षित,
तत् = वह,
पुरम् = दुर्ग,
मया = आज मुझसे ही,
हीनम् हि = विहीन है ।।१२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा।
न जाने स प्रधानो मे शूरहस्ती सदामदः ।।१३।।

पदच्छेद

मद् भृत्यैः (मम भृत्यैः) तैः असद्वृत्तैः धर्मतः पाल्यते न वा।
न जाने सः प्रधानः मे शूर-हस्ती सदा-मदः ।।१३।।

अन्वित-पदार्थ

तैः = उन,
मम = मेरे,
असद्वृत्तैः = दुश्चरित्र,
भृत्यैः = सेवकों द्वारा,
धर्मतः = मेरे दुर्ग की धर्मानुकूल,
पाल्यते न वा = रक्षा होती होगी या नहीं,
न जान = मैं नहीं जानता कि,
सः मे = वह मेरा,
सदामदः = सदा मदमस्त रहने वाला,
प्रधानः = प्रधान नामक,
शूरहस्ती = बलवान हाथी ।।१३।।

मन्त्र

मम वैरिवशं यातः कान् भोगानुपलप्स्यते।
ये ममानुगता नित्यं प्रसाद धन भोजनैः ।।१४।।

पदच्छेद

मम वैरि-वशम् (वैरिणा वशम्) यातः कान् भोगान् उपलप्स्यते।
ये मम अनु-गताः नित्यम् प्रसादधनभोजनैः
(प्र-सादेन धनेन भोजनेन) ।।१४।।

अन्वित-पदार्थ

मम = अब मेरे,
वैरिणा = शत्रुओं की,
वशं यातः = अधीनता में होकर,
य = जो सेवक,
प्रसादेन = सद्व्यवहार से,
धनेन = वेतन आदि के रूप में धनदान से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कान् भोगान् = कैसी सुविधाएँ,
उपलप्स्यते = पाता होगा,
भोजनेन = अन्नदान के कारण,
नित्यं मम = मेरे नित्य,
अनुगताः = अनुवर्ती थे ।।१४।।

मन्त्र

अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ।।१५।।

पदच्छेद

अनु-वृत्तिं ध्रुवम् ते अद्य कुर्वन्ति अन्य महीभृताम्
(अन्येषाम् महीभृताम्) ।
अ-सम्यक् व्यय-शीलैः तैः कुर्वद्भिः सततम् व्ययम् ।।१५।।

अन्वित-पदार्थ

अद्य = आज,
ते = वे सभी,
ध्रुवं = निश्चय ही,
अन्येषाम् = दूसरे,
महीभृताम् = राजाओं की,
अनुवृत्तिं = नौकरी,
कुर्वन्ति = करते होंगे,
तैः = उन,
असम्यक् = असन्तुलित,
व्ययशीलैः = खर्च करने वाले,
अमात्य लोग,
सततं = लगातार,
व्ययम् = खर्च,
कुर्वद्भिः = करते हुए ।।१५।।

मन्त्र

सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ।
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ।।१६।।

पदच्छेद

सञ्चितः सः अति-दुःखेन क्षयम् कोशः गमिष्यति ।
एतत् च अन्यत् च सततम् चिन्तयामास पार्थिवः ।।१६।।

अन्वित-पदार्थ

अतिदुःखेन = अत्यन्त कष्ट सह कर,
गमिष्यति = हो जाएगा,
पार्थिवः = राजा सुरथ,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सञ्चितः = इकट्ठा किया हुआ,
सः = वह,
कोशः = राजकोश,
क्षयम् = नष्ट
सततम् = लगातार,
एतत् च अन्यत् च = इस प्रकार की तथा अन्य,
चिन्तयामास = चिन्ताओं म डूबा रहा ।।१६।।

मन्त्र

तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ।
सम्पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ।।१७।।

पदच्छेद

तत्र विप्राश्रमाभ्याशे (विप्रस्य आ-श्रमस्य अभिआशे)
वैश्यम् एकम् ददर्श सः ।
सम्-पृष्टः तेन कः त्वम् भोः हेतुः च आ-गमने अत्र कः ।।१७।।

अन्वित-पदार्थ

तत्र = वहीं,
विप्रस्य = ब्राह्मण सुमेधा के,
आश्रमस्य = आश्रम के,
अभ्याशे = निकट,
सः = उसने,
एकम् वैश्यम् = एक वैश्य को,
ददर्श = देखा,
तेन = उसके द्वारा,
सम्पृष्टः = पूछे जाने पर कि,
भोः = हे महानुभाव,
कः त्वम् = आप कौन हैं,
अत्र च = और यहाँ,
आगमने = आने का,
कः = क्या,
हेतुः = कारण है ।।१७।।

मन्त्र

सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ।
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ।।१८।।

पदच्छेद

सशोकः इव कस्मात् त्वम् दुर्मनाः इव लक्ष्यसे ।
इति आ-कर्ण्य वचः तस्य भूपतेः प्रणयोदितम्
(प्र-णयेन उदितम्) ।।१८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

त्वम् = तुम,
कस्मात् = क्यों,
सशोकः इव = शोकाकुल से,
दुर्मनाः इव = खिन्न से,
लक्ष्यसे = दिखाई दे रहे हो,
इति = इस प्रकार,
प्रणयेन = अपनेपन से,
उदितम् = कहे गए,
तस्य = उस,
भूपतेः = राजा के,
वचः = कथन को,
आकर्ण्य = सुनकर ।।१८।।

मन्त्र

प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ।।१९।।
वैश्य उवाच ।।२०।।
समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ।।२१।।

पदच्छेद

प्रति-उवाच सः तम् वैश्यः प्र-श्रय-अवनतः नृपम् ।।१९।।
वैश्यः उवाच ।।२०।।
समाधिः नाम वैश्यः अहम् उत्पन्नः धनिनाम् कुले ।।२१।।

अन्वित-पदार्थ

प्रश्रयेण = आदर से,
अवनतः = विनम्र हो कर,
सः वैश्यः = वह वैश्य,
तं नृपं प्रति = उस राजा से,
उवाच = बोला,
वैश्यः उवाच = वैश्य ने कहा,
अहम् = मैं,
धनिनाम् = धनिकों के,
कुले = खानदान में,
उत्पन्नः = जन्मा,
समाधिः नाम = समाधि नामक,
वैश्यः = वणिक् हूँ।।१९-२१।।

मन्त्र

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ।
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ।।२२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

पुत्र-दारैः (पुत्रैः दारैः) निरस्तः च धन-लोभात् अ-साधुभिः।
वि-हीनः च धनैः दारैः पुत्रैः आ-दाय मे धनम्।।२२।।

अन्वित-पदार्थ

असाधुभिः = अपने दुष्ट,
पुत्रैः दारैः = पुत्रों तथा स्त्रियों द्वारा,
धनलोभात् = धन लोलुपता के कारण,
निरस्तः = अपमानित हूँ,
पुत्रैः च = और पुत्रों ने,
मे = मेरी,
धनम् = सम्पत्ति,
आदाय = छीन कर मुझे निष्कासित कर दिया है,
धनैः = अब मैं धन,
दारैः च = तथा पत्नियों से,
विहीनः = विहीन हूँ।।२२।।

मन्त्र

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः।
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम्।।२३।।

पदच्छेद

वनम् अभि-आगतः दुःखी निरस्तः च आप्त-बन्धु-भिः।
सः अहम् न वेद्मि पुत्राणाम् कुशल-अकुशलात्मिकाम्।।२३।।

अन्वित-पदार्थ

आप्तबन्धुभिः = प्रामाणिक सम्बन्धियों से,
निरस्तः = अपमानित हो कर,
च दुःखी = तथा दुःखी होकर,
वनम् = जंगल में,
अभ्यागतः = आ गया,
सः अहं = ऐसा मैं,
पुत्राणाम् = अपने पुत्रों की,
कुशलात्मिकाम् = क्षेम,
अकुशलात्मिकाम् = अक्षेम, किसी प्रकार का समाचार,
न वेद्मि = नहीं जान पा रहा हूँ।।२३।।

मन्त्र

प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः।
किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम्।।२४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

प्र-वृत्तिम् स्व-जनानाम् च दाराणाम् च अत्र सम्-स्थितः।
किम् नु तेषाम् गृहे क्षेमम् अ-क्षेमम् किम् नु साम्प्रतम्।।२४।।

अन्वित-पदार्थ

अत्र = यहाँ वन में,
संस्थितः = रहते हुए,
स्वजनानाम् = अपने प्रियजनों का,
च = तथा,
दाराणाम् च = स्त्रियों का,
प्रवृत्तिम् = समाचार कि,
किम् नु साम्प्रतम् = इस समय,
गृहे = घर में,
तेषाम् = वे सब,
क्षेमम् = ठीक प्रकार से हैं,
किम् नु अक्षेमम् = अथवा उनकी दुर्दशा हो रही है नहीं जानता।।२४।।

मन्त्र

कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः।।२५।।

पदच्छेद

कथम् ते किम् नु सद्-वृत्ताः दुर्-वृत्ताः किम् नु मे सुताः।।२५।।

अन्वित-पदार्थ

ते = वे,
म = मेरे,
सुताः = पुत्रगण,
कथम् = अब कैसे हैं,
किम् नु सद्वृत्ताः = सदाचारी हैं,
किम् नु दुर्वृत्ताः = अथवा दुराचारी हो चुके हैं।।२५।।

मन्त्र

राजोवाच।।२६।।
यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः।।२७।।
तेषु किं भवतः स्नेहमनुबध्नाति मानसम्।।२८।।

पदच्छेद

राजा उवाच।।२६।।
यैः निर्-अस्तः भवान् लुब्धैः पुत्र-दारा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पुत्रैः दारैः) आदिभिः धनैः ।।२७।।
तेषु किम् भवतः स्नेहम् अनु-बध्नाति मानसम् ।।२८।।

अन्वित-पदार्थ

राजा उवाच = राजा ने कहा कि ।।२६।।
यैः लुब्धैः = जिन लालची,
पुत्रैः दारैः = पुत्रों स्त्रियों,
आदिभिः = एवं अन्य बन्धुओं द्वारा,
भवान् = आप,
धनैः = धन के कारण ।।२७।।
निरस्तः = निकाल दिए गये हैं,
भवतः = आपका,
मानसं स्नेहम् = हार्दिक स्नेह,
तेषु = उन्हीं में,
किं अनुबध्नाति = क्यों हो रहा है ।।२८।।

मन्त्र

वैश्य उवाच ।।२९।।
एवमेतद्यथा प्राह भवानस्मद्गतं वचः ।।३०।।

पदच्छेद

वैश्यः उवाच ।।२९।।
एवम् एतद् यथा प्राह भवान् अस्मद् गतम् वचः ।।३०।।

अन्वित-पदार्थ

वैश्यः उवाच = वैश्य ने कहा ।।२९।।
भवान् = हे राजन्,
अस्मद् गतं वचः = मेरे कथन पर,
यथा प्राह = आपने जो कहा है,
एवम् एतद् = वह सही है ।।३०।।

मन्त्र

किं करोमि न बध्नाति मम निष्ठुरतां मनः ।
यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।।३१।।

पदच्छेद

किम् करोमि न बध्नाति मम निष्ठुरताम् मनः ।
यैः सम्-त्यज्य पितृ स्नेहम् धन-लुब्धैः
(धनेन लुब्धैः) निर्-आकृतः ।।३१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

यैः धनेन लुब्धैः = धन के लोभी जिन लोगों ने,
पितृ स्नेहम् = पिता के प्रति स्नेह भाव को,
सन्त्यज्य = त्याग कर हुए,
निराकृतः = मेरा अपमान किया,
मम = मेरा,
मनः = मन उन्हीं के प्रति,
निष्ठुरताम् = क्रूरता,
न बध्नाति = नहीं करउपेक्षा करते पा रहा है,
किं करोमि = क्या करूँ।।३१।।

मन्त्र

पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः।
किमेतन्नाभिजानामि जानन्नपि महामते।।३२।।

पदच्छेद

पति-स्वजन (पतौ स्व-जनेषु)
हार्दम् च हार्दि तेषु एव इव मे मनः।
किम् एतत् न अभि-जानामि जानन् अपि महा-मते।।३२।।

अन्वित-पदार्थ

महामते ! = हे महामति !,
पतौ हार्दं = पति के प्रति स्नेह,
स्वजनेषु हार्दं च = तथा अपने सगे के प्रति स्नेह को जिन्होंने छोड़ दिया,
तेषु एव = उन्हीं के प्रति,
मे मनः हार्दि इव = मेरा मन लगा सा है,
किम् एतत् = यह मोह भाव क्या है ?,
जानन् अपि = मैं जानते हुए भी,
न अभिजानामि = नहीं समझ पा रहा हूँ।।३२।।

मन्त्र

यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते।।३३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

यत् प्रेम (प्रेम्णा) प्र-वणम् चित्तम् वि-गुणेषु अपि बन्धुषु।
तेषाम् कृते मे निः-श्वासः दौर्मनस्यम् च जायते ।।३३ ।।

अन्वित-पदार्थ

यत् मे चित्तम् = जो मेरा चित्त,
विगुणेषु अपि बन्धुषु = उन दुर्गुणी बन्धुओं के प्रति,
प्रेम्णा = प्रेमभाव से,
प्रवणम् = अभिभूत है,
तेषाम् कृते = उन्हीं के लिए,
निःश्वासः = मेरी हाय निकल रही है,
दौर्मनस्यम् च जायते = तथा मन खिन्न भी हो रहा है ।।३३ ।।

मन्त्र

करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ।।३४ ।।

पदच्छेद

करोमि किम् यत् न मनः तेषु अ-प्रीतिषु निष्ठुरम् ।।३४ ।।

अन्वित-पदार्थ

यत् मनः = मेरा मन जो,
तेषु अप्रीतिषु = उन्हीं क्रूरों के प्रति,
न निष्ठुरम् = निष्ठुर नहीं हो रहा है,
किं करोमि = क्या करूँ ! ।।३४ ।।

मन्त्र

मार्कण्डेय उवाच ।।३५ ।।

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ।।३६ ।।
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः।

पदच्छेद

मार्कण्डेयः उवाच ।।३५ ।।
ततः तौ सहितौ विप्र तम् मुनिम् सम् उपस्थितौ ।।३६ ।।
समाधिः नाम वैश्यः असौ स च पार्थिव-सत्तमः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

मार्कण्डेयः उवाच = मार्कण्डेय ऋषि बोले ।।३५।।
विप्र ! = हे ब्राह्मण !,
ततः = इसके पश्चात्,
ता = वे दोनों,
असौ समाधिः नाम = ये समाधि नामक,
वैश्यः = वैश्य,
स च पार्थिवेषु सत्तमः = तथा वे राजाओं में श्रेष्ठ सुरथ,
सहिता = एक साथ,
तं मुनिं समुपस्थितौ = उस सुमेधा मुनि के पास गये ।।३६।।

मन्त्र

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ।।३७।।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ।।३८।।

पदच्छेद

कृत्वा तु तौ यथा-न्यायम् यथा-अर्हम् तेन सम्-विदम् ।।३७।।
उप-विष्टौ कथाः काः चित् चक्रतुः वैश्यः पार्थिवः च ।।३८।।

अन्वित-पदार्थ

तौ = उन दोनों,
वैश्यः च पार्थिवः च = वैश्य और राजा ने,
तेन = मुनि के साथ,
यथा-न्यायं = समुचित,
यथा अर्हं = एवं अवसर के अनुकूल,
संविदम् कृत्वा = बातें करके,
तु उपविष्टा = वहीं बैठ कर,
काः चित् कथाः = कुछ चर्चा,
चक्रतुः = करने लगे ।।३७-३८।।

मन्त्र

राजोवाच ।।३९।।
भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ।।४०।।
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ।

पदच्छेद

राजा उवाच ।।३९।।
भगवन् त्वाम् अहम् प्रष्टुम् इच्छामि एकम् वदस्व तत् ।।४०।।
दुःखाय यत् मे मनसः स्व-चित्त-आयत्तताम् विना ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

राजा उवाच = राजा बोले ।।३९ ।।
भगवन् ! = हे भगवन् !,
अहम् = मैं,
त्वाम् = आपसे,
एकम् = एक बात,
प्रष्टुम् = पूछना,
इच्छामि = चाहता हूँ,
यत् मे मनसः = जो मेरे मन के,
दुःखाय = दुःख का कारण बना हुआ है,
स्वस्य = अपने,
चित्तस्य = चित्त का,
आयत्तताम् विना = संकोच छोड़कर,
तत् वदस्व = उस रहस्य को बताएँ ।।४० ।।

मन्त्र

ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ।।४१।।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ।

पदच्छेद

ममत्वम् गत (गतस्य) राज्यस्य राज्य (राज्यस्य) अङ्गेषु अखिलेषु अपि ।।४१ ।।
जानतः अपि यथा अ-ज्ञस्य किम् एतत् मुनि (मुनिषु) सत्-तम ।।४१ ।।

अन्वित-पदार्थ

मुनिसत्तम ! = हे मुनिश्रेष्ठ !,
जानतः = यह जानते हुए भी कि,
राज्यस्य = राज्य,
अपि = तथा,
अखिलेषु = सम्पूर्ण,
राज्याङ्गेषु = कोष अमात्य आदि, राज्य के सारे अङ्ग,
गतस्य = खो चुके हैं,
अज्ञस्य यथा = फिर भी मूर्ख के समान,
ममत्वम् = उन्हीं में ममता है,
किम् एतत् = क्या है यह ? ।।४१ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ।।४२ ।।
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ।

पदच्छेद

अयम् च निकृतः पुत्रैः दारैः भृत्यैः तथा उज्झितः ।।४२ ।।
स्व-जनेन च सम्-त्यक्तः तेषु हार्दी तथा अपि अति ।।४२ ।।

अन्वित-पदार्थ

अयं च = और यह वैश्य,
पुत्रैः = पुत्रों,
दारैः = पत्नियों,
भृत्यैः = नौकरों द्वारा,
निकृतः = अपमानित,
तथा उज्झितः = तिरस्कृत,
स्वजनेन च = एवं बन्धुजनों द्वारा,
संत्यक्तः = परित्यक्त है,
तथापि = फिर भी,
तेष = उनसे,
अतिहार्दी = अत्यन्त हार्दिक लगाव है ।।४२ ।।

मन्त्र

एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ।।४३ ।।

पदच्छेद

एवम् एषः तथा अहम् च द्वौ अपि अत्यन्त दुःखितौ ।।४३ ।।

अन्वित-पदार्थ

एवम् = इस प्रकार,
एषः तथा = यह वैश्य तथा,
अहम् च द्वौ अपि = मैं दोनों ही,
अत्यन्त दुःखितौ = अत्यन्त दुखी हैं ।।४३ ।।

मन्त्र

दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ।।४४ ।।

पदच्छेद

दृष्ट-दोषे अपि विषये ममत्व-आकृष्ट-मानसौ ।
तत् किम् एतत् महा-भाग यत् मोहः ज्ञानिनः अपि ।।४४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

महाभाग ! = हे महात्मन् !,
दृष्ट-दोषे अपि विषये = जिन विषयों में स्पष्ट रूप से दोष दिखाई देता है उनमें,
ज्ञानिनः अपि = ज्ञानी के भी,
ममत्वेन आकृष्ट-मानसौ = ममता के कारण मन आकृष्ट होते हैं,
तत् एतत् किम् = तो यह क्या है?
यत् मोहः = जो मोह कहा जाता है ।।४४ ।।

मन्त्र

ममास्य च भवत्येषा विवेकान्धस्य मूढता ।।४५ ।।

पदच्छेद

मम अस्य च भवति एषा विवेक (विवेकेन) अन्धस्य मूढता ।।४५ ।।

अन्वित-पदार्थ

विवेकेन अन्धस्य = विवेक शून्य होने के कारण,
मम = मेरा तथा,
अस्य च = इस वैश्य की,
एषा = यह,
मूढता = मूर्खता,
भवति = है ।।४५ ।।

मन्त्र

ऋषिरुवाच ।।४६ ।।
ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ।।४७ ।।
विषयश्च महाभाग याति चैवं पृथक् पृथक्।

पदच्छेद

ऋषिः उवाच ।।४६ ।।
ज्ञानम् अस्ति समस्तस्य जन्तोः विषये गोचरे ।।४७ ।।
विषयः च महा-भाग ! याति च एवम् पृथक् पृथक् ।

अन्वित-पदार्थ

ऋषिः उवाच = सुमेधा ऋषि बोले ।।४६ ।।
महाभाग ! = हे महानुभाव !,
अस्ति = होता है,
एवम् च = इस सामान्य ज्ञान के सामर्थ्य के कारण,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषयगोचरे ज्ञानम् = इन्द्रिय द्वारा ग्रहण होनेवाले विषयों शब्द-रूप-रस आदि ज्ञान, **समस्तस्य जन्तोः** = सभी जन्तुओं को, **विषयः** = विभिन्न जन्तु का विषय भी, **पृथक् पृथक्** = भिन्न भिन्न, **याति च** = हो जाता है ।।४७।।

मन्त्र

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ।।४८।।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ।

पदच्छेद

दिवा-अन्धाः (दिवसे अन्धाः) प्राणिनः
केचित् रात्रौ अन्धाः तथा अपरे ।।४८।।
केचित् दिवा तथा रात्रौ प्राणिनः तुल्य-दृष्टयः ।

अन्वित-पदार्थ

केचित् प्राणिनः = कुछ प्राणी, **दिवसे अन्धाः** = दिन में नहीं देख पाते, **तथा अपरे** = इसी प्रकार दूसरे, **रात्रौ अन्धाः** = रात में अन्धे होते हैं, **केचित् प्राणिनः** = कुछ प्राणी, **दिवा तथा रात्रा** = दिन तथा रात में, **केचित्** = कुछ, **तुल्य-दृष्टयः** = समान रूप से देख पाते हैं ।।४८।।

मन्त्र

ज्ञानिनो मनुजाः सत्यं किं तु ते न हि केवलम् ।।४९।।

पदच्छेद

ज्ञानिनः मनुजाः सत्यम् किम् तु ते न हि केवलम् ।।४९।।

अन्वित-पदार्थ

सत्यम् = यह सत्य है कि, **मनुजाः ज्ञानिनः** = मनुष्यगण ज्ञानी होते हैं, **किं तु केवलम् ते हि न** = किन्तु केवल वे मनुष्य ही ज्ञानी नहीं होते ।।४९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्।।५०।।

पदच्छेद

यतः हि ज्ञानिनः सर्वे पशु-पक्षि-मृग-आदयः।
ज्ञानम् च तत् मनुष्याणाम् यत् तेषाम्
मृग (मृगाणाम्) पक्षिणाम्।।५०।।

अन्वित-पदार्थ

यतः हि = क्योंकि,
सर्वे पशु-पक्षि-मृग-आदयः = सभी गाय आदि पशु पक्षी मृग आदि जङ्गली जन्तु,
ज्ञानिनः = रूप रस आदि विषयों के सम्बन्ध में ज्ञानी होते हैं,
यत् तेषा = उन,
मृगपक्षिणां ज्ञानम् = मृग पक्षी आदि में जिस स्तर का ज्ञान होता है,
तत् च मनुष्याणाम् = उसी स्तर का ज्ञान मनुष्यों में भी होता है।।५०।।

मन्त्र

मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः।
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु।।५१।।
कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा।

पदच्छेद

मनुष्याणाम् च यत् तेषाम् तुल्यम् अन्यत् तथा उभयोः।
ज्ञाने अपि सति पश्य एतान् पतङ्गान् शाव-चञ्चुषु।।५१।।
कण-मोक्ष (कणानाम् मोक्षेण)
आदृतान् मोहात् पीड्यमानान् अपि क्षुधा।

अन्वित-पदार्थ

तथा = इसी प्रकार,
उभयोः मनुष्याणाम् = मनुष्यों,
तेषाम् च = और पशुओं में,
मोहात् = मोह के कारण,
शावचञ्चुष = अपने बच्चों के चञ्चुओं में,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्यत् यत् तुल्यम् = अन्य भी समानताएँ हैं,
सति अपि ज्ञाने = ज्ञान होने पर भी,
क्षुधया पीड्यमानान् अपि = स्वयं भूख से व्याकुल होने पर भी,
कण-मोक्ष-आदृतान् = चारा डाल कर स्वयं को सम्मानितया सन्तुष्ट अनुभव कर रहे,
एतान् पतङ्गान् पश्य = इन पक्षियों को देखो ।।५१ ।।

मन्त्र

मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ।।५२ ।।
लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि ।

पदच्छेद

मानुषाः मनुज-व्याघ्र ! स-आभिलाषाः सुतान् प्रति ।।५२ ।।
लोभात् प्रति-उपकाराय ननु एतान् किम् न पश्यसि ।

अन्वित-पदार्थ

मनुजव्याघ्र ! = हे नरसिंह राजन् !,
किं न पश्यसि = क्या आप नहीं देखते कि,
ननु प्रत्युपकाराय = पितृऋण से मुक्ति के लिए,
मानुषाः लोभात् = लोभ से मनुष्य,
एतान् = इन्हीं,
सुतान् प्रति = पुत्रों के लिए,
साभिलाषाः = इच्छा करते हैं ।।५२ ।।

मन्त्र

तथापि ममतावर्ते मोहगर्ते निपातिताः ।।५३ ।।
महामायाप्रभावेण संसारस्थितिकारिणा ।

पदच्छेद

तथा-अपि ममता-आवर्ते मोह-गर्ते नि-पातिताः ।।५३ ।।
महा-माया-प्रभावेण संसार-स्थिति-कारिणा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तथापि = फिर भी,
महामायायाः = महामाया के,
संसार-स्थिति-कारिणा = संसार का पालन करने वाली शक्ति के,
प्रभावेण = प्रभाव से,
ममताया = ममता के,
आवर्त्ते = बवण्डर में,
मोहस्य गर्ते = मोह के गड्ढे में,
निपातिताः = गिरा दिए जाते हैं।।५३।।

मन्त्र

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः।।५४।।
महामाया हरेश्चैषा तया सम्मोह्यते जगत्।

पदच्छेद

तत् न अत्र वि-स्मयः कार्यः योग-निद्रा जगत्-पतेः।।५४।।
महा-माया हरेः च एषा तया सम्-मोह्यते जगत्।

अन्वित-पदार्थ

तत् = अतः,
अत्र = इस प्रकार का,
विस्मयः = आश्चर्य,
न कार्यः = नहीं करना चाहिए,
जगत्पतेः = क्योंकि भगवान्,
हरेः च = श्री हरि की,
एषा महामाया = यह महामाया,
योगनिद्रा = योग निद्रा है,
तया = उन्हीं के द्वारा,
जगत् = संसार,
सम्मोह्यते = सम्मोहित किया जाता है।।५४।।

मन्त्र

ज्ञानिनामपि चेतांसि देवी भगवती हि सा।।५५।।
बलादाकृष्य मोहाय महामाया प्रयच्छति।

पदच्छेद

ज्ञानिनाम् अपि चेतांसि देवी भगवती हि सा।।५५।।
बलात् आकृष्य मोहाय महा-माया प्र-यच्छति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सा = वही,
देवी = तेजोमयी,
भगवती = भगवती,
महामाया = महामाया,
हि ज्ञानिनाम् = ज्ञानियों के,
अपि चेतांसि = भी चित्त को,
बलात् = बलपूर्वक,
आकृष्य = खींच कर,
मोहाय = मोहग्रस्त,
प्रयच्छति = कर देती हैं।।५५।।

मन्त्र

तया विसृज्यते विश्वं जगदेतच्चराचरम्।।५६।।
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये।

पदच्छेद

तया वि-सृज्यते विश्वम् जगत् एतत् चराचरम्।।५६।।
सा एषा प्र-सन्ना वर-दा नृणाम् भवति मुक्तये।

अन्वित-पदार्थ

तया = उन्हीं के द्वारा,
एतत् = यह,
विश्वम् = सम्पूर्ण,
चराचरम् = जडचेतनमय,
जगत् = संसार,
विसृज्यते = नष्ट किया जाता है,
सा एषा = वह,
प्रसन्ना = यदि प्रसन्न हों तो,
नृणाम् = मनुष्यों की,
मुक्तय = मुक्ति के लिए,
वरदा = वर देने वाली,
भवति = होती हैं।।५६।।

मन्त्र

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी।।५७।।

पदच्छेद

सा विद्या परमा मुक्तेः हेतु-भूता सनातनी।।५७।।

अन्वित-पदार्थ

सा = वह,
सनातनी = तीनों कालों में वर्तमान,
विद्या = पराशक्ति,
मुक्तेः = मुक्ति की,
परमा = सर्वोच्च,
हेतुभूता = कारण हैं।।५७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ।।५८ ।।

पदच्छेद

संसार (संसारे) बन्ध-हेतुः च सा एव सर्व-ईश्वर-ईश्वरी ।।५८ ।।

अन्वित-पदार्थ

सा एव च = वही,
सर्व-ईवरस्य = सब के स्वामी भगवान् की,
ईश्वरी = भी स्वामिनी,
संसारे = संसार में,
बन्धहेतुः = मोह आदि बन्धन की कारण हैं ।।५८ ।।

मन्त्र

राजोवाच ।।५९ ।।

भगवन् का हि सा देवी महामायेति यां भवान् ।।६० ।।
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।

पदच्छेद

राजा उवाच ।।५९ ।।
भगवन् का हि सा देवी महा-माया इति याम् भवान् ।
ब्रवीति कथम् उत्पन्ना सा कर्म अस्याः च किम् द्विज ।।६० ।।

अन्वित-पदार्थ

राजा उवाच = राजा ने पूछा ।।५९ ।।
भगवन् ! = हे भगवन् !,
यां भवान् = जिसे आप,
महामाया इति = महामाया नाम से,
ब्रवीति = सम्बोधित कर रहे हैं,
सा देवी = वे देवी,
का हि = कौन हैं,
द्विज ! = हे ब्राह्मण !,
सा कथम् उत्पन्ना = कैसे उत्पन्न हुईं ?,
अस्याः कर्म च किम् = और उनके कार्य क्या हैं ? ।।६० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ।।६१ ।।
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ।।६२ ।।

पदच्छेद

यत् प्र-भावा च सा देवी यत् स्वरूपा यत् उद्-भवा ।।६१ ।।
तत् सर्वम् श्रोतुम् इच्छामि त्वत्-तः ब्रह्म-विदाम्-वर ! ।।६२ ।।

अन्वित-पदार्थ

ब्रह्मविदांवर ! = हे ब्रह्मज्ञानियों में श्रेष्ठ मुनिवर !,
सा देवी = उस देवी का,
यत् प्रभावा = जो प्रभाव है,
यत् स्वरूपा = उनका जो स्वरूप है,
यत् उद्भवा च = और वे जैसे उत्पन्न हुईं,
तत् सर्वं = वह सब मैं,
त्वत्तः = आप से,
श्रोतुम् इच्छामि = सुनना चाहता हूँ ।।६१-६२ ।।

मन्त्र

ऋषिरुवाच ।।६३ ।।
नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ।।६४ ।।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।

पदच्छेद

ऋषिः उवाच ।।६३ ।।
नित्या एव सा जगत् मूर्तिः तया सर्वम् इदम् ततम् ।।६४ ।।
तथा अपि तत् सम-उत्पत्तिः बहुधा श्रूयताम् मम ।

अन्वित-पदार्थ

ऋषिरुवाच = सुमेधा ऋषि बोले ।।६३ ।।
सा = वह,
जगत् मूर्तिः = जगत् रूपिणी भगवती,
तया = उन्हीं से,
ततम् = व्याप्त है,
तथापि = फिर भी,
तत् समुत्पत्तिः = उनकी उत्पत्ति का,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्या एव = सदा वर्तमान रहती हैं,
इदं सव = यह सब कुछ,
बहुधा = अनेक आख्यान,
मम श्रूयताम् = मुझसे सुनिए।।६४।।

मन्त्र

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।।६५।।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते।

पदच्छेद

देवानाम् कार्य (कार्यस्य) सिद्ध्यर्थम् आविः-भवति सा यदा ।।६५।।
उत्पन्ना इति तदा लोके सा नित्यापि (नित्या अपि) अभि-धीयते।

अन्वित-पदार्थ

यदा = जब,
सा = वह,
देवानाम् = देवताओं के,
कार्य-सिद्ध्यर्थम् = कार्य की सिद्धि के लिए,
आविर्भवति = अवतार लेती हैं,
तदा = तब,
लोके = संसार में,
सा = उन्हें,
नित्या अपि = नित्या होने पर भी,
सा = वह,
उत्पन्ना इति = 'उत्पन्न हुई' ऐसा,
अभि-धीयते = कहते हैं।।६५।।

मन्त्र

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।।६६।।
आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः।

पदच्छेद

योग-निद्राम् यदा विष्णुः जगति एक-अर्णवी-कृते ।।६६।।
आ-स्तीर्य शेषम् अभजत् कल्प-अन्ते भगवान् प्रभुः।

अन्वित-पदार्थ

यदा = जब,
प्रभुः = सब के स्वामी,
एकार्णवीकृते जगति = संसार को समुद्र मात्र बना कर,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भगवान् = भगवान्,
विष्णुः = विष्णु,
कल्पान्त = कल्प के अन्त में,
शेषम् = शेष को,
आस्तीर्य = बिछा कर,
योगनिद्राम् = योगनिद्रा का,
अभजत् = सेवन कर रहे थे ।।६६ ।।

मन्त्र

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।।६७ ।।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ।

पदच्छेद

तदा द्वौ अ-सुरौ घोरौ वि-ख्यातौ मधु-कैटभौ ।।६७ ।।
विष्णु-कर्ण (विष्णोः कर्णस्य) मलाद् उत्-भूतौ
हन्तुम् ब्रह्माणम् उद्यतौ ।

अन्वित-पदार्थ

तदा = तब,
द्वा = दो,
विष्णुकर्णमलोद्भूतौ = विष्णु के कान के मल से उत्पन्न,
घोरौ = विकट,
मधुकैटभौ = मधुकैटभ नाम से,
विख्यातौ = विख्यात,
असुरौ = राक्षस,
ब्रह्माणम् = ब्रह्मा को,
हन्तुम् = मारने के लिए,
उद्यता = उद्यत हुए ।।६७ ।।

मन्त्र

स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ।।६८ ।।
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ।

पदच्छेद

स नाभि (नाभेः) कमले विष्णोः स्थितः ब्रह्मा प्रजापतिः ।।६८ ।।
दृष्ट्वा तौ असुरौ च उग्रौ प्र-सुप्तम् च जन-अर्दनम् ।

अन्वित-पदार्थ

विष्णोः = विष्णु की,
नाभेः = नाभि के,
जनार्दनम् = जनार्दन विष्णु को,
प्रसुप्तम् = सोया,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कमले = कमल में,
सः = वह,
प्रजापतिः = प्रजापति,
ब्रह्मा = ब्रह्मा,
स्थितः = विराजमान थे,
च = तथा,
तौ च = उन दोनों,
उग्रौ = विकट,
असुरा = राक्षसों को,
दृष्ट्वा = देखकर ।।६८।।

मन्त्र

तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ।।६९।।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।

पदच्छेद

तुष्टाव योग-निद्राम् ताम् एक-अग्रेण हृदयेन स्थितः ।।६९।।
वि-बोधन-अर्थाय हरेः हरि-नेत्र (हरेः नेत्रयोः) कृत-आ-लयाम् ।

अन्वित-पदार्थ

एकाग्रेण = एकाग्र,
हृदयेन = हृदय से,
स्थितः = स्थित होकर,
हरेः = श्रीविष्णु को,
विबोधनार्थाय = जगाने के लिए,
हरेः = श्रीहरि के,
नेत्रयोः = नेत्रों में,
कृतालयाम् = निवास स्थान बनाई हुई,
ताम् = उस,
योगनिद्राम् = योगनिद्रा को,
तुष्टाव = प्रसन्न करने लगे ।।६९।।

मन्त्र

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।।७०।।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ।।७१।।

पदच्छेद

विश्वेश्वरीम् जगत्-धात्रीम् स्थिति-सम्-हार-कारिणीम् ।।७०।।
निद्राम् भगवतीम् विष्णोः अ-तुलाम् तेजसः प्रभुः ।।७१।।

अन्वित-पदार्थ

भगवतीम् = भगवती,
विश्वेश्वरीम् = विश्व की
तेजसः = शक्ति से,
स्थितेः = संसार की स्थिति,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वामिनी,
जगद्धात्रीम् = जगत् का पालन करने वाली,
प्रभुः = भगवान्,
विष्णोः = श्रीविष्णु की,
संहारस्य = तथा संहार,
कारिणीम् = करने वाली,
अतुलाम् = अनुपम शक्ति,
निद्राम् = निद्रा देवी की स्तुति करने लगे ।।७१ ।।

मन्त्र

ब्रह्मोवाच ।।७२ ।।

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।।७३ ।।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ।

पदच्छेद

ब्रह्मा उवाच ।।७२ ।।
त्वम् स्वाहा त्वम् स्वधा त्वम् हि वषट्-कारः स्वर-आत्मिका ।।७३ ।।
सुधा त्वम् अ-क्षरे नित्ये त्रिधा मात्रा-आत्मिका स्थिता ।

अन्वित-पदार्थ

ब्रह्मा उवाच = ब्रह्मा जी बोले ।।७२ ।।
त्वम् = आप,
स्वाहा = स्वाहा, देवताओं की तर्पिका,
त्वम् = आप ही,
स्वधा = स्वधा, पितर-तर्पिका,
त्वम् हि = आप,
वषट्कारः = वषट् ध्वनि हैं,
स्वरात्मिका = तथा स्वररूपिणी हैं,
त्वम् सुधा = आप अमृत हैं,
अक्षरे = हे भगवती !,
नित्य = नित्य,
त्रिधा मात्रात्मिका = अक्षर ओम में तीन मात्रा के रूप में,
स्थिता = विराजमान हैं ।।७३ ।।

मन्त्र

अर्धमात्रास्थिता नित्या याऽनुच्चार्या विशेषतः ।।७४ ।।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

अर्ध-मात्रा-स्थिता नित्या या अन्-उत्-चार्या वि-शेषतः ।।७४।।
त्वम् एव सन्ध्या सावित्री त्वम् देवि जननी परा।।७४।।

अन्वित-पदार्थ

या = जो,
नित्या = नित्य हैं,
विशेषतः = विशेष रूप से,
अनुच्चाया = वाणी से नहीं बताई जा सकती हैं,
अर्धमात्रास्थिता = क्योंकि अर्धमात्रा ध्वनि रूप हैं,
त्वम् एव = आप ही,
सावित्री = सविता की शक्ति,
सन्ध्या = सन्ध्या,
त्वम् देवि = हे देवि आप ही,
परा = सर्वोच्च,
जननी = माता हैं।।७४।।

मन्त्र

त्वयैतद् धार्यते विश्वं त्वयैतत् सृज्यते जगत्।।७५।।
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा।

पदच्छेद

त्वया एतद् धार्यते विश्वम् त्वया एतत् सृज्यते जगत्।।७५।।
त्वया एतत् पाल्यते देवि त्वम् अत्सि अन्ते च सर्वदा।

अन्वित-पदार्थ

देवि = हे देवि,
सर्वदा = सदा,
त्वया = आपके द्वारा,
एतद् विश्वम् धार्यते = यह विश्व धारण किया जाता है,
त्वया एतत् जगत् = आपके द्वारा यह विश्व,
सृज्यते = निर्मित होता है,
त्वया एतत् पाल्यते = आपके द्वारा इसका पालन होता है,
त्वम् च अन्त = आप ही अन्त में,
अत्सि = इसका भक्षण करती हैं।।७५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।।७६ ।।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।

पदच्छेद

विसृष्टौ सृष्टि-रूपा त्वम् स्थिति-रूपा च पालने। तथा संहृति-रूपा अन्ते जगतः अस्य जगत्-मये ।।७६ ।।

अन्वित-पदार्थ

जगन्मये ! = हे जगद्रूपिणी भगवती !,
त्वम् = आप,
अस्य जगतः = इस संसार के,
विसृष्टा = रचना काल में,
सृष्टिरूपा = सृष्टि रूपिणी,
पालने च = पालन करते समय,
स्थितिरूपा = स्थिति रूप में,
तथा अन्ते संहृतिरूपा = इसी प्रकार अन्त में संहाररूपिणी होती हैं ।।७६ ।।

मन्त्र

महाविद्या महामाया महामेधा महास्मृतिः ।।७७ ।।
महामोहा च भवती महादेवी महासुरी ।

पदच्छेद

महा-विद्या महा-माया महा-मेधा महा-स्मृतिः। महा-मोहा च भवती महा-देवी महा-सुरी।

अन्वित-पदार्थ

भवती = आप ही,
महाविद्या = परम ज्ञान की हेतु,
महामाया = महती माया,
महामेधा = सर्वोच्च धारणात्मिका शक्ति,
महास्मृतिः = परम स्मृति,
महामोहा = महा मोहरूपिणी,
महादेवी = परम तेजस्विनी,
महासुरी च = और परम देवरूपिणी हैं ।।७७ ।।

मन्त्र

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।।७८ ।।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

प्रकृतिः त्वम् च सर्वस्य गुण-त्रय (गुणत्रयस्य) वि-भाविनी ।।७८।।
काल-रात्रिः महा-रात्रिः मोह-रात्रिः च दारुणा।

अन्वित-पदार्थ

त्वम् च = और आप,
सर्वस्य = सभी की,
गुणत्रयस्य = तीनों गुणों की,
विभाविनी = व्यवस्था करने वाली,
प्रकृतिः = मूल प्रकृति हैं,
कालरात्रिः = आप कालरात्रि,
महारात्रिः = महारात्रि,
दारुणा च मोहरात्रिः = तथा दारुण मोहरात्रि हैं।।७८।।

मन्त्र

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।।७९।।
लज्जापुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च।

पदच्छेद

त्वम् श्रीः त्वम् ईश्वरी त्वम् ह्रीः त्वम् बुद्धिः बोध-लक्षणा।।७९।।
लज्जा पुष्टिः तथा तुष्टिः त्वम् शान्तिः क्षान्तिः एव च।

अन्वित-पदार्थ

त्वम् = आप,
श्रीः = लक्ष्मी हैं,
त्वम् = आप,
ईश्वरी = स्वामिनी हैं,
त्वम् = आप,
ह्रीः = माया है,
त्वम् = आप,
बोधलक्षणा = बोधरूपा,
बुद्धिः = बुद्धि हैं,
लज्जा, पुष्टिः = लज्जा, पोषण करने वाली,
तथा तुष्टिः = और सन्तुष्टि,
त्वम् एव च = आप ही,
शान्तिः = शान्ति,
क्षान्तिः = एवं सहनशक्ति हैं।।७९।।

मन्त्र

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।।८०।।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।।८० ।।
शङ्खिनी चापिनी बाण-भुशुण्डी-परिघ-आयुधा ।।८० ।।

अन्वित-पदार्थ

खड्गिनी = आप खड्गधारिणी,
शूलिनी = शूलधारिणी,
घोरा = विकट,
गदिनी = गदाधारिणी,
चक्रिणी = चक्रधारिणी,
तथा शङ्खिनी = इसी प्रकार शंख,
चापिनी = धनुषधारिणी,
बाणभुशुण्डीपरिघायुधा = बाण भुशुण्डी तथा परिघ नामक शस्त्र-अस्त्र धारण करती हैं ।।८० ।।

मन्त्र

सौम्या सौम्यतराऽशेषसौम्येभ्यस्त्वतिसुन्दरी ।।८१ ।।
परापराणां परमा त्वमेव परमेश्वरी ।

पदच्छेद

सौम्या सौम्य-तरा अशेष-सौम्येभ्यः तु अति-सुन्दरी ।।८१ ।।
पर-अपराणाम् परमा त्वम् एव परमेश्वरी ।

अन्वित-पदार्थ

परमेश्वरी = हे परमेश्वरी आप,
सौम्या = शीतल मूर्ति,
सौम्यतरा = किसी भी अन्य सौम्य वस्तु से अधिक सौम्य,
अशेषसौम्येभ्यः त = सभी आनन्द रूप मूर्तियों में सबसे अधिक सौम्य,
अतिसुन्दरी = अतिसुन्दरी,
परापराणाम् = पर तथा अपर में,
परमा = परमा उत्तम,
त्वम् एव = आप ही हैं ।।८१ ।।

मन्त्र

यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाऽखिलात्मिके।। ८२ ।।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

यत् च किञ्चित् क्व-चित् वस्तु सद् असद् वा
अखिल-आत्मिके ।।८२।।
तस्य सर्वस्य या शक्तिः सा त्वम् किम् स्तूयसे तदा।

अन्वित-पदार्थ

अखिलात्मिके = हे सर्व रूपिणी,
यत् च किञ्चित्क्वचिद् = जो कुछ कहीं,
वस्तु = पदार्थ है,
सत् असत् वा = वह सत् हो या असत्,
तस्य सर्वस्य = उन सबकी,
या शक्तिः = जो शक्ति है,
सा त्वम् = वह आप ही हैं,
तदा किम् स्तूयसे = तो फिर आपकी कैसे स्तुति की जाए ? ।।८२।।

मन्त्र

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।।८३।।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः।

पदच्छेद

यया त्वया जगत् स्रष्टा जगत् पाति अत्ति यः जगत् ।।८३।।
सः अपि निद्रा-वशम् नीतः कः त्वाम् स्तोतुम् इह ईश्वरः।

अन्वित-पदार्थ

यया = जिन,
त्वया = आप के द्वारा,
जगत् स्रष्टा = संसार के रचयिता,
जगत् पाति = संसार का पालन करते हैं,
अत्ति यः जगत् = तथा संसार का नाश करते हैं,
सः अपि = वह भी,
निद्रायाः = निद्रा के,
वशं नीतः = वश मे ले जाए गए हैं,
इह त्वाम् स्तोतुम् = इस अवस्था में आपकी स्तुति करने के लिए,
कः ईश्वरः = कौन समर्थ है ।।८३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

विष्णुः शरीरग्रहणमहमीशान एव च ।।८४।।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ।

पदच्छेद

विष्णुः शरीरग्रहणम् अहम् ईशानः एव च ।।८४।।
कारिताः ते यतः अतः त्वाम् कः स्तोतुम् शक्ति-मान् भवेत् ।

अन्वित-पदार्थ

यतः = क्योंकि,
अहम् = मैं,
विष्णुः = विष्णु,
ईशानः च = और शिव,
ते एव = तीनों ही आपके आदेश पर,
शरीरग्रहणम् = देह धारण,
कारिताः = कराए गए हैं,
अतः त्वाम् = इसलिए आपकी,
स्तोतुम् = स्तुति करने में,
कः शक्तिमान् भवेत् = कौन समर्थ हो सकता है ।।८४।।

मन्त्र

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।।८५।।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ।

पदच्छेद

सा त्वम् इत्थम् प्रभावैः स्वैः उदारैः देवि संस्तुता ।।८५।।
मोहय एतौ दुर्-आधर्षौ अ-सुरौ मधु-कैटभौ ।

अन्वित-पदार्थ

देवि = हे भगवती,
सा त्वम् = ऐसी महिमामयी आप,
स्वैः उदारैः = अपने उदार स्वभाव के,
प्रभावैः = फलस्वरूप,
इत्थम् संस्तुता = इस रूप में प्रार्थना किये जाने पर,
एतौ दुराधर्षौ = इन दोनों अजेय,
असुरा = राक्षसों,
मधुकैटभा = मधु और कैटभ को,
मोहय = मोहित करें ।।८५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।।८६।।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ।।८७।।

पदच्छेद

प्र-बोधम् च जगत्-स्वामी नीयताम् अच्युतः लघु ।।८६।।
बोधः च क्रियताम् अस्य हन्तुम् एतौ महा-सुरौ ।।८७।।

अन्वित-पदार्थ

जगतः स्वामी अच्युतः = हे भगवती ! जगदीश्वर विष्णु,
लघु = तत्काल,
प्रबोधम् च = आपके द्वारा निद्रा विहीन,
नीयताम् = हो जाएँ,
अस्य = इन,
एतौ महासुरौ = दोनों,
हन्तुम् बोधः च = महा राक्षसों का वध करने का बोध,
क्रियताम् = भाव उत्पन्न करें ।।८६-८७।।

मन्त्र

ऋषिरुवाच ।।८८।।
एवं स्तुता तदा देवी तामसी तत्र वेधसा ।।८९।।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ।

पदच्छेद

ऋषिः उवाच ।।८८।।
एवम् स्तुता तदा देवी तामसी तत्र वेधसा ।।८९।।
विष्णोः प्रबोधन-अर्थाय नि-हन्तुम् मधु-कैटभौ ।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।८८।।
तदा तत्र = उस समय वहाँ,
तामसी देवी = तमोगुण प्रधाना देवी,
विष्णोः = विष्णु को,
प्रबोधनार्थाय = जगाने के लिए,
मधुकैटभौ निहन्तुम् = मधुकैटभ के संहार के लिए,
वेधसा = ब्रह्मा के द्वारा,
एवम् स्तुता = इस प्रकार प्रार्थित हुईं ।।८९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ।।९० ।।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ।

पदच्छेद

नेत्रा-अस्य-नासिका-बाहु-हृदयेभ्यः तथा उरसः ।।९० ।।
निर्-गम्य दर्शने तस्थौ ब्रह्मणः अ-व्यक्त-जन्मनः ।

अन्वित-पदार्थ

नेत्राभ्याम् = आँखों से,
आस्यात् = मुख से,
नासिकाभ्याम् = दोनों नासिका रन्ध्रों से,
बाहुभ्याम् = दोनों भुजाओं से,
हृदयेभ्यः = हृदय भाग से,
तथा उरसः = इसी प्रकार जाँघों से,
निर्गम्य = निकल कर,
अव्यक्त-जन्मनः = अज्ञात जन्मा,
ब्रह्मणः = ब्रह्म के,
दर्शने = दृष्टि पथ पर,
तस्था = विराजमान हो गईं ।।९० ।।

मन्त्र

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ।।९१ ।।
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ।

पदच्छेद

उत्तस्थौ च जगत्-नाथः तया मुक्तः जनार्दनः ।।९१ ।।
एक-अर्णवे अहि-शयनात् ततः सः ददृशे च तौ ।

अन्वित-पदार्थ

तया च = योगनिद्रा से,
मुक्तः = मुक्त होने पर,
जगन्नाथः जनार्दनः = जगदीश भगवान् विष्णु,
एकार्णवे = जलप्लावन की अवस्था में,
अहिशयनात् = शेष शैय्या से,
उत्तस्था = उठे,
ततः च सः = उसके बाद उन्होंने,
तौ ददृश = उन दोनों को देखा ।।९१ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ।।९२ ।।
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ।

पदच्छेद

मधु-कैटभौ दुर्-आत्मानौ अति-वीर्य-पराक्रमौ ।।९२ ।।
क्रोधेन रक्त-ईक्षणौ अत्तुम् ब्रह्माणम् जनित-उद्यमौ ।

अन्वित-पदार्थ

दुरात्मानौ = दुष्ट,
अतिवीर्यपराक्रमा = अत्यन्त बली एवं पराक्रमी,
क्रोधरक्तेक्षणौ = क्रोध से लाल आँखों वाले,
ब्रह्माणम् अत्तुम् = ब्रह्मा को खा जाने के लिए,
जनित-उद्यमा = प्रयत्नशील,
मधुकैटभौ ददृश = मधुकैटभ को देखा ।।९२ ।।

मन्त्र

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ।।९३ ।।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ।

पदच्छेद

सम्-उत्थाय ततः ताभ्याम् युयुधे भगवान् हरिः ।।९३ ।।
पञ्च-वर्ष-सहस्राणि बाहु-प्रहरणः विभुः ।

अन्वित-पदार्थ

ततः = इसके बाद,
विभुः = व्यापक रूप,
भगवान् हरिः = भगवान् श्रीहरि ने,
समुत्थाय = योगनिद्रा से उठ कर,
ताभ्याम् = उन दोनों से,
पञ्चवर्षसहस्राणि = पाँच हजार वर्ष तक,
बाहुप्रहरणः = बाहुयुद्ध,
युयुध = किया ।।९३ ।।

मन्त्र

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।।९४ ।।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ।।९५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तौ अपि अति बलेन उन्-मत्तौ महा-माया-विमोहितौ ।।९४।।
उक्तवन्तौ वरः अस्मत् तः व्रियताम् इति केशवम् ।।९५।।

अन्वित-पदार्थ

महामायाविमोहितौ = महामाया के प्रभाव से विमूढ,
अति बलेन = अत्यन्त बल के कारण,
उन्मतौ = पगलाए,
तौ अपि = वे दोनों भी,
अस्मत्तः = "हमसे,
वरः व्रियताम् इति = वर माँगो" ऐसा,
केशवम् उक्तवन्तौ = श्रीविष्णु से बोले ।।९४-९५।।

मन्त्र

श्रीभगवानुवाच ।।९६।।
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ।।९७।।
किमन्येन वरेणात्र एतावद्धि वृतं मम ।।९८।।

पदच्छेद

श्रीभगवान् उवाच।।९६।।
भवेताम् अद्य मे तुष्टौ मम वध्यौ उभौ अपि ।।९७।।
किम् अन्येन वरेण अत्र एतावद् हि वृतम् मम ।।९८।।

अन्वित-पदार्थ

श्रीभगवान् उवाच = श्रीभगवान् बोले ।।९६।।
मे तुष्टा = यदि मुझसे सन्तुष्ट हो,
उभौ अपि = तो दोनों,
अद्य मम वध्यौ = आज मेरे वध्य,
भवेताम् = हो जाओ,
अत्र अन्येन वरेण किम् = इस अवसर पर किसी अन्य वर से क्या काम,
मम एतावद् हि वृतम् = मैं बस इतना ही वर माँगता हूँ।।९७-९८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ऋषिरुवाच ।।९९ ।।

वञ्चिताभ्यामिति मे तदा सर्वमापोमयं जगत् ।।१०० ।।

विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ।

पदच्छेद

ऋषिः उवाच ।।९९ ।।

वञ्चिताभ्याम् इति मे तदा सर्वम् आपः मयम् जगत् ।।१०० ।।

वि-लोक्य ताभ्याम् गदितः भगवान् कमल-ईक्षणः ।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।९९ ।।

तदा म = उस समय मेरे प्रभाव से,

वञ्चिताभ्याम् ताभ्याम् = मुग्ध बनाए गए वे दोनों,

सर्वम् जगत् = पूरे संसार को,

आपोमयम् विलोक्य = जलमग्न देख कर,

भगवान् कमलेक्षणः = भगवान् कमलनयन के,

इति गदितः = इस प्रकार बोलने पर ।।१०० ।।

मन्त्र

आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ।।१०१ ।।

पदच्छेद

आवाम् जहि न यत्र उर्वी सलिलेन परिप्लुता ।।१०१ ।।

अन्वित-पदार्थ

यत्र उर्वी = उन दोनों ने कहा जहाँ पृथ्वी,

सलिलेन = जल से,

न परिप्लुता = डूबी हुई न हो,

आवाम् जहि = वहाँ हम दोनों को मारो ।।१०१ ।।

मन्त्र

ऋषिरुवाच ।।१०२ ।।

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।

कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ।।१०३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ऋषिः उवाच ।।१०२।।

तथा इति उक्त्वा भगवता शङ्ख-चक्र-गदाभृता।

कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ।।१०३।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१०२।।

तथा इति उक्त्वा = "ठीक है" बोल कर,

शङ्ख-चक्र-गदाभृता = शंख-चक्र-गदाधारी,

भगवता = भगवान् द्वारा,

तयोः शिरसी = दोनों के शिर,

जघने कृत्वा = अपने जंघों पर रख कर,

चक्रेण वै च्छिन्ने = चक्र से काट दिए गए ।।१०३।।

मन्त्र

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम्।

प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ।।१०४।।

पदच्छेद

एवम् एषा सम्-उत्पन्ना ब्रह्मणा सम्-स्तुता स्वयम्।

प्र-भावम् अस्या देव्याः तु भूयः शृणु वदामि ते ।।१०४।।

अन्वित-पदार्थ

एवम् = इस प्रकार,

ब्रह्मणा संस्तुता = ब्रह्मा द्वारा संस्तुत,

एषा = यह देवी,

स्वयम् समुत्पन्ना = स्वयं ही उत्पन्न है,

अस्या देव्याः = इस देवी के,

भूयः प्रभावम् तु = और भी इनके प्रभाव को,

ते वदामि शृणु = आपको बताता हूँ सुनिए ।।१०४।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवधोनाम प्रथमोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। द्वितीयोऽध्यायः ।।

मन्त्र

ऋषिरुवाच ।। १ ।।

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणामधिपे देवानां च पुरन्दरे ।। २ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।
देवासुरम् अभूत् युद्धम् पूर्णम् अब्द-शतम् पुरा ।
महिषे अ-सुराणाम् अधिपे देवानाम् च पुरन्दरे ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले।।१ ।।
पुरा = प्राचीन काल में,
देवानाम् = देवताओं के,
अधिप = राजा,
पुरन्दर = इन्द्र,
च = और,
असुराणाम् = असुरों के,
अधिप = राजा,
महिषे = महिष के नेतृत्व में,
देवासुरम् = देवासुर,
युद्धम् = संग्राम,
पूर्णम् = पूरे,
अब्दशतम् = एक सौ वर्ष तक,
अभूत् = हुआ था ।।२ ।।

मन्त्र

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ।।३ ।।

पदच्छेद

तत्र असुरैः महावीर्यैः देवानाम् सैन्यम् पराजितम् ।
जित्वा च सकलान् देवान् इन्द्रः अभूत् महिषासुरः ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तत्र = उस युद्ध में,
महावीर्यैः = महा बलशाली,
असुरैः = असुरों द्वारा,
देवानाम् = देवताओं की,
सैन्यम् = सेना,
पराजितम् = पराजित हुई,
सकलान् च = और समस्त,
देवान् = देवताओं को,
जित्वा = जीत कर,
महिषासुरः = महिषासुर,
इन्द्रः = इन्द्र,
अभूत् = बन गया ।।३ ।।

मन्त्र

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ।।४ ।।

पदच्छेद

ततः पराजिताः देवाः पद्मयोनिम् प्रजापतिम् ।
पुरःकृत्य गताः तत्र यत्र ईशगरुडध्वजौ ।।४ ।।

अन्वित-पदार्थ

ततः = पश्चात्,
पराजिताः = हारे हुए,
देवाः = देवगण,
पद्मयोनिम् = कमल से उत्पन्न,
प्रजापतिम् = ब्रह्मा को,
पुरःकृत्य = आगे करके,
यत्र = जहाँ,
ईशगरुडध्वजा = शिव एवं विष्णु थे,
तत्र = वहाँ,
गताः = गए ।।४ ।।

मन्त्र

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ।।५ ।।

पदच्छेद

यथा वृत्तम् तयोः तद् वत् महिषासुर (महिषासुरेण) चेष्टितम् ।
त्रिदशाः कथयामासुः देवाभिभवविस्तरम् ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तयोः = उन दोनों से,
त्रिदशाः = देवतागण,
महिषासुरेण = महिषासुर द्वारा किये गये,
चेष्टितम् = कर्म,
यथा वृत्तम् = जैसा था,
तद् वत् = उसी प्रकार,
देवानाम् = देवताओं के,
अभि-भवस्य = पराभव का,
विस्तरम् = विवरण,
कथयामासुः = सुनाया ।।५ ।।

मन्त्र

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।
अन्येषाञ्चाधिकारान् स स्वयमेवाधितिष्ठति ।।६ ।।

पदच्छेद

सूर्य-इन्द्र-अग्नि-अनिल-इन्दूनाम् यमस्य वरुणस्य च ।
अन्येषाम् च अधिकारान् सः स्वयम् एव अधितिष्ठति ।।६ ।।

अन्वित-पदार्थ

सः = वह महिष,
सूर्य-इन्द्र-अग्नि-अनिल-इन्दूनाम् = सूर्य, इन्द्र, अग्नि, वायु, चन्द्रमा के,
यमस्य = यम के,
वरुणस्य = वरुण के,
अन्येषाम् च = और अन्य देवों के,
अधिकारान् = अधिकारों को,
च = भी,
स्वयम् = स्वयं,
एव = ही,
अधितिष्ठति = कब्जा किये हुए है ।।६ ।।

मन्त्र

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना ।।७ ।।

पदच्छेद

स्वर्गात् निराकृताः सर्वे तेन देवगणाः भुवि ।
विचरन्ति यथा मर्त्याः महिषेण दुरात्मना ।।७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तेन = उस,
दुरात्मना = दुष्ट,
महिषेण = महिष द्वारा,
स्वर्गात् = स्वर्ग से,
निराकृताः = निकाले गये,
सर्वे देवगणाः = सभी देवगण,
यथा मर्त्याः = मनुष्यों की भाँति,
भुवि = धरती पर,
विचरन्ति = विचरण कर रहे हैं ।।७।।

मन्त्र

एतद्वः कथितं सर्वममरारिविचेष्टितम् ।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ।।८।।

पदच्छेद

एतत् वः कथितम् सर्वम् अमरारिविचेष्टितम् ।
शरणम् वः प्रपन्नाः स्मः वधः तस्य विचिन्त्यताम् ।।८।।

अन्वित-पदार्थ

एतत् = यह,
सर्वम् = सब,
अमरारिविचेष्टितम् = देवताओं के शत्रु की करनी हमने,
वः = आप दोनों को,
कथितम् = बताया है,
वः = आप दोनों के,
शरणम् = शरण में,
प्रपन्नाः = पड़े,
स्मः = हैं,
तस्य = कृपया उसके,
वधः = वध के विषय में,
विचिन्त्यताम् = विचार कीजिए ।।८।।

मन्त्र

इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ।।९।।

पदच्छेद

इत्थम् निशम्य देवानाम् वचांसि मधुसूदनः ।
चकार कोपम् शम्भुः च भ्रु-कुटी-कुटिल-आननौ ।।९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

देवानाम् = देवताओं के,
इत्थम् = इस प्रकार के,
वचांसि = वचन को,
निशम्य = सुन कर,
भ्रु-कुटी-कुटिल-आननौ = टेढ़ी भौहों से युक्त मुख वाले,
मधुसूदनः = मधु नामक दैत्य के विनाशक विष्णु,
शम्भुः च = एवं शिव ने,
कोपम् = क्रोध,
चकार = किया ।।९।।

मन्त्र

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ।।१०।।

पदच्छेद

ततः अतिकोपपूर्णस्य चक्रिणः वदनात् ततः ।
निः चक्राम महत् तेजः ब्रह्मणः शङ्करस्य च ।।१०।।

अन्वित-पदार्थ

ततः = इसके बाद,
अतिकोपपूर्णस्य = अत्यन्त कोप से भरे हुए,
चक्रिणः = चक्रधारी विष्णु,
ततः = उसके बाद,
ब्रह्मणः = ब्रह्मा,
शङ्करस्य = शंकर के,
वदनात् च = मुख से भी,
महत् तेजः = विशाल तेज,
निः चक्राम = निकला ।।१०।।

मन्त्र

अन्येषां चैव देवानां शक्रादीनां शरीरतः ।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ।।११।।

पदच्छेद

अन्येषाम् च एव देवानाम् शक्रादीनाम् शरीरतः ।
निर्गतम् सुमहत् तेजः तत् च ऐक्यम् समगच्छत ।।११।।

अन्वित-पदार्थ

च अन्येषाम् = और अन्य सभी,
सुमहत् = सुमहान्,
तेजः = तेज निकला,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्रादीनाम् = इन्द्र आदि,
देवानाम् = देवताओं के,
शरीरतः एव = शरीर से ही,
निर्गतम् तत् च = और वह सम्पूर्ण तेज,
ऐक्यम् = संघटित होकर एक,
समगच्छत = हो गया ।।११ ।।

मन्त्र

अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ।।१२ ।।

पदच्छेद

अति इव तेजसः कूटम् ज्वलन्तम् इव पर्वतम् ।
ददृशुः ते सुराः तत्र ज्वाला-व्याप्त-दिक्-अन्तरम् ।।१२ ।।

अन्वित-पदार्थ

तत्र = वहाँ,
ते सुराः = उन देवताओं ने,
तेजसः = उस एकीकृत तेज के,
कूटम् = पुञ्ज को,
अति इव = अत्यन्त,
ज्वलन्तम् = जलते हुए,
ज्वाला-व्याप्त-दिक्-अन्तरम् = ज्वाला से दिशाओं को व्याप्त करने वाले,
पर्वतम् इव = पर्वत के समान,
ददृशुः = देखा ।।१२ ।।

मन्त्र

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ।।१३ ।।

पदच्छेद

अतुलम् तत्र तत् तेजः सर्वदेवशरीरजम् ।
एकस्थम् तत् अभूत् नारी व्याप्तम् लोकत्रयम् त्विषा ।।१३ ।।

अन्वित-पदार्थ

तत्र = हिमालय पर,
सर्वदेवशरीरजम् = सभी देवताओं के शरीर से उत्पन्न,
तत् = वह,
एकस्थम् = एकीकृत होकर,
त्विषा = अपने प्रकाश से,
व्याप्तम् लोकत्रयम् = तीनों लोकों को व्याप्त कर रहा था,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतुलम् = अतुलनीय,
तेजः = तेज,
तत् = वही,
नारी = स्त्री रूप,
अभूत् = हो गया ।।१३।।

मन्त्र

यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ।
याम्येनचाभवन् केशा बाहवो विष्णुतेजसा ।।१४।।

पदच्छेद

यत् अभूत् शाम्भवम् तेजः तेन अजायत तत् मुखम् ।
याम्येन च अभवन् केशाः बाहवः विष्णुतेजसा ।।१४।।

अन्वित-पदार्थ

यत् = जो,
शाम्भवम् = शम्भु से उत्पन्न,
तेजः = तेज,
अभूत् = था,
तेन = उससे,
तत् मुखम् = उस नारी का मुख,
अजायत = बना,
याम्येन च = और यम के तेज से,
केशाः = केश,
अभवन् = उत्पन्न हुए,
विष्णुतेजसा = विष्णु के तेज से,
बाहवः अभवन् = भुजाएँ (उत्पन्न हुईं) ।।१४।।

मन्त्र

सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् ।
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ।।१५।।

पदच्छेद

सौम्येन स्तनयोः युग्मम् मध्यम् च ऐन्द्रेण च अभवत् । वारुणेन च जङ्घा-उरू नितम्बः तेजसा भुवः ।।१५।।

अन्वित-पदार्थ

स्तनयोः = स्तनों का,
युग्मम् = युग्म,
सौम्येन = चन्द्रमा के,
वारुणेन च = वरुण के तेज से,
जङ्घोरू च = पिण्डलियाँ तथा उरु भाग,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऐन्द्रेण च = तथा इन्द्र के तेज से,
मध्यम् = मध्य भाग,
भुवः = पृथ्वी के,
तेजसा = तेज से,
नितम्बः = नितम्ब निर्मित हुआ ।।१५ ।।

मन्त्र

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ।।१६ ।।

पदच्छेद

ब्रह्मणः तेजसा पादौ तत् अङ्गुल्यः अर्क (अर्कस्य) तेजसा ।
वसूनाम् च कराङ्गुल्यः कौबेरेण च नासिका ।।१६ ।।

अन्वित-पदार्थ

ब्रह्मणः = ब्रह्मा के,
तेजसा = तेज से,
पादौ = चरण युगल बने,
अर्कस्य तेजसा = सूर्य के तेज से,
तत् = उन पैरों की,
अङ्गुल्यः = अङ्गुलियाँ,
वसूनाम् च = अष्टवसुओं के तेज से,
कराङ्गुल्यः = हाथों की अङ्गुलियाँ,
नासिका च = एवं नासिका,
कौबेरेण = कुबेर के तेज से हुई ।।१६ ।।

मन्त्र

तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा ।
नयनत्रितयं जज्ञे तथा पावकतेजसा ।।१७ ।।

पदच्छेद

तस्याः तु दन्ताः सम्भूताः प्राजापत्येन तेजसा ।
नयनत्रितयम् जज्ञे तथा पावक तेजसा ।।१७ ।।

अन्वित-पदार्थ

तस्याः = उनके,
दन्ताः तु = दाँत,
प्राजापत्येन = प्रजापति के,
तथा = इसी प्रकार,
पावक तेजसा = अग्नि के तेज से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेजसा = तेज से,
सम्भूताः = उत्पन्न हुए,
नयनत्रितयम् = तीनों नयन,
जज्ञे = विनिर्मित हुए ।।१७।।

मन्त्र

भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ।
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ।।१८।।

पदच्छेद

भ्रुवौ च सन्ध्ययोः तेजः श्रवणौ अनिलस्य च।
अन्येषाम् च एव देवानाम् सम्भवः तेजसाम् शिवा ।।१८।।

अन्वित-पदार्थ

सन्ध्ययोः = दोनों सन्ध्यायों के,
तेजः = तेज से,
भ्रुवौ = भ्रू युगल,
अनिलस्य च = वायु के तेज से,
श्रवणौ = दोनों श्रोत्र बने,
च अन्येषाम् = तथा अन्य,
देवानाम् = देवों के,
तेजसाम् = तेजों का,
सम्भवः एव = प्रकटरूप ही,
शिवा = शिवा सर्वमंगला भगवती हैं ।।१८।।

मन्त्र

ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ।।१९।।

पदच्छेद

ततः समस्तदेवानाम् तेजःराशिसमुद्भवाम् ।
ताम् विलोक्य मुदम् प्रापुः अमराः महिषा-अर्दिताः ।।१९।।

अन्वित-पदार्थ

ततः = इसके पश्चात्,
समस्तदेवानाम् = सभी देवताओं के,
तेजःराशिसमुद्भवाम् = तेज
विलोक्य = देख कर,
महिषाअर्दिताः = महिषासुर से पीड़ित,
अमराः = देवतागण,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुञ्ज से उत्पन्न,
ताम् = उस भगवती शिवा को,
मुदम् प्रापुः = आनन्दित हो गए ।।१९ ।।

मन्त्र

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्।
चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्व-चक्रतः ।।२० ।।

पदच्छेद

शूलम् शूलात् वि-निष्कृष्य ददौ तस्यै पिनाकधृक् ।
चक्रम् च दत्तवान् कृष्णः समुत्पाद्य स्व-चक्रतः ।।२० ।।

अन्वित-पदार्थ

पिनाकधृक् = पिनाक नामक धनुष धारण करने वाले शिव ने,
शूलात् = अपने शूल से,
शूलम् = दिव्य शूल,
वि-निष्कृष्य = उत्पन्न करके,
तस्यै = शिवा को,
ददौ = प्रदान किया,
कृष्णः = श्रीहरि ने,
स्व-चक्रतः = अपने सुदर्शन चक्र से,
चक्रम् च = चक्र भी,
समुत्पाद्य = उत्पन्न करके,
दत्तवान् = दिया ।।२० ।।

मन्त्र

शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधीः ।।२१ ।।

पदच्छेद

शङ्खम् च वरुणः शक्तिम् ददौ तस्यै हुताशनः ।
मारुतः दत्तवान् चापम् बाणपूर्णे तथा इषुधीः ।।२१ ।।

अन्वित-पदार्थ

तस्यै = शिवा को,
वरुणः = वरुण ने,
शङ्खम् = शङ्ख,
हुताशनः च = तथा अग्नि ने,
शक्तिम् = शक्ति नामक अस्त्र,
ददौ = दिया,
मारुतः = पवन ने,
चापम् तथा = धनुष तथा,
बाणपूर्णे = बाणों से भरे हुए दो,
इषुधीः = तूणीर या तरकश,
दत्तवान् = प्रदान किए ।।२१ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात्।।२२।।

पदच्छेद

वज्रम् इन्द्रः सम् उत्पाद्य कुलिशाद् अमराधिपः।
ददौ तस्यै सहस्राक्षः घण्टाम् ऐरावताद् गजात्।।२२।।

अन्वित-पदार्थ

सहस्राक्षः = सहस्र नेत्र वाले,
अमराधिपः = देवताओं के राजा,
इन्द्रः = इन्द्र ने,
कुलिशाद् = अपने वज्र से,
सम् उत्पाद्य = उत्पन्न करके,
वज्रम् = वज्र,
ऐरावताद् (च) = और ऐरावत नामक,
गजात् = हाथी से,
घण्टाम् = घण्टा लेकर,
तस्य = उन्हें,
ददौ = प्रदान किया।।२२।।

मन्त्र

कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम्।।२३।।

पदच्छेद

काल दण्डात् यमः दण्डम् पाशम् च अम्बुपतिः ददौ।
प्रजापतिः च अक्षमालाम् ददौ ब्रह्मा कमण्डलुम्।।२३।।

अन्वित-पदार्थ

यमः = यमराज ने,
कालदण्डात् = अपने मृत्यु दण्ड से,
दण्डम् = दण्ड,
अम्बुपतिः च = तथा समुद्र ने,
पाशम् = पाश,
ददौ = प्रदान किया,
प्रजापतिः = प्रजापति,
ब्रह्मा = ब्रह्मा ने,
अक्षमालाम् = अक्षमाला,
कमण्डलुम् च = तथा कमण्डलु,
ददा = दिया।।२३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

समस्तरोमकूपेषु निजरश्मीन् दिवाकरः।
कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम्।।२४।।

पदच्छेद

समस्त-रोम-कूपेषु निज-रश्मीन् दिवाकरः।
कालः च दत्तवान् खड्गम् तस्याः चर्म च निर्मलम्।।२४।।

अन्वित-पदार्थ

दिवाकरः = सूर्य ने,
तस्याः = उनके,
समस्त-रोम-कूपेषु = सम्पूर्ण रोमकूपों में,
निज-रश्मीन् = अपनी किरणों का तेज,
कालः च = और मृत्यु ने,
खड्गम् = खड्ग,
निर्मलम् च = तथा अत्यन्त निर्मल,
चर्म = चर्म शरीरावरण,
दत्तवान् = दिया।।२४।।

मन्त्र

क्षीरोदश्चामलं हारमजरे च तथाम्बरे।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च।।२५।।

पदच्छेद

क्षीरोदः च अमलम् हारम् अजरे च तथा अम्बरे।
चूडामणिम् तथा दिव्यम् कुण्डले कटकानि च।।२५।।

अन्वित-पदार्थ

क्षीरोदः च = तथा क्षीर सागर ने,
अमलम् = निर्मल,
हारम्= हार,
तथा च = इसी प्रकार,
अजर = कभी पुराने न होने वाले,
अम्बर = वस्त्रों का जोड़ा,
दिव्यम् = दिव्य,
चूडामणिम् = चूड़ामणि,
कुण्डले = दो कुण्डल,
कटकानि च = तथा चूड़ियाँ या वलय।।२५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु।
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम्।।२६।।

पदच्छेद

अर्धचन्द्रम् तथा शुभ्रम् केयूरान् सर्वबाहुषु।
नूपुरौ विमलौ तत् वत् ग्रैवेयकम् अनुत्तमम्।।२६।।

अन्वित-पदार्थ

शुभ्रम् तथा = तथा उज्वल,
अर्धचन्द्रम् = अर्धचन्द्र भाल की शोभा,
सर्वबाहुष = सभी आठ भुजाओं में,
केयूरान् = बाजूबन्द,
विमला = स्वच्छ,
नूपुरौ = नूपुरों का जोड़ा,
तत् वत् = इसी प्रकार,
अनुत्तमम् = जिससे अच्छा बनाया ही नहीं जा सकता ऐसा,
ग्रैवेयकम् = गुलूबन्द गले का आभूषण।।२६।।

मन्त्र

अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम्।।२७।।

पदच्छेद

अङ्गुलीयक-रत्नानि समस्ताषु अङ्गुलीषु च।
विश्वकर्मा ददौ तस्यै परशुम् च अति-निर्मलम्।।२७।।

अन्वित-पदार्थ

समस्तासु अङ्गुलीषु च = और सभी अङ्गुलियों में,
अङ्गुलीयक-रत्नानि = उत्तम अँगूठियाँ दी,
विश्वकर्मा च = तथा विश्वकर्मा ने,
तस्य = उन्हें,
अति-निर्मलम् = अत्यन्त स्वच्छ,
परशुम् = परशु,
ददा = प्रदान किया।।२७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम्।
अम्लानपङ्कजां मालां शिरस्युरसि चापराम्।।२८।।

पदच्छेद

अस्त्राणि अनेक-रूपाणि तथा अभेद्यम् च दंशनम्।
अ-म्लान-पङ्कजाम् मालाम् शिरसि उरसि च अपराम्।।२८।।

अन्वित-पदार्थ

तथा = इसी प्रकार विश्वकर्मा ने,
अनेक-रूपाणि = अनेक प्रकार के,
अस्त्राणि = प्रक्षेपास्त्रों,
च = तथा,
अभेद्यम् = अकाट्य,
दंशनम् ददा = कवच को प्रदान किया,
अ-म्लान-पङ्कजाम् = जिसके कमल कभी न मुरझाएँ ऐसी,
मालाम् = माला,
शिरसि च = एक शिर के लिए तथा,
उरसि = कटि भाग के लिए,
अपराम् = दूसरी दी।।२८।।

मन्त्र

अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम्।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च।।२९।।

पदच्छेद

अददत् जलधिः तस्यै पङ्कजम् च अति शोभनम्।
हिमवान् वाहनम् सिंहम् रत्नानि विविधानि च।।२९।।

अन्वित-पदार्थ

अति शोभनम् च = तथा अत्यन्त सुन्दर,
पङ्कजम् = कमल,
हिमवान् = हिमालय ने,
वाहनम् = सवारी के रूप में,
सिंहम् = सिंह,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्यै = उन्हें,
जलधिः = समुद्र ने,
अददत् = प्रदान किया,
विविधानि च = तथा अनेक प्रकार के,
रत्नानि ददौ = रत्नों को दिया ।।२९ ।।

मन्त्र

ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणिविभूषितम् ।। ३० ।।
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ।। ३१ ।।

पदच्छेद

ददौ अशून्यम् सुरया पानपात्रम् धनाधिपः ।
शेषः च सर्वनागेशः महामणिविभूषितम् ।। ३० ।।
नागहारम् ददौ तस्यै धत्ते यः पृथिवीम् इमाम् ।
अन्यैः अपि सुरैः देवी भूषणैः आयुधैः तथा ।। ३१ ।।

अन्वित-पदार्थ

धनाधिपः = कुबेर ने,
सुरया = सुरा से,
अशून्यम् = पूर्ण,
पानपात्रम् = चषक,
ददौ = दिया,
सर्वनागेशः च = सभी नागों के राजा,
शेषः = शेष ने,
यः = जो,
इमाम् = इस,
पृथिवीम् = पृथिवी को,
धत्ते = धारण करते हैं,
तस्य = उन शेष ने,
महामणिविभूषितम् = महामणियों से विभूषित,
नागहारम् = दुर्लभ नागहार नामक यज्ञोपवीत,
ददौ = दिया,
देवी = इस प्रकार देवी शिवा,
अन्यैः = अन्य,
सुरैः अपि = देवताओं द्वारा भी,
भूषणैः = अलंकारों,
तथा आयुधैः = तथा शस्त्रास्त्रों से ।।३०-३१ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ।।३२ ।।

पदच्छेद

सम्मानिता ननाद उच्चैः स अट्टहासम् मुहुः मुहुः ।
तस्याः नादेन घोरेण कृत्स्नम् आपूरितम् नभः ।।३२ ।।

अन्वित-पदार्थ

सम्मानिता = सम्मान प्राप्त करके,
उच्चैः = जोर से,
स अट्टहासम् = अट्टहास के साथ,
मुहुः मुहुः = बार-बार देवी ने,
ननाद = घोष किया,
तस्याः = उनके,
घोरेण = प्रचण्ड,
नादेन = नाद से,
कृत्स्नम् = पूरा,
नभः = आकाश,
आपूरितम् = गूँज उठा ।।३२ ।।

मन्त्र

अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ।।३३ ।।

पदच्छेद

अमायता अति-महता प्रतिशब्दः महान् अभूत् ।
चुक्षुभुः सकलाः लोकाः समुद्राः च चकम्पिरे ।।३३ ।।

अन्वित-पदार्थ

अति-महता = अति विशाल,
अमायता = अपरिमेय - अनन्त आकाश से,
महान् = जोर से,
प्रतिशब्दः अभूत् = उस अट्टहास की प्रतिध्वनि हुई,
सकलाः = उसके कारण सभी,
लोकाः = चौदह लोक,
चुक्षुभुः = हिल गए,
समुद्राः च = तथा चारों समुद्र,
चकम्पिरे = काँप गए ।।३३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

चचाल वसुधा चेलुः सकलाश्च महीधराः।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम्।।३४।।

पदच्छेद

चचाल वसुधा चेलुः सकलाः च महीधराः।
जय इति देवाः च मुदा ताम् ऊचुः सिंहवाहिनीम्।।३४।।

अन्वित-पदार्थ

वसुधा = धरती,
चचाल = कम्पित हो गई,
सकलाः च = और सभी,
महीधराः = पर्वत,
चेलुः = डगमगा गए,
देवाः च = तथा देवतागण,
मुदा = प्रसन्नता से,
ताम् = उन,
सिंहवाहिनीम् = सिंहवाहिनी भगवती के प्रति,
जय इति = जय,
ऊचुः = घोष करने लगे।।३४।।

मन्त्र

तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः।।३५।।

पदच्छेद

तुष्टुवुः मुनयः च एनाम् भक्त्या नम्राः आत्ममूर्तयः।
दृष्ट्वा समस्तम् संक्षुब्धम् त्रैलोक्यम् अमरारयः।।३५।।

अन्वित-पदार्थ

एनाम् च = और भगवती शिवा के प्रति,
भक्त्या = भक्ति से,
नम्राः आत्ममूर्तयः = विनम्र शरीर वाले,
मुनयः = मुनिगण,
तुष्टुवुः = सन्तुष्ट हो गए,
समस्तम् = सभी,
त्रैलोक्यम् = तीनों लोकों को,
संक्षुब्धम् = दुखी,
दृष्ट्वा = देख कर,
अमरारयः = दैत्यगण।।३५।।

मन्त्र

संनद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः।।३६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

संनद्धा अखिलसैन्याः ते सम् उत्तस्थुः उत् आयुधाः।
आः किम् एतत् इति क्रोधात् आभाष्य महिषासुरः ।।३६।।

अन्वित-पदार्थ

ते (अमरारयः) संनद्धाः = तैयार हुए वे दैत्यगण, **अखिलसैन्याः** = समस्त सेना के साथ, **उत् आयुधाः** = हथियार उठाकर, **सम् उत्तस्थुः** = उठ खड़े हुए, **आः किम् एतत् इति** = आः ! क्या है यह ऐसा, **महिषासुरः** = महिषासुर, **क्रोधात्** = क्रोध से, **आभाष्य** = गरज कर ।।३६।।

मन्त्र

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ।।३७।।

पदच्छेद

अभि अधावत तम् शब्दम् अशेषैः असुरैः वृतः।
सः ददर्श ततः देवीम् व्याप्तलोकत्रयाम् त्विषा ।।३७।।

अन्वित-पदार्थ

अशेषैः = सम्पूर्ण, **असुरैः वृतः** = असुरों से घिरा हुआ, **तम् शब्दम्** = उस महान् ध्वनि की ओर, **अभि अधावत** = दौड़ पड़ा, **ततः सः** = उसके बाद उस दैत्य ने, **त्विषा** = अपने प्रकाश से, **व्याप्तलोकत्रयाम्** = तीनों लोकों को व्याप्त करने वाली, **देवीम्** = भगवती पराम्बा को, **ददश** = देखा ।।३७।।

मन्त्र

पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम्।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ।।३८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

पद आक्रान्त्या आनतभुवम् किरीट उल्लिखित अम्बराम्।
क्षोभित अशेषपातालाम् धनुषः ज्यायाः निःस्वनेन ताम्।।३८।।

अन्वित-पदार्थ

पाद आक्रान्त्या = चरणों के धरती पर रखने से,
आनतभुवम् = पृथिवी को दबाई हुई,
किरीट उल्लिखित अम्बराम् = किरीट या मुकुट की आभा से नभोमण्डल प्रकाशित कराने वाली,
धनुषः = धनुष की,
ज्यायाः = प्रत्यञ्चा के,
निःस्वनेन = टंकार से,
क्षोभित अशेषपातालाम् = समस्त पाताल लोकों को कम्पित करने वाली,
ताम् ददर्श = उन भगवती को देखा।।३८।।

मन्त्र

दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम्।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम्।।३९।।

पदच्छेद

दिशः भुजसहस्रेण समन्तात् व्याप्य संस्थिताम्।
ततः प्रववृते युद्धम् तया देव्या सुरद्विषाम्।।३९।।

अन्वित-पदार्थ

भुजसहस्रेण = सहस्र भुजाओं से,
समन्तात् = चारों ओर से,
दिशः = दिशाओं को,
व्याप्य = व्याप्त करके,
संस्थिताम् = विराजमान,
ताम् ददर्श = भगवती को देखा,
ततः = इसके पश्चात्,
तया = उन,
देव्या = शिवा के साथ,
सुरद्विषाम् = राक्षसों, देव द्रोहियों का,
युद्धम् = युद्ध,
प्रववृते = आरम्भ हो गया।।३९।।

मन्त्र

शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम्।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः।। ४० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

शस्त्रैः अस्त्रैः बहुधा मुक्तैः आदीपितदिक् अन्तरम्।
महिषासुरस्य सेनानी चिक्षुर आख्यः महासुरः ।।४० ।।

अन्वित-पदार्थ

बहुधा = जिस युद्ध में अनेक प्रकार से,
मुक्तैः = चलाए गए,
शस्त्रैः = मारक आयुध,
अस्त्रैः = एवं प्रक्षेपास्त्रों से,
आदीपितदिक् अन्तरम् = दिशाएँ चमक उठीं,
महिषासुरस्य = महिषासुर का,
सेनानी = सेनापति,
महासुरः = प्रचण्ड राक्षस,
चिक्षुर आख्यः = चिक्षुर नाम का था ।।४० ।।

मन्त्र

युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः।
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ।।४१ ।।

पदच्छेद

युयुधे चामरः च अन्यैः चतुरङ्गबल अन्वितः।
रथानाम् अयुतैः षड्भिः उदग्र आख्यः महा असुरः ।।४१ ।।

अन्वित-पदार्थ

चामरः च = तथा उसके साथ चामर नामक राक्षस,
अन्यैः = अन्य,
चतुरङ्गबल अन्वितः = चारों अङ्गों वाली सेना से सज्जित होकर,
युयुध = युद्ध करने लगा,
उदग्र आख्यः = उदग्र नामक,
महा असुरः = विशाल दैत्य ने,
रथानाम् = रथों की,
षड्भिः अयुतैः = (६X१००००=६००००) साठ हजार की संख्या लेकर ।।४१ ।।

मन्त्र

अयुध्यतायुतानां च सहस्रेण महाहनुः।
पञ्चाशद्भिश्चनियुतैरसिलोमा महासुरः ।।४२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

अयुध्यत अयुतानाम् च सहस्त्रेण महाहनुः।
पञ्चाशद्भिः च नियुतैः असिलोमा महा असुरः ।।४२ ।।

अन्वित-पदार्थ

अयुध्यत = युद्ध कर रहा था,
महाहनुः च = और महाहनु,
अयुतानाम् सहस्त्रेण = १०००X१०००=१०००००००
एक करोड़ सेना के साथ,
महा असुरः = महादैत्य,
असिलोमा च = तथा असिलोमा,
पञ्चाशद्भिः = पचास,
नियुतैः = करोड़ सेना के साथ ।।४२ ।।

मन्त्र

अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे।
गजवाजिसहस्रौघैरनेकैः परिवारितः ।।४३ ।।

पदच्छेद

अयुतानाम् शतैः षड्भिः बाष्कलः युयुधे रणे।
गजवाजिसहस्रौघैः अनेकैः परिवारितः ।।४३ ।।

अन्वित-पदार्थ

बाष्कलः = बाष्कल,
अयुतानाम् षड्भिः शतैः = १००००X६X१००=६ करोड़,
रणे = सेना के साथ युद्ध क्षेत्र में,
युयुधे = लड़ रहा था,
गजवाजिसहस्रौघैः = हाथियों घोड़ों के असंख्य झुण्डों के साथ,
अनेकैः परिवारितः = अनेकों के साथ घिरा हुआ ।।४३ ।।

मन्त्र

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत।
बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ।।४४ ।।

पदच्छेद

वृतः रथानाम् कोट्या च युद्धे तस्मिन् अयुध्यत।
बिडाल आख्यः अयुतानाम् च पञ्चाशद्भिः रथानाम् अयुतैः ।।४४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

रथानाम् च कोट्या = तथा करोड़ रथों से,
वृतः = सुसज्जित होकर,
अयुध्यत = युद्ध कर रहा था,
तस्मिन् युद्धे = उस विकट संग्राम में,
बिडाल आख्यः च = विडाल नामक राक्षस,
पञ्चाशद्भिः अयुतानाम् = ५X१००००=पाँच लाख सेना,
रथानाम् अयुतैः च = तथा १०००० रथों के साथ ।।४४ ।।

मन्त्र

युयुधे संयुगे तत्र रथानां परिवारितः ।
अन्ये च तत्रायुतशो रथनागहयैर्वृताः ।।४५ ।।

पदच्छेद

युयुधे संयुगे तत्र रथानाम् परिवारितः ।
अन्ये च तत्र अयुतशः रथनागहयैः वृताः ।।४५ ।।

अन्वित-पदार्थ

रथानाम् = रथों से,
परिवारितः = घिरा हुआ राक्षस,
तत्र = उस,
संयुग = महासमर में,
युयुधे = युद्ध कर रहा था,
अन्ये च तत्र = तथा अन्य राक्षसगण,
अयुतशः = दस-दस हजार,
रथनागहयैः वृताः = रथों हाथियों घोड़ों से सज्जित होकर ।।४५ ।।

मन्त्र

युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ।।४६ ।।

पदच्छेद

युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटि-कोटि सहस्रैः तु रथानाम् दन्तिनाम् तथा ।।४६ ।।

अन्वित-पदार्थ

महासुराः = राक्षस समुदाय,
कोटि-कोटि सहस्रैः तु =

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देव्या सह = भगवती के साथ,
तत्र संयुगे = उस संग्राम में,
युयुधुः = लड़ रहे थे,
हजारों करोड़,
रथानाम् = रथों,
तथा दन्तिनाम् = तथा हाथियों से ।।४६ ।।

मन्त्र

हयानां च वृतो युद्धे तत्राभून्महिषासुरः ।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ।।४७ ।।

पदच्छेद

हयानाम् च वृतः युद्धे तत्र अभूत् महिषासुरः ।
तोमरैः भिन्दिपालैः च शक्तिभिः मुसलैः तथा ।।४७ ।।

अन्वित-पदार्थ

हयानाम् च = तथा घोड़ों से,
तत्र युद्धे = रणक्षेत्र में,
महिषासुरः = महिषासुर,
वृतः = घिरा हुआ,
अभूत् = था,
तोमरैः = तोमरों,
भिन्दिपालैः च = और भिन्दिपालों,
शक्तिभिः = शक्तियों,
तथा मुसलैः = एवं मुसलों से ।।४७ ।।

मन्त्र

युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ।।४८ ।।

पदच्छेद

युयुधुः संयुगे देव्या खड्गैः परशुभिः पट्टिशैः ।
केचित् च चिक्षिपुः शक्तीः केचित् पाशान् तथा अपरे ।।४८ ।।

अन्वित-पदार्थ

संयुग = युद्ध में,
देव्या = भगवती के साथ,
युयुधुः = वे लड़ रहे थे,
केचित् = कुछ,
केचित् = कुछ दैत्य,
शक्तीः = शक्तियों,
केचित् = कुछ,
पाशान् = पाशों को,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खड्गैः = खड्गों,
परशुभिः = परशुओं,
पट्टिशैः च = एवं पट्टिशों से,
युयुधुः = प्रहार कर रहे थे,
चिक्षिपुः = फेंक कर प्रहार कर रहे थे,
तथा = इसी प्रकार,
अपर = दूसरे ।।४८।।

मन्त्र

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ।।४९।।

पदच्छेद

देवीम् खड्गप्रहारैः तु ते ताम् हन्तुम् प्रचक्रमुः ।
सा अपि देवी ततः तानि शस्त्राणि अस्त्राणि चण्डिका ।।४९।।

अन्वित-पदार्थ

ते = दैत्यगण,
ताम् = उन,
देवीम् = शिवा को,
खड्गप्रहारैः त = तलवार से,
हन्तुम् = मारने के लिए,
प्रचक्रमुः = प्रयास कर रहे थे,
ततः = तब,
सा = वह,
चण्डिका देवी अपि = चण्डिका देवी भी,
तानि = उन सभी,
शस्त्राणि = प्रहरणों,
अस्त्राणि = प्रक्षेपास्त्रों को ।।४९।।

मन्त्र

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ।
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ।।५०।।

पदच्छेद

लीलया एव प्रचिच्छेद निजशस्त्र अस्त्रवर्षिणी ।
अनायस्ता आनना देवी स्तूयमाना सुरैः ऋषिभिः ।।५०।।

अन्वित-पदार्थ

लीलया एव = खेल-खेल में ही,
प्रचिच्छेद = काट डाला,
अनायस्ता आनना = तनाव विहीन मुखमण्डल वाली,
सुरैः = देवताओं,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निजशस्त्र अस्त्रवर्षिणी = अपने दिव्य आयुधों की वर्षा करने वाली,
ऋषिभिः = एवं ऋषियों द्वारा,
स्तूयमाना = प्रार्थित,
देवी = भगवती ।।५० ।।

मन्त्र

मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ।।५१ ।।

पदच्छेद

मुमोच असुर देहेषु शस्त्राणि अस्त्राणि च ईश्वरी ।
सः अपि क्रुद्धः धुतसटः देव्याः वाहन - (वाहनम्) केसरी ।।५१ ।।

अन्वित-पदार्थ

ईश्वरी = सर्वस्वामिनी अम्बिका ने,
असुर देहेषु = राक्षसों के शरीरों पर,
शस्त्राणि = प्रहरण शस्त्रों,
अस्त्राणि च = तथा प्रक्षेपास्त्रों को,
मुमोच = छोड़ा,
सः = उस,
देव्याः = भगवती की,
वाहनम् = सवारी,
केसरो = सिंह ने,
अपि = भी,
धुतसटः = अपने अयालों को झटक कर,
क्रुद्धः = क्रोधित रूप में ।।५१ ।।

मन्त्र

चचारासुरसैन्येषु वनेष्विव हुताशनः ।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ।।५२ ।।

पदच्छेद

चचार असुरसैन्येषु वनेषु इव हुताशनः ।
निःश्वासान् मुमुचे यान् च युध्यमाना रणे अम्बिका ।।५२ ।।

अन्वित-पदार्थ

असुराणाम् = राक्षसों की,
सैन्येष = सैन्य,
वनेषु = जंगल में,
अम्बिका च = और अम्बिका भगवती,
रण = संग्राम में,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हुताशनः = आग,
इव = की भाँति,
चचार = विचरण करने लगा,
युध्यमाना = युद्ध करती हुई,
यान् = जिन,
निःश्वासान् = श्वासों को,
मुमुचे = छोड़ रही थीं ।।५२।।

मन्त्र

त एव सद्यः सम्भूता गणाः शतसहस्रशः ।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ।। ५३ ।।

पदच्छेद

ते एव सद्यः सम्भूता गणाः शतसहस्रशः ।
युयुधुः ते परशुभिः भिन्दिपालैः असि (भिः) पट्टिशैः ।।५३।।

अन्वित-पदार्थ

ते एव = वे निश्वास ही,
सद्यः = तुरन्त,
शतसहस्रशः = सैकड़ों हजार,
गणाः = गणों के रूप में,
सम्भूता = उत्पन्न होकर,
युयुधुः = युद्ध करने लगे,
ते = वे सभी,
परशुभिः = फरसों,
भिन्दिपालैः = भिन्दिपालों,
असिभिः = तलवारों,
पट्टिशैः = पट्टिशों से ।।५३।।

मन्त्र

नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ।
अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ।।५४।।

पदच्छेद

नाशयन्तः असुरगणान् देव्याः शक्त्या उपबृंहिताः ।
अवादयन्त पटहान् गणाः शङ्खाः तथा अपरे ।।५४।।

अन्वित-पदार्थ

असुरगणान् = राक्षसों का,
नाशयन्तः = विनाश करते हुए,
देव्याः = अम्बिका की,
शक्त्या = शक्ति के द्वारा,
गणाः = गण लोग,
पटहान् = नगाड़े,
शङ्खाः = शंख,
अवादयन्त = बजाने लगे,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपबृंहिताः = आप्यायित, उत्साहित,

तथा अपरे = तथा दूसरे गण ।। ५४ ।।

मन्त्र

मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ।
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ।। ५५ ।।

पदच्छेद

मृदङ्गान् च तथा एव अन्ये तस्मिन् युद्धमहोत्सवे ।
ततः देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ।। ५५ ।।

अन्वित-पदार्थ

तस्मिन् युद्धमहोत्सवे = उस समर महोत्सव में,

मृदङ्गान् च = मृदंग बजा रहे थे,

तथा एव = इसी प्रकार,

अन्ये = अन्य गण भी उत्साहित थे,

ततः = इस वातावरण में,

देवी = भगवती ने,

त्रिशूलेन = त्रिशूल,

गदया = गदा एवं,

शक्तिवृष्टिभिः = शक्तियों की वर्षा के द्वारा ।।५५ ।।

मन्त्र

खड्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ।।५६ ।।

पदच्छेद

खड्गादिभिः च शतशः निजघान महासुरान् ।
पातयामास च एव अन्यान् घण्टा-स्वन-विमोहितान् ।।५६ ।।

अन्वित-पदार्थ

खड्गादिभिः च = खड्ग आदि शस्त्रों से,

शतशः = सैकड़ों,

महासुरान् महादैत्यों को,

निजघान = ध्वस्त कर डाला,

अन्यान् च = और अन्यों को तो,

घण्टायाः = अपने घण्टा के,

स्वनेन एव = गम्भीर ध्वनि से ही,

विमोहितान् = मूर्छित करके,

पातयामास = धराशायी कर डाला ।।५६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत्।
केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे।। ५७ ।।

पदच्छेद

असुरान् भुवि पाशेन बद्ध्वा च अन्यान् अकर्षयत्।
केचित् द्विधा कृताः तीक्ष्णैः खड्गपातैः तथा अपरे।।५७।।

अन्वित-पदार्थ

अन्यान् च असुरान् = और अन्य दैत्यों को,
भुवि = धरती पर,
पाशेन = पाश से,
बद्ध्वा = बाँध कर,
अकर्षयत् = खींचा,
केचित् = कुछ,
तीक्ष्णैः = तीखे,
खड्गपातैः = तलवार के प्रहार से,
द्विधा = दो टुकड़े,
कृताः = कर दिए गए,
तथा अपरे = तथा दूसरे।।५७।।

मन्त्र

विपोथिता निपातेन गदया भुवि शेरते।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः।।५८।।

पदच्छेद

विपोथिता निपातेन गदया भुवि शेरते।
वेमुः च केचित् रुधिरम् मुसलेन भृशम् हताः।।५८।।

अन्वित-पदार्थ

गदया = गदा प्रहार से,
विपोथिताः = कुचले गए,
निपातेन = तथा गिर कर,
भुवि = भूमि पर,
शेरत = पड़े थे,
केचित् च = और कुछ दैत्य,
मुसलेन = मुसल से,
भृशम् हताः = पिट कर,
रुधिरम् = रक्त,
वेमुः = वमन कर रहे थे।। ५८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि।
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे।।५९।।

पदच्छेद

केचित् निपतिताः भूमौ भिन्नाः शूलेन वक्षसि।
निरन्तराः शरौघेण कृताः केचित् रण (स्य) अजिरे।।५९।।

अन्वित-पदार्थ

केचित् = कुछ,
वक्षसि = छाती पर,
शूलेन = शूल प्रहार से,
भिन्नाः = टुकड़े होकर,
भूमौ = धरती पर,
निपतिताः = गिरे,
केचित् = कुछ,
रणस्य = उस युद्ध के,
अजिरे = प्रांगण में,
निरन्तराः कृताः = लगातार चलाये जाते हुए,
शराणाम् = तीरों के,
ओघेण = समूहों से।।५९।।

मन्त्र

श्येनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः।
केषांचिद् बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे।।६०।।

पदच्छेद

श्येन अनुकारिणः प्राणान् मुमुचुः स्त्रिदश अर्दनाः।
केषांचित् बाहवः छिन्नाः छिन्ना ग्रीवाः तथा अपरे।।६०।।

अन्वित-पदार्थ

श्येन अनुकारिणः = बाज की तरह,
स्त्रिदश अर्दनाः = देवधर्षक दैत्यों ने,
प्राणान् = प्राणों को,
मुमुचुः = त्याग दिए,
केषांचित् = कुछ के,
बाहवः = हाथ,
छिन्नाः = कटे थे,
तथा अपरे = तथा दूसरे,
छिन्ना ग्रीवाः = कटी गर्दन वाले थे।।६०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ।।६१ ।।

पदच्छेद

शिरांसि पेतुः अन्येषांम् अन्ये मध्ये विदारिताः ।
विच्छिन्न जङ्घाः तु अपरे पेतुः उर्व्याम् महासुराः ।।६१ ।।

अन्वित-पदार्थ

अन्येषाम् = कुछ दूसरों के,
शिरांसि = शिर कट कर,
पेतुः = गिरे,
अन्ये = दूसरे,
मध्ये = बीच से,
विदारिताः = चिरे हुए थे,
अपरे तु महासुराः = दूसरे महादैत्य,
विच्छिन्न जङ्घाः = कटे हुए जाँघों के कारण,
उर्व्याम् = धरती पर,
पेतुः = गिरे थे ।।६१ ।।

मन्त्र

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ।।६२ ।।

पदच्छेद

एक-बाहु-अक्षि-चरणाः केचित् देव्या द्विधा कृताः ।
छिन्ने अपि च अन्ये शिरसि पतिताः पुनः-उत्थिताः ।।६२ ।।

अन्वित-पदार्थ

एक-बाहु-अक्षि-चरणाः = इस प्रकार एक हाथ, एक आँख, एक पैर के राक्षस गिरे पड़े थे,
देव्या = भगवती द्वारा,
केचित् = कुछ तो,
द्विधा कृताः = दो टुकड़े कर दिए गए थे,
अन्ये च = और कुछ दूसरे राक्षस,
शिरसि = सर,
छिन्ने अपि = कटने पर भी,
पतिताः = गिरकर,
पुनः = फिर,
उत्थिताः = उठ गये ।।६२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ।।६३ ।।

पदच्छेद

कबन्धाः युयुधुः देव्याः गृहीत-परम-आयुधाः ।
ननृतुः च अपरे तत्र युद्धे तूर्य-लय (तूर्यस्य लयेन) आश्रिताः ।।६३ ।।

अन्वित-पदार्थ

गृहीतपरम-आयुधाः = भयानक हथियारों को लेकर,
कबन्धाः = ये सर कटे राक्षस,
देव्याः = देवी के साथ,
युयुधुः = युद्ध कर रहे थे,
अपरे च = और दूसरे कबन्ध,
तूर्यस्य = तुरही के,
लयेन = ध्वनि से,
आश्रिताः = ताल मिला कर,
तत्र युद्धे = उस रणभूमि में,
ननृतुः = नाच रहे थे ।।६३ ।।

मन्त्र

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ।।६४ ।।

पदच्छेद

कबन्धाः छिन्नशिरसः खड्ग-शक्ति-ऋष्टि-पाणयः ।
तिष्ठ तिष्ठ इति भाषन्तः देवीम् अन्ये महासुराः ।।६४ ।।

अन्वित-पदार्थ

छिन्न-शिरसः = इस प्रकार कटे सिर वाले,
खड्ग-शक्ति-ऋष्टि-पाणयः = खड्ग, शक्ति एवं दुधारी तलवार लेकर,
कबन्धाः = कबन्ध राक्षस,
अन्ये = दूसरे,
महासुराः = दैत्य,
देवीम् = भगवती को,
'तिष्ठ तिष्ठ' इति भाषन्तः = 'रुक-रुक' चिल्लाते हुए,
युयुधुः = लड़ रहे थे ।।६४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा।
अगम्या साभवत्तत्र यत्राभूत्स महारणः ।।६५ ।।

पदच्छेद

पातितैः रथनागअश्वैः असुरैः च वसुन्धरा।
अगम्या सा अभवत् तत्र यत्र अभूत् सः महारणः ।।६५ ।।

अन्वित-पदार्थ

यत्र = जहाँ,
सः महारणः = वह महासंग्राम,
अभूत् = हुआ था,
तत्र = वहाँ,
वसुन्धरा च = धरती तो,
रथैः = रथों,
नागैः = हाथियों,
अश्वैः = घोड़ों,
असुरैः च = तथा असुरों के,
पातितैः = गिराए जाने से,
अगम्या = आने-जाने के भी अयोग्य,
अभवत् = हो गई थी ।।६५ ।।

मन्त्र

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ।।६६ ।।

पदच्छेद

शोणित-ओघा महानद्यः सद्यः तत्र प्रसुस्रुवुः।
मध्ये च असुरसैन्यस्य वारण असुरवाजिनाम् ।।६६ ।।

अन्वित-पदार्थ

तत्र च = और उस,
युद्धे = युद्ध के,
मध्ये सद्यः = बीच उसी समय,
वारणानाम् = हाथियों,
असुराणाम् = राक्षसों,
वाजिनाम् = घोड़ों के,
शोणित-ओघा = खून से भरी,
महानद्यः = महानदियाँ,
प्रसुस्रुवुः = बह रही थीं ।।६६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्।।६७।।

पदच्छेद

क्षणेन तत् महासैन्यम् असुराणाम् तथा अम्बिका।
निन्ये क्षयम् यथा वह्निः तृणदारु महाचयम्।।६७।।

अन्वित-पदार्थ

तत् = उस,
असुराणाम् = महादैत्यों की,
महासैन्यम् = विशाल सैन्यबल को,
अम्बिका = अम्बिका ने,
क्षणेन = क्षणमात्र में,
तथा = उसी प्रकार,
क्षयम् = विनाश को,
निन्य = पहुँचा दिया,
यथा = जिस प्रकार,
वह्निः = आग,
तृणदारु महाचयम् = तिनकों एवं लकड़ियों के ढेर को विनष्ट करता है।।६७।।

मन्त्र

स च सिंहो महानादमुत्सृजन्धुत केसरः।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति।।६८।।

पदच्छेद

सः च सिंहः महानादम् उत्सृजन् धुतकेसरः।
शरीरेभ्यः अमरारीणाम् असून इव विचिन्वति।।६८।।

अन्वित-पदार्थ

सः धुतकेसरः सिंहः च = और वह सिंह अयालों को झटक कर,
अमरारीणाम् = असुरों के,
शरीरेभ्यः = शरीरों से,
असून् = प्राणों को,
विचिन्वति इव = मानो फूलों की तरह चुनते हुए,
महानादम् = भयानक गर्जन,
उत्सृजन् = करते हुए युद्ध कर रहा था।।६८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः ।
यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ।।ॐ ।।६९ ।।

पदच्छेद

देव्या गणैः च तैः तत्र कृतम् युद्धम् महासुरैः ।
यथा एषाम् तुतुषुः देवाः पुष्प-
(पुष्पाणाम्) वृष्टिमुचः दिवि ।।ॐ ।।६९ ।।

अन्वित-पदार्थ

देव्या = भगवती,
तैः च = और भगवती के उन,
गणैः = गणों द्वारा,
तत्र = वहाँ रणस्थल में,
महासुरैः (सार्धम्) = महाराक्षसों के साथ,
युद्धम् = ऐसा युद्ध,
कृतम् = किया गया,
यथा = जिसके कारण,
दिवि = स्वर्ग से,
पुष्पाणाम् वृष्टिमुचः = फूल बरसाने वाले,
देवाः = देवताओं ने पुष्प वर्षा द्वारा,
एषाम् = इन गणों एवं सिंह को,
तुतुषुः = सम्मानित एवं प्रसन्न किया ।।६९ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये भगवतीप्रादुर्भावोनाम द्वितीयोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। तृतीयोध्यायः ।।

मन्त्र

ऋषिरुवाच ।। १ ।।

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ।। २ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।
नि-हन्यमानम् तत् सैन्यम् अव-लोक्य महासुरः ।
सेनानी चिक्षुरः कोपात् ययौ योद्धुम् अथ अम्बिकाम् ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले।।१ ।।
अथ = इसके पश्चात्,
तत् सैन्यम् = महादैत्यों की उस विशाल सेना को,
निहन्यमानम् = पूर्णतः विनष्ट होता हुआ,
अवलोक्य = देखकर,
महिषासुरः = महिषासुर का,
सेनानीः = सेनानी,
चिक्षुरः = चिक्षुर,
कोपात् = क्रोधित होकर,
योद्धुम् = लड़ने के लिए,
अम्बिकाम् = अम्बिका की ओर,
ययौ = गया ।।२ ।।

मन्त्र

स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ।।३ ।।

पदच्छेद

सः देवीम् शर-वर्षेण ववर्ष समरे असुरः ।
यथा मेरु-गिरेः शृङ्गम् तोय-वर्षेण तोयदः ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सः = वह,
असुरः = राक्षस,
यथा = जिस प्रकार,
मेरुगिरेः = सुमेरु पर्वत की,
शृङ्गम् = चोटी पर,
तोयदः = बादल,
तोयवर्षेण = जल की बौछार से आप्यायित करते हैं,
तथा शरवर्षेण = उसी प्रकार वाणों की बौछार से,
समरे = समर में,
देवीम् = भगवती के प्रति,
ववर्ष = बाण वर्षा करने लगा ।।३ ।।

मन्त्र

तस्यच्छित्त्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ।।४ ।।

पदच्छेद

तस्य छित्त्वा ततः देवी लीलया एव शर-उत्करान् ।
जघान तुरगान् बाणैः यन्तारम् च एव वाजिनाम् ।।४ ।।

अन्वित-पदार्थ

ततः = इस पर,
देवी = चण्डिका ने,
लीलया एव = खेल-खेल में ही,
शराणाम् = बाणों की,
उत्करान् = बौछार को,
छित्त्वा = काटकर,
बाणैः एव = बाणों से ही,
तस्य तुरगान् = उसके तीव्रगामी,
वाजिनाम् च = घोड़ों तथा,
यन्तारम् = नियन्ता सारथी को,
जघान = मार डाला ।।४ ।।

मन्त्र

चिच्छेद च धनुः सद्यो ध्वजं चाति समुच्छ्रितम् ।
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ।। ५ ।।

पदच्छेद

चिच्छेद च धनुः सद्यः ध्वजम् च अति-सम-उच्छ्रितम् ।
विव्याध च एव गात्रेषु छिन्न-धन्वानम् आशु-गैः ।। ५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सद्यः च = और तुरन्त ही,
धनुः = धनुष,
अतिसमुच्छ्रितम् च = और अत्यन्त ऊँचा,
ध्वजम् = ध्वज,
विव्याध = काट दिया,
छिन्नधन्वानम् च = और कटे धनुष वाले चिक्षुर के,
गात्रेष = अङ्गों में,
आशुगैः एव = बाणों से ही,
चिच्छेद = छेद डाला ।।५।।

मन्त्र

सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ।।६।।

पदच्छेद

सः छिन्न-धन्वा विरथः हत-अश्वः हत-सारथिः ।
अभि-अधावत ताम् देवीम् खड्ग-चर्म-धरः असुरः ।।६।।

अन्वित-पदार्थ

सः = वह,
छिन्न-धन्वा = कटे धनुष वाला,
विरथः = रथहीन,
हत-अश्वः = मृत अश्वों वाला,
हत-सारथिः = जिसका सारथी भी मारा जा चुका था,
खड्गचर्म-धरः = तलवार लेकर, कवच पहन कर,
असुरः = चिक्षुर राक्षस,
ताम् = उन,
देवीम् = देवी की ओर,
अभ्यधावत = दौड़ पड़ा ।।६।।

मन्त्र

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ।।७।।

पदच्छेद

सिंहम् आ-हत्य खड्गेन तीक्ष्ण-धारेण मूर्धनि ।
आ-जघान भुजे सव्ये देवीम् अपि अति-वेगवान् ।।७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तीक्ष्णधारेण = तीखे धार वाली, **खड्गेन** = तलवार से, **सिंहम्** = सिंह के, **मूर्धनि** = सिर पर, **आहत्य** = वार करके, **अतिवेगवान्** = अत्यन्त फुर्तीले चिक्षुर ने, **देवीम् अपि** = भगवती के भी, **सव्ये** = दाहिनी, **भुजे** = भुजा पर, **आजघान** = वार किया ।।७।।

मन्त्र

तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।
ततो जग्राह शूलं स कोपादरुणलोचनः ।।८।।

पदच्छेद

तस्याः खड्गः भुजम् प्राप्य पफाल नृप-नन्दन ।
ततः जग्राह शूलम् सः कोपात् अरुण-लोचनः ।।८।।

अन्वित-पदार्थ

हे नृपनन्दन = हे राजन् !, **खड्गः** = वह तलवार, **तस्याः** = उनकी, **भुजम्** = भुजा पर, **प्राप्य** = पड़कर, **पफाल** = टुकड़े-टुकड़े हो गई, **ततः** = उसके बाद, **कोपात्** = क्रोध से, **अरुणलोचनः** = आँखें लाल किये, **सः** = उस चिक्षुर ने, **शूलम्** = भाला, **जग्राह** = पकड़ा ।।८।।

मन्त्र

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।
जाज्वल्यमानं तेजोभिः रविबिम्बमिवाम्बरात् ।।९।।

पदच्छेद

चिक्षेप च ततः तत् तु भद्र-काल्याम् महा-असुरः ।
जाज्वल्य-मानम् तेजोभिः रवि-बिम्बम् इव अम्बरात् ।।९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = इसके बाद,
त = तो,
महासुरः = उस राक्षस ने,
तत् = उस भाले से,
भद्रकाल्याम् = भद्रकाली पर,
चिक्षेप = प्रहार किया,
अम्बरात् = आकाश से,
रविबिम्बम् इव = सूर्य बिम्ब के समान,
तेजोभिः = आभा से,
जाज्वल्यमानम् = चमकता हुआ शूल चलाया ।।९ ।।

मन्त्र

दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।
तच्छूलं शतधा तेन नीतं स च महासुरः ।।१० ।।

पदच्छेद

दृष्ट्वा तदा अपतत् शूलम् देवी शूलम् अमुञ्चत ।
तत् शूलम् शतधा तेन नीतम् स च महासुरः ।।१० ।।

अन्वित-पदार्थ

अपतत् = गिरता हुआ,
शूलम् = भाला,
दृष्ट्वा = देखकर,
देवी = भगवती ने,
तदा = उसी समय,
शूलम् = अपना भाला,
अमुञ्चत = छोड़ा,
तेन = भगवती के उस शूल के द्वारा,
तत् = चिक्षुर का वह,
शूलम् = भाला,
शतधा = सौ टुकड़ों में काट,
नीतम् = दिया गया,
सः च = और उस,
महासुरः = महाराक्षस के भी सौ टुकड़े हो गये ।।१० ।।

मन्त्र

हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ।
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ।।११ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

हते तस्मिन् महा-वीर्ये महिषस्य चमू-पतौ।
आ-जगाम गज-आरूढः चामरः त्रिदश-अर्दनः ।।११ ।।

अन्वित-पदार्थ

महिषस्य = महिषासुर के,
तस्मिन् = उस,
महावीर्ये = महा बलवान्,
चमूपतौ = सेनापति के,
हते = मार दिये जाने पर,
त्रिदशार्दनः = देवताओं का धर्षक,
चामरः = चामर नामक दैत्य,
गजारूढः = हाथी पर सवार होकर,
आजगाम = आगे आया ।।११ ।।

मन्त्र

सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम्।
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ।।१२ ।।

पदच्छेद

सः अपि शक्तिम् मुमोच अथ देव्याः ताम् अम्बिका द्रुतम्।
हुं-कारेण अभि-हताम् भूमौ पातयामास निस्-प्रभाम् ।।१२ ।।

अन्वित-पदार्थ

सः अपि = उसने भी,
देव्याः = भगवती पर,
शक्तिम्= शक्तिशल्य,
मुमोच = छोड़ा,
ताम् = उस शक्ति को,
अम्बिका = अम्बिका ने,
द्रुतम् = तुरन्त,
हुंकारेण = हुंकार मात्र से,
अभिहताम् = विनष्ट एवं,
निष्प्रभाम्= कान्तिहीन करके,
भूमा = धरती पर,
पातयामास = गिरा दिया ।।१२ ।।

मन्त्र

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः।
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ।।१३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

भग्नाम् शक्तिम् नि-पतिताम् दृष्ट्वा क्रोधेन सम्-अन्वितः।
चिक्षेप चामरः शूलम् बाणैः तद् अपि सा अच्छिनत् ।।१३।।

अन्वित-पदार्थ

शक्तिम् = शक्ति को,
भग्नाम् = विखण्डित एवं,
निपतिताम् = गिरी हुई,
दृष्ट्वा = देखकर,
क्रोधेन = क्रोध से,
समन्वितः = बौखलाए,
चामरः = चामर ने,
शूलम् = भाला,
चिक्षेप = फेंका,
सा = भगवती ने,
तत् अपि = उसे भी,
बाणैः अच्छिनत् = बाणों से काट दिया ।।१३।।

मन्त्र

ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ।।१४।।

पदच्छेद

ततः सिंहः सम्-उत्पत्य गजकुम्भान्तरे
(गज-कुम्भयोः अन्तरे) स्थितः।
बाहु-युद्धेन युयुधे तेन उच्चैः त्रिदश-अरिणा ।।१४।।

अन्वित-पदार्थ

ततः = तभी,
सिंहः = भगवती का वाहन सिंह,
उच्चैः = ऊँची,
समुत्पत्य = छलाँग लगाकर,
गजकुम्भान्तरे = हाथी के बिन्दु स्थल पर,
स्थितः = चढ़कर,
तेन = उस,
त्रिदशारिणा = देव शत्रु चामर से,
बाहुयुद्धेन = बाहुयुद्ध,
युयुधे = करने लगा ।।१४।।

मन्त्र

युद्ध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ।
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ।।१५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

युद्ध्यमानौ ततः तौ तु तस्मात् नागात् महीम् गतौ।
युयुधाते अति-संरब्धौ प्रहारैः अति-दारुणैः ।।१५।।

अन्वित-पदार्थ

ततः त = उसके बाद तो,
युद्ध्यमानौ = आपस में भिड़े हुए,
तौ = दोनों,
तस्मात् = उस,
नागात् = हाथी से,
महीम् = भूमि पर,
गतौ = आ गिरे,
अतिसंरब्धौ = अत्यन्त क्रुद्ध होकर,
अतिदारुणैः = भयानक,
प्रहारैः = प्रहारों से,
युयुधात = आपस में युद्ध करने लगे।।१५।।

मन्त्र

ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा।
करप्रहारेण शिरश्चामरस्य पृथक् कृतम्।।१६।।

पदच्छेद

ततः वेगात् खम् उत्-पत्य नि-पत्य च
मृग-अरिणा (मृगाणाम् अरिणा)।
करप्रहारेण (करयोः प्र-हारेण)
शिरः चामरस्य पृथक् कृतम्।।१६।।

अन्वित-पदार्थ

ततः = इसके अनन्तर,
वेगात् = तेजी से,
खम् = आकाश में,
उत्पत्य = उछल कर,
निपत्य च = तथा नीचे आकर,
मृगारिणा = सिंह द्वारा,
करयोः = पञ्जों के,
प्रहारेण = वार से,
चामरस्य = चामर का,
शिरः = सर,
पृथक् = धड़ से अलग,
कृतम् = कर दिया गया।।१६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः।
दन्तमुष्टितलैश्चैव करालश्च निपातितः ।।१७।।

पदच्छेद

उदग्रः च रणे देव्या शिला-वृक्ष-आदिभिः
(शिलाभिः वृक्षैः आदिभिः) हतः ।
दन्त-मुष्टि-तलैः च एव करालः च नि-पातितः ।।१७।।

अन्वित-पदार्थ

उदग्रः = उदग्र राक्षस,
देव्या = भगवती द्वारा,
शिलाभिः = पत्थरों,
वृक्षादिभिः च = वृक्षों आदि के वार से,
करालः च = तथा कराल नामक दैत्य,
दन्तैः = सिंह द्वारा दाँतों,
मुष्टितलैः च = और पञ्जों के प्रहार से,
रणे एव = युद्धस्थल में ही,
निपातितः = धराशायी कर दिये गये ।।१७।।

मन्त्र

देवी क्रुद्धा गदापातैः चूर्णयामास चोद्धतम्।
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ।।१८।।

पदच्छेद

देवी क्रुद्धा गदा-पातैः चूर्णयामास च उद्धतम्।
बाष्कलम् भिन्दिपालेन बाणैः ताम्रम् तथा अन्धकम् ।।१८।।

अन्वित-पदार्थ

क्रुद्धा = क्रुद्ध,
देवी = भगवती ने,
उद्धतम् = उद्दण्ड,
बाष्कलम् = बाष्कल नामक
ताम्रम् = ताम्र,
तथा अन्धकम् = तथा अन्धक को,
भिन्दिपालेन = भिन्दिपाल,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राक्षस को,
गदापातैः = गदा के आघात से,
बाणैः च = और बाण से,
चूर्णयामास = चूर चूर कर दिया ।।१८।।

मन्त्र

उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ।।१९।।

पदच्छेद

उग्रास्यम् उग्रवीर्यम् च तथा एव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ।।१९।।

अन्वित-पदार्थ

एवं च = इसी प्रकार,
त्रिनेत्रा = तीन नेत्रों वाली,
परमेश्वरी = भगवती ने,
उग्रास्यम् = उग्रास्य,
उग्रवीर्यम् च = और उग्रवीर्य,
तथा च = ऐसे ही,
महाहनुम् = महाहनु नामक दैत्य को,
त्रिशूलेन = त्रिशूल से,
जघान = मारा ।।१९।।

मन्त्र

बिडालस्यासिना कायात्पातयामास वै शिरः ।
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ।।२०।।

पदच्छेद

बिडालस्य असिना कायात् पातयामास वै शिरः ।
दुर्-धरम् दुर्-मुखम् च उभौ शरैः निन्ये यम-क्षयम् ।।२०।।

अन्वित-पदार्थ

असिना = तलवार से,
बिडालस्य = विडाल का,
वै शिरः = सिर,
कायात् = धड़ से,
पातयामास = नीचे गिरा दिया,
शरैः = बाणों से,
च दुर्धरम् = दुर्धर और,
दुर्मुखम् = दुर्मुख,
उभा = दोनों को,
यमक्षयम् = यमलोक,
निन्य = पहुँचा दिया ।।२०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः।
माहिषेण स्वरूपेण त्रासयामास तान् गणान्।।२१।।

पदच्छेद

एवम् सम्-क्षीयमाणे तु स्व-सैन्ये महिषासुरः।
माहिषेण स्व-रूपेण त्रासयामास तान् गणान्।।२१।।

अन्वित-पदार्थ

एवम् = इस प्रकार,
स्वसैन्ये = अपनी सेना के,
संक्षीयमाण = नष्ट हो जाने पर,
महिषासुरः तु = महिषासुर ने,
तान् = उन,
गणान् = देवी के गणों को,
माहिषेण = भैंसे के,
स्वरूपेण = अपने रूप द्वारा,
त्रासयामास = कष्ट देने लगा।।२१।।

मन्त्र

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान्।
लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान्।।२२।।
वेगेन कांश्चिदपरान्नादेन भ्रमणेन च।
निःश्वासपवनेनान्यान् पातयामास भूतले।।२३।।

पदच्छेद

कान् चित् तुण्डप्रहारेण (तुण्डस्य प्र-हारेण)
खुर-क्षेपैः तथा अ-परान्।
लाङ्गूल-ताडितान् च अन्यान् शृङ्गाभ्याम् च वि-दारितान्।।२२।।
वेगेन कान् चिद् अ-परान् नादेन भ्रमणेन च।
निः-श्वास-पवनेन अन्यान् पातयामास भूतले।।२३।।

अन्वित-पदार्थ

कान् चित् = कुछ को,
तुण्डस्य = नथुनों के,
कान् चिद् = कुछ,
अपरान् = दूसरे गणों को,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रहारेण = चोट से,
तथा अपरान् = तथा कुछ को,
खुरक्षेपैः = खुरों की चोट से,
च अन्यान् = और कुछ को,
लाङ्गूलताडितान् = पूँछों से मार कर,
शृङ्गाभ्याम् च = और सींगों से,
विदारितान् = चीर कर,
वेगेन = अपने वेग से,
नादेन = गर्जन से,
भ्रमणेन च = और चक्करों से,
अन्यान् = कुछ को,
निःश्वासपवनेन = श्वास वायु से,
भूतल = धरती पर,
पातयामास = गिरा दिया ।।२२-२३ ।।

मन्त्र

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ।।२४ ।।

पदच्छेद

नि-पात्य प्र-मथा-अनीकम् अभि-अधावत सः असुरः ।
सिंहम् हन्तुम् महा-देव्याः कोपम् चक्रे ततः अम्बिका ।।२४ ।।

अन्वित-पदार्थ

सः असुरः = वह राक्षस,
प्रमथानाम् = प्रमथ गणों की,
अनीकम् = सेना को,
निपात्य = धराशायी करके,
महादेव्याः = महादेवी के,
सिंहम् = सिंह को,
हन्तुम् = मारने के लिए,
अभि-अधावत = दौड़ पड़ा,
ततः = इस पर,
अम्बिका = भगवती अम्बिका ने,
कोपम् चक्रे = क्रोध किया ।।२४ ।।

मन्त्र

सोऽपि कोपान्महावीर्यः खुरक्षुण्ण महीतलः ।
शृङ्गाभ्यां पर्वतानुच्चाँश्चिक्षेप च ननाद च ।।२५ ।।

पदच्छेद

सः अपि कोपात् महावीर्यः खुर क्षुण्ण महीतलः ।
शृङ्गाभ्याम् पर्वतान् उच्चान् चिक्षेप च ननाद च ।।२५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सः अपि = और वह,
खुर क्षुण्ण महीतलः = खुरों से धरती को खोद डालने वाला,
महावीर्यः = महाबली,
कोपात् = गुस्से से,
उच्चान् पर्वतान् = ऊँचे पर्वतों को,
शृङ्गाभ्याम् = अपने दोनों सींगों से,
चिक्षेप च = गिरा डाला और,
ननाद च = गरजता रहा ।।२५।।

मन्त्र

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ।।२६।।

पदच्छेद

वेगभ्रमणेन विक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूलेन आहतः च अब्धिः प्लावयामास सर्वतः ।।२६।।

अन्वित-पदार्थ

तस्य = उसके,
वेगभ्रमणेन = तेज चक्करों से,
विक्षुण्णा = टूटी हुई,
मही = पृथिवी,
व्यशीर्यत = चूर-चूर हो गई,
लाङ्गूलेन च = और पूँछ से,
आहतः = पिटा हुआ,
अब्धिः = सागर,
सर्वतः = सब ओर,
प्लावयामास = जलमग्न कर रहा था ।।२६।।

मन्त्र

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ।।२७।।

पदच्छेद

धुतशृङ्गविभिन्नः (धुत-शृङ्गेन विभिन्नाः)
च खण्डम् खण्डम् ययुः घनाः ।
श्वास अनिलाः ताः शतशः नि-पेतुः नभसः अ-चलाः ।।२७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

धुतशृङ्गेन च = और झटकारते हुए सींगों से,
विभिन्नाः = फटे,
घनाः = बादल,
खण्डम् खण्डम् = टुकड़े टुकड़े,
ययुः = हो गये,
ताः = उन,
श्वासानिलाः = फूत्कारों ने,
नभसः = आकाश से,
शतशः = सैकड़ों,
अचलाः = पर्वत,
निपेतुः = बरसाये ।।२७।।

मन्त्र

इति क्रोधसमाध्मातमापतन्तं महासुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ।।२८।।

पदच्छेद

इति क्रोधसमाध्मातं (क्रोधेन सम् आ-ध्मातम्)
आ-पतन्तम् महा-सुरम् ।
दृष्ट्वा सा चण्डिका कोपम् तद् वधाय तदा अकरोत् ।।२८।।

अन्वित-पदार्थ

इति = इस प्रकार,
क्रोधेन = गुस्से से,
समाध्मातम् = हाँफते हुए,
महासुरम् = महादानव को,
आपतन्तम् = आता हुआ,
दृष्ट्वा = देख कर,
सा चण्डिका = उस भगवती चण्डिका ने,
तदा = तब,
तद् वधाय = उसका वध करने के लिए,
कोपम् अकरोत् = क्रोध किया ।।२८।।

मन्त्र

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ।।२९।।

पदच्छेद

सा क्षिप्त्वा तस्य वै पाशम् तम् बबन्ध महा-सुरम् ।
तत्याज माहिषम् रूपम् सः अपि बद्धः महा-मृधे ।।२९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

महामृधे = उस महायुद्ध में,
सा = भगवती ने,
पाशम् = पाश,
क्षिप्त्वा = फेंक कर,
तम् महासुरम् = उस महादैत्य को,
बबन्ध = बाँध दिया,
सः अपि = उसने भी,
बद्धः = बाँधने के बाद,
तस्य = अपना,
माहिषम् रूपम् वै = भैंसे का रूप,
तत्याज = छोड़ दिया ।।२९।।

मन्त्र

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ।।३०।।

पदच्छेद

ततः सिंहः अभवत् सद्यः यावत् तस्य अम्बिका शिरः ।
छिनत्ति तावत् पुरुषः खड्ग-पाणिः अदृश्यत ।।३०।।

अन्वित-पदार्थ

ततः = इसके बाद,
सद्यः = तुरन्त,
सिंहः = सिंह,
अभवत् = हो गया,
यावत् = जब तक,
अम्बिका = अम्बिका,
तस्य = उसका,
शिरः = सिर,
छिनत्ति = काटती,
तावत् = तब तक,
खड्गपाणिः = तलवार धारी,
पुरुषः = पुरुष के रूप में,
अदृश्यत = दिखाई दिया ।।३०।।

मन्त्र

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्गचर्मणा सार्द्धं ततः सोऽभून्महागजः ।।३१।।

पदच्छेद

तत एव आशु पुरुषम् देवी चिच्छेद सायकैः ।
तम् खड्ग-चर्मणा सार्द्धम् ततः सः अभूत् महा-गजः ।।३१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तत एव = तभी,
देवी = भगवती ने,
आशु = तुरन्त,
तम् = उस,
पुरुषम् = पुरुष को,
खड्गचर्मणा = तलवार एवं ढाल,
सार्द्धम् = के साथ,
सायकैः = बाणों से,
चिच्छेद = काट डाला,
ततः सः = तब वह,
महागजः = विशालकाय हाथी,
अभूत् = बन गया ।।३१ ।।

मन्त्र

करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ।।३२ ।।

पदच्छेद

करेण च महा-सिंहम् तम् चकर्ष जगर्ज च ।
कर्षतः तु करम् देवी खड्गेन निर्-अकृन्तत ।।३२ ।।

अन्वित-पदार्थ

तम् च = और उस,
महासिंहम् = भगवती के वाहन विशाल सिंह को,
करेण = सूँड से,
चकर्ष = पकड़ कर खींचा,
जगर्ज च = तथा गरजने लगा,
कर्षतः = खींचते समय,
करम् तु = उसकी सूँड को,
देवी = भगवती ने,
खड्गेन = खड्ग से,
निरकृन्तत = काट दिया ।।३२ ।।

मन्त्र

ततो महासुरो भूयो माहिषं वपुरास्थितः ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ।।३३ ।।

पदच्छेद

ततः महा-सुरः भूयः माहिषम् वपुः आ-स्थितः ।
तथा एव क्षोभयामास त्रैलोक्यम् स चर अचरम् ।।३३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः =तब,
महासुरः = महादानव ने,
भूयः = विशाल,
माहिषम् = भैंसे का,
वपुः = शरीर,
आस्थितः = धारण कर लिया,
तथा एव = और उसी प्रकार,
स चर अचरम् = जड़ चेतन सहित,
त्रैलोक्यम्= तीनों लोकों को,
क्षोभयामास = व्यथित किया ।।३३ ।।

मन्त्र

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ।।३४ ।।

पदच्छेद

ततः क्रुद्धा जगन्माता (जगतः माता) चण्डिका पानम् उत्तमम् ।
पपौ पुनः पुनः च एव जहास अरुणलोचना ।।३४ ।।

अन्वित-पदार्थ

ततः = इसके पश्चात्,
जगतः = संसार की,
माता = जननी,
चण्डिका = चण्डिका देवी ने,
पुनः पुनः = कई बार,
उत्तमम् पानम् = उत्तम पेय द्रव्य का,
पपौ = पान किया,
अरुणलोचना च = और लाल आँखों वाली भगवती ने,
क्रुद्धा एव = क्रोधित भाव में ही,
जहास = अट्टहास किया ।।३४ ।।

मन्त्र

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ।।३५ ।।

पदच्छेद

ननर्द च अ-सुरः सः अपि बल-वीर्य-मद-उद्धतः ।
विषाणाभ्याम् च चिक्षेप चण्डिकाम् प्रति भू-धरान् ।।३५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सः = वह,
असुरः = असुर,
अपि = भी,
बलवीर्यमदैः च = शक्ति, सामर्थ्य और घमण्ड के कारण,
उद्धतः = उन्मत्त हो कर,
ननर्द = कूदने लगा,
विषाणाभ्याम् च = और अपनी सींगों से,
भूधरान् = पहाड़ों को,
चण्डिकाम् प्रति = चण्डिका की ओर,
चिक्षेप = फेंकने लगा ।।३५ ।।

मन्त्र

सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ।।३६ ।।

पदच्छेद

सा च तान् प्र-हितान् तेन चूर्णयन्ती शर उत्करैः ।
उवाच तम् मद उद्धूतमुखराग आकुलाक्षरम्
(मदेन उद्धूतमुखरागात् आकुलाक्षरम्) ।।३६ ।।

अन्वित-पदार्थ

सा च = और वे,
तेन = उसके द्वारा,
प्रहितान् = फेंके हुए,
तान् = उन पहाड़ों को,
शरोत्करैः = बाणों के बौछारों से,
चूर्णयन्ती = चूर करती हुई,
मदेन = क्रोध के मद से,
उद्धूतमुखरागात् = तमतमाए हुए मुख से,
तम् = उससे,
आकुलाक्षरम् = तीखे वचन,
उवाच = बोलीं ।।३६ ।।

मन्त्र

देव्युवाच ।।३७ ।।

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ।।३८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

देवी उवाच ।।३७।।

गर्ज गर्ज क्षणम् मूढ ! मधु यावत् पिबामि अहम्।

मया त्वयि हते अत्र एव गर्जिष्यन्ति आशु देवताः ।।३८।।

अन्वित-पदार्थ

देवी उवाच = देवी बोलीं ।।३७।।

मूढ != रे मूर्ख !,

क्षणम् = कुछ देर,

गर्ज गर्ज = गर्ज ले,

यावत् = जब तक,

अहम् = मैं,

मध = मधु,

पिबामि = पीती हूँ,

मया = मेरे द्वारा,

त्वयि = तेरे,

हत = मारे जाने पर,

अत्र एव = यहीं,

आश = शीघ्र ही,

देवताः = देवता गण,

गर्जिष्यन्ति = प्रसन्नता से गरजेंगे ।।३८।।

मन्त्र

ऋषिरुवाच ।।३९।।

एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम्।

पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ।।४०।।

पदच्छेद

ऋषिः उवाच ।।३९।।

एवम् उक्त्वा सम्-उत्पत्य सा आ-रूढा तम् महा-सुरम्।

पादेन आ-क्रम्य कण्ठे च शूलेन एनम् अताडयत् ।।४०।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले कि ।।३९।।

सा = उन भगवती ने,

पादेन = अपने पैरों से,

आक्रम्य = कुचल कर,

आरूढा = उसके ऊपर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवम् = इस प्रकार,
उक्त्वा = कह कर,
समुत्पत्य = उछल कर,
तम् = उस,
महासुरम् = महादानव को,
चढ़कर,
कण्ठे च = और गले पर,
एनम् = इस राक्षस को,
शूलेन = भाले से,
अताडयत् = मारा ।।४० ।।

मन्त्र

ततः सोऽपि पदाऽऽक्रान्तः तया निजमुखात्ततः ।
अर्धनिष्क्रान्त एवासीद् देव्या वीर्येण संवृतः ।।४१ ।।

पदच्छेद

ततः सः अपि पदा-क्रान्तः तया निज-मुखात् ततः ।
अर्ध-निस्-क्रान्तः एव आसीत् देव्या वीर्येण संवृतः ।।४१ ।।

अन्वित-पदार्थ

ततः = भाले की चोट लगने के बाद,
अति वीर्येण = अतिशय बल से,
संवृतः = सम्पन्न,
तया = उन,
देव्या = भगवती चण्डी के,
पदाक्रान्तः अपि = पैरों से दबे होने पर भी,
सः = वह महिषासुर,
ततः निजमुखात् = अपने मुख से,
अर्धनिष्क्रान्तः एव = आधा बाहर निकला हुआ ही,
आसीत् = था ।।४१ ।।

मन्त्र

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्त्वा निपातितः ।।४२ ।।

पदच्छेद

अर्ध-निस्-क्रान्तः एव असौ युध्यमानः महा-सुरः ।
तया महा असिना देव्या शिरः छित्त्वा निपातितः ।।४२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

असा = वह,
महासुरः = महाराक्षस,
अर्धनिष्क्रान्तः एव = आधा निकला हुआ ही,
युध्यमानः = युद्ध कर रहा था,
तया = उसी अवस्था में उन,
देव्या = देवी ने,
महा असिना = अपने विशाल खड्ग से,
शिरः छित्त्वा = सिर काट कर,
निपातितः = धराशायी कर दिया।।४२।।

मन्त्र

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्।
प्रहर्षं च परं जग्मुः सकला देवतागणाः।।४३।।

पदच्छेद

ततः हा-हा-कृतम् सर्वम् दैत्य-सैन्यम् ननाश तत्।
प्र-हर्षम् च परम् जग्मुः सकला देवता-गणाः।।४३।।

अन्वित-पदार्थ

ततः = इसके बाद,
हा-हा-कृतम् = हाहाकार करती हुई,
तत् = वह,
सर्वम् = सारी,
दैत्य-सैन्यम् = दानवों की सेना,
ननाश = नष्ट हो गई,
सकला च = और सभी,
देवतागणाः = देवता गण,
परम् = अत्यधिक,
प्रहर्षम् जग्मुः =प्रसन्न हो गए।।४३।।

मन्त्र

तुष्टुवुस्तां सुरा देवीं सह दिव्यैः महर्षिभिः।
जगुः गन्धर्वपतयो ननृतुः चाप्सरोगणाः।।४४।।

पदच्छेद

तुष्टुवुः ताम् सुराः देवीम् सह दिव्यैः महा-ऋषिभिः।
जगुः गन्धर्व-पतयः ननृतुः च अप्सरः गणाः।।४४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सुराः = देवतागण,
सह दिव्यैः महर्षिभिः = दिव्य महर्षियों के साथ,
ताम् देवीम् = उस महादेवी के पास,
जगुः = गए,
तुष्टुवुः = एवं उनका स्तवन किया,
गन्धर्वपतयः = गन्धर्वों के राजा,
अप्सरः गणाः च = और अप्सराएँ,
ननृतुः = नाचने लगीं ।।४४ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
महिषासुरवधो नाम तृतीयोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अथ चतुर्थोऽध्यायः ।।

मन्त्र

ॐ ऋषिरुवाच ।। १ ।।

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ।।२ ।।

पदच्छेद

ॐ ऋषिः उवाच ।।१ ।।

शक्र-आदयः सुर-गणाः निहते अति-वीर्ये
तस्मिन् दुर्-आत्मनि सुरारि-बले च देव्या ।
ताम् तुष्टुवुः प्र-णति-नम्र शिरोधर-अंसाः
वाग्भिः प्र-हर्ष पुलक-उद्गम-चारु-देहाः ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
तस्मिन् = उस,
अतिवीर्ये = अत्यन्त प्रतापी,
दुरात्मनि = दुरात्मा महिषासुर,
सुरारिबले च = तथा देवघातिनी असुरों की सेना के,
देव्या = भगवती द्वारा,
निहते = मारे जाने पर,
प्रणतिनम्रशिरोधरांसाः = नमन के कारण झुके हुए ग्रीवा एवं कन्धोंवाले,
प्रहर्षपुलकोद्गमचारुदेहाः = आनन्द के रोमाञ्च से अलंकृत शरीरवाले,
शक्रादयः = इन्द्र आदि,
सुरगणाः = देवतागण,
ताम् = उन परा शक्ति का,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाग्भिः = दिव्य वाणी से,

तुष्टुवुः = स्तुति करने लगे ।।२ ।।

मन्त्र

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ।।३ ।।

पदच्छेद

देव्या यया ततम् इदम् जगतः आत्म-शक्त्या
निः-शेष-देव-गण-शक्ति-समूह-मूर्त्या ।
ताम् अम्बिकाम् अखिल-देव-महा-ऋषि-पूज्याम्
भक्त्या नताः स्म वि-दधातु शुभानि सा नः ।।३ ।।

अन्वित-पदार्थ

निःशेष-देवगण-शक्तिसमूह-मूर्त्या = सम्पूर्ण देवताओं की शक्तियों या अधिकारों के समृद्धि के लिए अवतरित,

देव्या = जिन भगवती की,

आत्मशक्त्या = स्वरूप शक्ति से,

इदम् जगत् = यह दृश्यमान् सतत गतिशील विश्व,

ततम् = विनिर्मित है,

ताम् = उन,

अखिल-देव-महर्षि-पूज्याम् = देवताओं एवं महर्षियों की उपास्या,

अम्बिकाम् = अम्बिका के प्रति हम,

भक्त्या = भक्ति से,

नताः = प्रणत,

स्मः = हैं,

सा = वह परमेश्वरी,

नः = हमारे लिए,

शुभानि = शुभ तत्त्वों को,

विदधातु = उपलब्ध कराएँ ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

यस्याः प्रभावमतुलं भगवानन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ।।४ ।।

पदच्छेद

यस्याः प्र-भावम् अ-तुलम् भगवान् अन्-अन्तः
ब्रह्मा हरः च न हि वक्तुम् अलम् बलम् च ।
सा चण्डिका अखिल-जगत्-परि-पालनाय
नाशाय च अशुभ-भयस्य मतिम् करोतु ।।४ ।।

अन्वित-पदार्थ

यस्याः = जिनके,
अतुलम् = अतुलनीय,
प्रभावम् = प्रभुत्व,
बलम् च = तथा शक्ति को,
भगवान् अनन्तः = भगवान् विष्णु,
ब्रह्मा = ब्रह्मा,
हरः च = और शिव,
न हि वक्तुम् अलम् = बताने में समर्थ नहीं हैं,
सा चण्डिका = वह देवी चण्डिका,
अखिलस्य = सम्पूर्ण,
जगतः = संसार की,
परिपालनाय = समग्र रक्षा के लिए,
अशुभस्य च भयस्य = तथा अनिष्टकारी भय के,
नाशाय = विनाश के लिए,
मतिम् = अपना संकल्प उत्पन्न,
करोतु = करें ।।४ ।।

मन्त्र

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

या श्रीः स्वयम् सु-कृतिनाम् भवनेषु अ-लक्ष्मीः
पापात्मनाम् कृत-धियाम् हृदयेषु बुद्धिः ।
श्रद्धा सताम् कुल-जन-प्र-भवस्य लज्जा
ताम् त्वाम् नताः स्म परि-पालय देवि विश्वम् ।।५ ।।

अन्वित-पदार्थ

या स्वयम् = जो परमेश्वरी स्वयं साक्षात्,
सुकृतिनाम् = सुकर्म या शास्त्रों द्वारा विहित कर्म करनेवालों के,
भवनेषु = घरों में,
श्रीः = तीनों कालों में, शान्ति एवं समृद्धि रूपा हैं,
पापात्मनाम् = कुकर्मियों के घर में,
अलक्ष्मीः = दरिद्रता, कलह, आलस्य आदि रूप में,
कृतधियाम् = निर्मल अन्तःकरणवालों के,
हृदयेषु = हृदयों में,
बुद्धिः = असत्-तिरस्कारिणी एवं तत्त्वग्रहिणी बुद्धि या समझ के रूप में,
सताम् हृदयेषु = उचित मार्ग पर चलनेवालों के हृदय में,
श्रद्धा = परम्परा से प्राप्त तत्त्वज्ञान में विश्वास-रूपिणी,
कुलजनप्रभवस्य = उत्तम परिवारों में जन्म लेनेवाले में,
लज्जा = लज्जा रूपिणी हैं,
ताम् = ऐसी,
त्वाम् = पराशक्ति आपके प्रति,
नताः = हम प्रणत,
स्मः = हैं,
देवि = हे अम्बिके,
विश्वम् = सम्पूर्ण विश्व का,
परिपालय = आप समुचित रूप में संरक्षण करें ।।५ ।।

मन्त्र

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ।।६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

किम् वर्णयामः तव रूपम् अ-चिन्त्यम् एतत्
किम् च अति-वीर्यम् अ-सुर क्षय-कारि भूरि।
किम् च आहवेषु चरितानि तव अद्भुतानि
सर्वेषु देवि अ-सुर देव गण आदिकेषु ।।६ ।।

अन्वित-पदार्थ

देवि = हे अम्बे भगवती,
असुरेष = मधु-कैटभ, महिष आदि दैत्यों,
देवेषु = शिव, विष्णु, ब्रह्मा,
गणेषु = प्रथम समूहों के रूप में आपके गणों,
आदिकेषु = ऋषि सिद्ध प्रभृति दिव्यों में भी,
एतत् तव रूपम् = यह आपका परात्पर रूप,
अचिन्त्यम् = सोच से परे है,
किं वर्णयामः = हम क्या वर्णन करें, यह स्तुति आपाततः वर्णन परक मात्र है,
किं च भूरि = क्या आपका महान्,
असुरक्षयकारि = असुर संहारक,
अतिवीर्यम् = परम सामर्थ्य,
किं च = क्या,
सर्वेषु = सभी युद्धों में,
तव = आपका,
अद्भुतानि = आश्चर्यकारक, चमत्कारक,
चरितानि = आचरण,
किं वर्णयामः = सभी तो हमारे लिए कल्पनातीत है, हम क्या वर्णन करें।।६ ।।

मन्त्र

हेतुः समस्तजगतां त्रिगुणापि दोषैर्न
ज्ञायसे हरिहरादिभिरप्यपारा।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ।।७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

हेतुः समस्त-जगताम् त्रि-गुणा अपि दोषैः न
ज्ञायसे हरि-हर-आदिभिः अपि अ-पारा।
सर्व-आश्रया अ-खिलम् इदम् जगद् अंश-भूतम्
अ-व्याकृता हि परमा प्रकृतिः त्वम् आद्या ।।७।।

अन्वित-पदार्थ

त्रिगुणा = सत्त्व, रजस्,तमस् स्वरूपिणी आप,
समस्त जगताम् हेतुः = सम्पूर्ण जगत् के उद्भव, स्थिति एवं संहार की कारण हैं,
अपि दोषैः = तब भी लघुता, राग, आवरण आदि दोषों के माध्यम से,
न ज्ञायसे = नहीं जानी जातीं, क्योंकि उनसे मुक्त हैं,
हरिणा = विष्णु द्वारा,
हरेण = शिव द्वारा,
एव आदिभिः = ब्रह्मा आदि देवताओं द्वारा,
अपारा अपि = अज्ञेय होकर भी,
सर्वाश्रया = विश्व की अधिष्ठान हैं,
इदम् = यह,
अखिलम् = सारा अनन्त कोटि ब्रह्माण्ड रूप,
जगत् = संसार,
अंशभूतम् = आपका अंशमात्र है,
त्वं हि = आप तो,
अव्याकृता = अस्पष्ट,
आद्या = प्रथम,
परमा = परा,
प्रकृतिः = प्रकृति हैं।।७।।

मन्त्र

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ।।८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

यस्याः समस्ता सुरता समुदीरणेन
तृप्तिम् प्रयाति सकलेषु मखेषु देवि।
स्वाहा असि वै पितृ-गणस्य च तृप्ति-हेतुः
उच्चार्यसे त्वम् अतः एव जनैः स्वधा च ।।८।।

अन्वित-पदार्थ

देवि ! = हे भगवति !,
स्वाहा = आप स्वाहा की ध्वनि,
असि = हैं,
यस्याः = जिसके,
समुदीरणेन = उचित उच्चारण से,
समस्ता = सम्पूर्ण,
सुरता = देवत्व,
सकलेषु = सभी,
मखेषु = यज्ञों में,
तृप्तिम् = तृप्ति,
प्रयाति = प्राप्त करता है,
त्वम् च वै = और आप ही,
पितृगणस्य = पितरों के,
तृप्तिहेतुः = तर्पण की कारणभूता शक्ति हैं,
अतः एव च = तथा इसी कारण,
जनैः = लोगों द्वारा,
स्वधा = स्वधा ध्वनि रूप में,
उच्चार्यस = उच्चारित की जाती हैं ।।८।।

मन्त्र

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ।।९।।

पदच्छेद

या मुक्तेः हेतुः अ-विचिन्त्य-महा-व्रता त्वम्
अभि-अस्यसे सुनियत-इन्द्रिय-तत्त्वसारैः।
मोक्ष-अर्थिभिः मुनिभिः अस्त-समस्त-दोषैः
विद्या असि सा भगवती परमा हि देवि ।।९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

देवि = हे देवि !,
या = जो,
अविचिन्त्यमहाव्रता = अचिन्त्य महाव्रतधारिणी,
मुक्तेः = मोक्ष की,
हेतुः = कारण रूपिणी,
त्वम् = आप,
सुनियतेन्द्रियात् = सम्यक्तया इन्द्रियनिग्रह के कारण,
तत्त्वसारैः = तत्त्वस्वरूप,
अस्तसमस्तदोषैः = समस्तदोषविहीन,
मोक्षस्य = मोक्ष को,
अर्थिभिः = चाहनेवाले,
मुनिभिः = मुनियों द्वारा,
अभ्यस्यसे = उपासित होती हैं,
सा हि = आप वही,
भगवती = ऐश्वर्यमयी,
परमा = परा,
विद्या = शक्ति,
असि = हैं ।।९ ।।

मन्त्र

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भव भावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ।।१० ।।

पदच्छेद

शब्द-आत्मिका सु-विमल-ऋग्-यजुषाम् निधानम्
उद्गीथ-रम्य-पद-पाठवताम् च साम्नाम् ।
देवी त्रयी भगवती भव-भावनाय
वार्ता च सर्व-जगताम् परम-आर्तिहन्त्री ।।१० ।।

अन्वित-पदार्थ

भवभावनाय = संसार की सतत प्रवृत्ति के लिए जो परमेश्वरी,
शब्दात्मिका = शब्दरूपा हैं,
सुविमलानाम् = दोषविहीन,
निधानम् = अधिष्ठानरूपिणी,
देवी त्रयी = देदीप्यमान वेदत्रयी हैं,
सर्वजगताम् = तथा सम्पूर्ण जगत् के,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋचाम् = स्तुतियों,
यजुषाम् = यज्ञविधायक मन्त्रों,
उद्गीथेन = तथा गान के कारण,
रम्यैः = रमणीय,
पदैः = पद समूहों से,
पाठवताम् साम्नाम् च = पढ़े जानेवाले साम मन्त्रों की,
परमार्तिहन्त्री = कष्टों के निवारण की सर्वोच्च प्रकट सत्ता,
वार्ता च (असि) = (कृषि, वाणिज्य, पशुपालन आदि विकास की प्रक्रिया रूपिणी) एवं प्राणियों के जीवन यापन, की हेतु रूपा हैं ।।१० ।।

मन्त्र

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ।।११ ।।

पदच्छेद

मेधा असि देवि विदिता अ-खिल-शास्त्र-सारा
दुर्गा असि दुर्ग-भव-सागरस्य नौः अ-सङ्गा ।
श्रीः कैटभारि-हृदय-एक कृत-अधि-वासा
गौरी त्वम् एव शशिमौलि-कृत-प्रतिष्ठा ।।११ ।।

अन्वित-पदार्थ

देवि = हे पराम्बा आप,
विदिताखिलशास्त्रसारा = समस्त शास्त्रों के तत्त्वों को जाननेवाली,
मेधा = मेधा धारणात्मिका बुद्धि,
असि = हैं,
असंगा = बिना किसी नाव आदि साधनों के चलनेवाली,
दुर्गा = दुष्प्राप्य,
असि = हैं,
कैटभारेः = भगवान विष्णु के
हृदयैककृताधिवासा = हृदय में एकमात्र निवास करनेवाली,
श्रीः असि = लक्ष्मी हैं,
त्वं एव = आप ही,
शशिमौलि = चन्द्रचूड शिव में,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गभवसागरनौः = दुस्तर संसार सागर को पार करानेवाली ज्ञान नौका हैं अतः,

कृतप्रतिष्ठा = अर्धांग रूप में विराजमान,

गौरी असि = गौरी हैं ।।११।।

मन्त्र

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ।।१२।।

पदच्छेद

ईषत् स-हासम् अ-मलम् परि-पूर्ण-चन्द्र-
बिम्ब-अनुकारि कनक-उत्तम-कान्ति-कान्तम् ।
अति-अद्भुतम् प्रहृतम् आत्त-रुषा तथा अपि
वक्त्रम् वि-लोक्य सहसा महिषासुरेण ।।१२।।

अन्वित-पदार्थ

ईषत् सहासम् = मन्द मुस्कानवाला,

अमलम् = निर्दोष,

परिपूर्णचन्द्रस्य = सर्वथा पूर्ण चन्द्रमा के,

बिम्बानुकारि = बिम्ब की उपमावाला,

कनकोत्तमकान्तिकान्तम् = उत्तम सोने की कान्ति के समान ज्योति,

वक्त्रम् = यह मुख मण्डल,

विलोक्य अपि = देखकर भी आपके ऊपर,

आत्तरुषा = क्रोधपूर्वक,

महिषासुरेण = महिषासुर द्वारा,

तथा = ऐसा भीषण,

प्रहृतम् = प्रहार किया गया था,

अत्यद्भुतम् = यह महान् आश्चर्यजनक रहस्य है ।।१२।।

मन्त्र

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ।।१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

दृष्ट्वा तु देवि कुपितम् भ्रुकुटी-करालम्
उद्यत्-शशाङ्क-सदृश-छवि यत् न सद्यः ।
प्राणान् मुमोच महिषः तत् अति इव चित्रम्
कैः जीव्यते हि कुपित-अन्तक-दर्शनेन ।।१३।।

अन्वित-पदार्थ

देवि = हे देवि आपका,
भ्रुकुटीकरालम् = भौहों की तिरछी होने के कारण भीषण,
उद्यत्-शशांकच्छवि = उदयकालीन लाल चन्द्रमा की शोभावाला,
कुपितम् = क्रोधित मुख मण्डल,
दृष्ट्वा = देखकर,
यत् = जो,
महिषः = महिषासुर ने,
सद्यः = तुरन्त,
प्राणान् = प्राणों को,
न मुमोच = नहीं त्याग दिया था,
तत् = वह,
अतीव चित्रम् = अत्यन्त आश्चर्यकारक है,
कुपितान्तक दर्शनेन = क्रोधित काल को सामने देखकर,
कैः = कौन,
जीव्यते = जीवित रह पाता है ।।१३।।

मन्त्र

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ।।१४।।

पदच्छेद

देवि प्रसीद परमा भवती भवाय
सद्यः वि-नाशयसि कोप-वती कुलानि ।
वि-ज्ञातम् एतत् अधुने एव यत् अस्तम् एतत्
नीतम् बलम् सु-विपुलम् महिषासुरस्य ।।१४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

देवि = हे परमेश्वरी,
भवती = आप,
परमा = सर्वोच्च अनुग्रह शालिनी,
भवाय = हमारे सतत् संरक्षण, अभ्युन्नति के लिए,
प्रसीद = प्रसन्न रहें,
कोपवती = क्योंकि कोप की अवस्था में,
सद्यः = तुरन्त ही,
कुलानि = सारे कुलों का,
विनाशयति = विनाश कर देती हैं,
एतत् = यह तथ्य,
अधुना = अभी-अभी,
एव = ही,
विज्ञातम् = हमने जाना है,
यत् = कि,
महिषासुरस्य = महिषासुर का,
सुविपुलम् = विशाल,
बलम् = सैन्य बल कोप के कारण आपने,
अस्तम् नीतम् = समाप्त कर दिया ।।१४ ।।

मन्त्र

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ।।१५ ।।

पदच्छेद

ते सम्-मताः जन-पदेषु धनानि तेषाम्
तेषाम् यशांसि न च सीदति धर्म-वर्गः ।
धन्याः ते एव निभृत-आत्मज-भृत्य-दाराः
येषाम् सदा अभि-उदयदा भवती प्रसन्ना ।।१५ ।।

अन्वित-पदार्थ

जनपदेषु = समाज में,
ते = वे लोग ही,
सम्मताः = सम्मानित हैं,
धनानि = सभी प्रकार की सम्पत्तियाँ,
च न सीदति = शिथिल नहीं होतीं,
ते एव = वे ही,
निभृतात्मजभृत्यदाराः = पुत्र, परिजन, पत्नी से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेषाम् = उन्हीं की हैं,
यशांसि = सब प्रकार का यश,
तेषाम् = उन्हीं को मिलता है,
धर्मवर्गः = तथा
धर्मसम्मत क्रियाएँ,
धन्याः = सम्पन्न रहते हैं,
येषां सदा अभि-उदयदा
भवती प्रसन्ना = जिनके प्रति
सदा उन्नति करनेवाली आप
प्रसन्न रहती हैं ।।१५ ।।

मन्त्र

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवती प्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ।।१६ ।।

पदच्छेद

धर्म्याणि देवि स-कलानि सदैव कर्माणि
अति-आदृतः प्रति-दिनम् सु-कृती करोति ।
स्वर्गम् प्रयाति च ततः भवती प्र-सादात्
लोक-त्रये अपि फल-दा ननु देवि तेन ।।१६ ।।

अन्वित-पदार्थ

देवि = हे ! भगवती, आप
जिससे प्रसन्न हों उसके,
सकलानि = सम्पूर्ण,
कर्माणि = कर्म,
धर्म्याणि = धर्मानुकूल होते हैं,
सदैव = सदा ही,
अत्यादृतः = अत्यन्त आदर
प्राप्त करता है,
प्रतिदिनम् = प्रतिदिन, सर्वदा,
सुकृती = अच्छे कार्य ही,
करोति = करता है,
ततः च = और इसके बाद,
(मृत्यु के बाद),
भवती = आपकी ही,
प्रसादात् = प्रसन्नता के कारण,
स्वर्गम् = स्वर्ग,
प्रयाति = जाता है,
देवि = हे देवि !,
तेन ननु = इससे स्पष्ट है कि,
लोकत्रये अपि = आप तीनों
ही लोकों में,
फलदा = फल प्रदान
करती हैं ।।१६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ।।१७।।

पदच्छेद

दुर्गे स्मृता हरसि भीतिम् अ-शेष-जन्तोः
स्वस्थैः स्मृता मतिम् अति-इव शुभाम् ददासि।
दारिद्र्य-दुःख-भय-हारिणि का त्वत् अन्या
सर्व (सर्वेषाम्) उप-कार-करणाय सदा आर्द्र-चित्ता ।।१७।।

अन्वित-पदार्थ

दुग = हे दुर्गे आप,
स्मृता = दैहिक, दैविक, भौतिक भय की अवस्था में स्मरण किए जाने पर,
अशेषजन्तोः = सभी प्राणियों के,
भीतम् = भय को,
हरसि = समाप्त करती हैं,
स्वस्थैः = आत्मनिष्ठ योगियों द्वारा,
स्मृता = स्मरण किए जाने पर,
अतीव शुभाम् = अत्यन्त कल्याणकारी,
मतिम् = बुद्धि,
ददासि = प्रदान करती हैं,
दारिद्यस्य = दरिद्रता का,
दुःखानाम् = दुःखों का,
भयानाम् = भयसमूह का,
हारिणि = हरण करनेवाली हे माता !,
सर्वेषाम् = सभी प्रकार का,
उपकाराणाम् = उपकार,
करणाय = करने के लिए,
सदा आर्द्रचित्ता = सर्वदा करुणा से पूर्ण हृदयवाली,
त्वदन्या = आपके अतिरिक्त,
का = कौन है, केवल आप ही हैं ।।१७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ।।१८।।

पदच्छेद

एभिः हतैः जगत् उप-एति सुखम् तथा एते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राम-मृत्युम् अधि-गम्य दिवम् प्र-यान्तु
मत्वा इति नूनम् अहितान् वि-नि-हंसि देवि ।।१८।।

अन्वित-पदार्थ

एभिः हतैः = इन दैत्यों के मारे जाने पर,
जगत् सुखम् = संसार सुख,
उपैति = प्राप्त करे,
चिराय = दीर्घ काल तक,
नरकाय = नरक के लिए,
पापं कुर्वन्तु = पाप करते रहें यह स्थिति थी,
संग्राममृत्युम् = तथापि युद्ध में वीरगति,
अधिगम्य = प्राप्त करके,
दिवम् = स्वर्गलोक ये दैत्य भी,
प्रयान्तु = जाएँ,
नूनम् = अवश्य ही,
इति मत्वा = यह सोचकर,
देवि = हे अम्बे आप,
अहितान् = सृष्टि के लिए अहितकर दैत्यों का,
विनिहंसि = विनाश रणभूमि में करती हैं ।।१८।।

मन्त्र

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ।।१९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

दृष्ट्वा एव किम् न भवती प्र-करोति भस्म
सर्वान् अ-सुरान् अरिषु यत् प्र-हिणोषि शस्त्रम्।
लोकान् प्र-यान्तु रिपवः अपि हि शस्त्र-पूताः
इत्थम् मतिः भवति तेषु अपि ते अति-साध्वी ।।१९ ।।

अन्वित-पदार्थ

भवती = आप,
सर्वान् असुरान् = सभी राक्षसों को,
दृष्ट्वा = देखने मात्र से ही,
भस्म = राख,
किं न प्रकरोति = क्यों नहीं कर देती हैं,
यत् = जो,
अरिषु = शत्रुओं पर,
शस्त्रम् = शस्त्र का,
प्रहिणोषि = प्रयोग करती हैं उसका कारण यह है कि,
रिपवः = शत्रुगण,
अपि = भी,
शस्त्रपूताः = आपके शस्त्रों से युद्ध में पवित्र होकर,
लोकान् = दिव्यलोकों के प्रति,
प्रयान्तु = जा सकें,
इत्थम् = इस प्रकार की,
तेषु अपि = उन शत्रुओं पर भी,
ते = आपकी,
अति साध्वी = अत्यन्त शुभ, कृपामयी,
मतिः = भावना,
भवति = होती है ।।१९ ।।

मन्त्र

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम्।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ।।२० ।।

पदच्छेद

खड्ग प्रभा-निकर-विस्-फुरणैः तथा उग्रैः
शूल-अग्र-कान्ति-नि-वहेन दृशः अ-सुराणाम्।
यत् न आ-गता वि-लयम् अंशु-मत् इन्दु-खण्ड-
योग्य-आननं तव विलोकयतां तत् एतत् ।।२० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

खड्गस्य = आपके खड्ग के,
प्रभायाः = प्रकाश के,
निकराणाम् उग्रैः = समूहों के तीक्ष्ण,
विस्फुरणैः =विस्फुरण से, चमक से,
तथा =इसी प्रकार,
शूलस्य = आपके शूल के,
अग्रस्य = अगले भाग या फाल की,
कान्तेः = चमक के,
निवहेन = पुंज से,
असुराणाम् = राक्षसों की,
दृशः = आँखें,
विलयम् = समाप्त,
यत् न आगताः = जो नहीं हो गईं उसका कारण था कि,
अंशुमत् = पूर्ण किरणों से युक्त,
इन्दोः = चन्द्रमा के,
खण्डने = रूप का खण्डन करने में,
योग्यम् = समर्थ,
यदेतत् = समक्ष जो यह,
तव आननम् = आपके अत्यन्त आह्लादकारक मुख को,
विलोकयताम् = निरन्तर देखनेवालों की आँखें नहीं नष्ट हो पाईं ।।२०।।

मन्त्र

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ।।२१।।

पदच्छेद

दुर्-वृत्त-वृत्त-शमनम् तव देवि शीलम्
रूपम् तथा एतत् अ-वि-चिन्त्यम् अ-तुल्यम् अन्यैः ।
वीर्यम् च हन्तृ-हृत-देव-पराक्रमाणाम्
वैरिषु अपि प्रकटिता एव दया त्वया इत्थम् ।।२१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तथा = इस प्रकार से,
देवि = हे देदीप्यमान अम्बे,
तव = आपका,
दुर्वृत्तवृत्तशमनम् = दुष्टों की जीवन शैली समाप्त करनेवाला,
शीलम् = स्वभाव,
एतत् च = और यह,
अविचिन्त्यम् = अकल्पनीय,
अन्यैः अतुल्यम् = किसी से भी जिसकी तुलना नहीं हो सकती,
रूपम् = ऐसा रूप,
हृतदेवपराक्रमाणाम् = जिन्होंने देवताओं का पराक्रम आत्मसात् कर लिया ऐसे पराक्रमी दैत्यों के,
हन्तृवीर्यम् = बल का नाश करनेवाली वीरता,
इत्थम् = इस तरह,
त्वया = आपके द्वारा,
वैरिषु अपि = शत्रुओं पर भी,
दया एव = दया ही,
प्रकटिता = प्रदर्शित की गई ।।२१ ।।

मन्त्र

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ।।२२ ।।

पदच्छेद

केन उपमा भवतु ते अस्य पर-आक्रमस्य
रूपम् च शत्रु-भय-कारि अति-हारि कुत्र ।
चित्ते कृपा समर-निष्ठुरता च दृष्टा
त्वयि एव देवि वरदे भुवन-त्रये अपि ।।२२ ।।

अन्वित-पदार्थ

ते = आपके,
अस्य = इस,
पराक्रमस्य = युद्ध बल की,
केन = किससे,
उपमा = तुलना,
कुत्र = कहाँ है ?,
देवि = हे देवि !,
वरदे = इच्छित वरदायिनी,
भुवनत्रये अपि = तीनों लोकों में भी,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतु = हो सकती है,
च = और,
शत्रुभयकारि = शत्रुओं के लिए भयानक,
अतिहारि रूपम् = किन्तु अत्यन्त मनोहर रूप,
चित्ते कृपा = हृदय में दया,
समरे निष्ठुरता = युद्ध में कठोरता,
त्वयि एव = आप में ही,
दृष्टा = दिखाई देती है ।।२२।।

मन्त्र

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ।।२३।।

पदच्छेद

त्रैलोक्यम् एतत् अ-खिलम् रिपु-नाशनेन
त्रातम् त्वया समर-मूर्धनि ते अपि हत्वा ।
नीताः दिवम् रिपु-गणाः भयम् अपि अप-अस्तम्
अस्माकम् उन्मद-सुर-अरि-भवम् नमः ते ।।२३।।

अन्वित-पदार्थ

त्वया = हे अम्बे आपके द्वारा,
रिपुनाशनेन = शत्रु विनाश के माध्यम से,
एतत् त्रैलोक्यम् = यह तीनों लोक,
त्रातम् = सुरक्षित हुए,
रिपुगणाः अपि = शत्रुगण भी,
समरमूर्धनि = रण स्थल में,
हत्वा = मर कर,
दिवम् नीताः = स्वर्ग ले जाए गये,
अस्माकम् = हम सभी का,
उन्मदसुरारिभवम् = मदान्ध राक्षसों द्वारा उत्पन्न,
भयम् = भय,
अपास्तम् = समाप्त हुआ,
ते = आपको,
नमः = प्रणाम समर्पित है ।।२३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ।।२४ ।।

पदच्छेद

शूलेन पाहि नः देवि पाहि खड्गेन चाम्बिके ।
घण्टा-स्वनेन नः पाहि चाप-ज्या-निः स्वनेन च ।।२४ ।।

अन्वित-पदार्थ

देवि = हे देवि !,
शूलेन = अपने शूल से,
खड्गेन = और खड्ग से,
नः पाहि = हमारी रक्षा कीजिए,
अम्बिके = हे अम्बिके !,
घण्टायाः स्वनेन = घण्टा के निनाद से,
चापज्यायाः = धनुष के प्रत्यञ्चा की,
निःस्वनेन च = टंकार के द्वारा,
नः पाहि = हमारी सुरक्षा कीजिए ।।२४ ।।

मन्त्र

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ।।२५ ।।

पदच्छेद

प्राच्याम् रक्ष प्रतीच्याम् च चण्डिके रक्ष दक्षिणे ।
भ्रामणेन आत्म-शूलस्य उत्तरस्याम् तथा ईश्वरि ।।२५ ।।

अन्वित-पदार्थ

चण्डिके = हे चण्डिका देवि !,
ईश्वरी = हे अधीश्वरी !,
आत्मनः शूलस्य = अपने शूल को,
भ्रामणेन = चारों दिशाओं में घुमाते हुए,
प्राच्याम् = पूर्व,
प्रतीच्याम् च = एवं पश्चिम दिशाओं में,
रक्ष = हमारी रक्षा करें,
दक्षिणे = दक्षिण में,
तथा = इसी प्रकार,
उत्तरस्यां रक्ष = उत्तर दिशा में रक्षा करें ।।२५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ।।२६ ।।

पदच्छेद

सौम्यानि यानि रूपाणि त्रैलोक्ये वि-चरन्ति ते ।
यानि च अति-अर्थेन घोराणि तैः रक्ष अस्मान् तथा भुवम् ।।२६ ।।

अन्वित-पदार्थ

ते = आपकी,
यानि = जितनी,
सौम्यानि = सुकोमल,
रूपाणि = स्वरूप,
यानि च = तथा जितनी,
अत्यर्थेन = अत्यन्त,
घोराणि = कराल मूर्तियाँ,
त्रैलोक्ये = तीनों लोकों में,
विचरन्ति = क्रियाशील हैं,
तैः = उन सभी के माध्यम से,
अस्मान् = हमारी,
तथा = इसी प्रकार,
भुवम् = लोक की,
रक्ष = रक्षा करें ।।२६ ।।

मन्त्र

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ।।२७ ।।

पदच्छेद

खड्ग-शूल-गदा-आदीनि यानि च अस्त्राणि ते अम्बिके ।
कर-पल्लव-सङ्गीनि तैः अस्मान् रक्ष सर्वतः ।।२७ ।।

अन्वित-पदार्थ

अम्बिके = हे अम्बिके माता !,
यानि = जितने,
ते = आपकी,
करपल्लवानाम् = अङ्गुलियों के,
सङ्गीनि = साथी,
खड्गशूलगदादीनि = तलवार, भाला, गदा आदि,
अस्त्राणि = आयुध हैं,
तैः = उनके माध्यम से,
अस्मान् = हमारी सभी ओर से रक्षा करें ।।२७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ऋषिरुवाच ।।२८ ।।

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ।।२९ ।।

पदच्छेद

ऋषिरुवाच ।।२८ ।।
एवम् स्तुता सुरैः दिव्यैः कुसुमैः नन्दन-उद्भवैः ।
अर्चिता जगताम् धात्री तथा गन्ध-अनु-लेपनैः ।।२९ ।।

अन्वित-पदार्थ

ऋषि उवाच = ऋषि बोले ।।२८ ।।
सुरैः = देवताओं द्वारा,
एवं स्तुता = इस प्रकार प्रार्थित,
नन्दने = नन्दन वन में,
उद्भवैः = उत्पन्न होनेवाले,
दिव्यैः कुसुमैः = दिव्य पुष्पों,
तथा = एवं,
गन्धैः = सुगन्धवाली सामग्रियों,
अनुलेपनैः = दिव्य उबटनों द्वारा,
अर्चिता = पूजित,
जगताम् = संसार का,
धात्री = पालन करनेवाली ।।२९ ।।

मन्त्र

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ।।३० ।।

पदच्छेद

भक्त्या समस्तैः त्रिदशैः दिव्यैः धूपैः तु धूपिता ।
प्र-आह प्र-सादेन सुमुखी समस्तान् प्र-णतान् सुरान् ।।३० ।।

अन्वित-पदार्थ

समस्तैः = सभी,
त्रिदशैः भक्त्या = देवताओं द्वारा भक्तिभाव से,
दिव्यैः = देवलोक के,
प्रसादसुमुखी = प्रसन्न मुख से,
समस्तान् = सभी,
प्रणतान् = प्रणाम के लिए विनम्र,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूपैः = धूपन पदार्थों से,
धूपिता = धूपित होकर,
सुरान् = देवगणों के प्रति,
प्राह = बोलीं ।।३० ।।

मन्त्र

देव्युवाच ।।३१ ।।

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।।३२ ।।

पदच्छेद

देव्युवाच ।।३१ ।।

व्रियताम् त्रिदशाः सर्वे यत् अस्मत्-तः अभि-वाञ्छितम् ।।३२ ।।

अन्वित-पदार्थ

देवी उवाच = भगवती बोलीं ।।३१ ।।
सर्वे = सभी,
त्रिदशाः = देवतागण,
यत् = जो,
अस्मत्तः = मुझसे,
अभिवाञ्छितम् = प्राप्त करना चाहते हो वह,
व्रियताम् = वर माँग लो ।।४२ ।।

मन्त्र

देवा उचुः ।।३३ ।।

भगवत्या कृतं सर्वं न किंचिदवशिष्यते ।।३४ ।।

पदच्छेद

देवाः उचुः ।।३३ ।।

भगवत्या कृतम् सर्वम् न किम्-चित् अव-शिष्यते ।।३४ ।।

अन्वित-पदार्थ

देवाः उचुः = देवतागणों ने कहा ।।३३ ।।
सर्वम् = सब कुछ,
भगवत्या = भगवती द्वारा,
कृतम् = किया जा चुका है,
किञ्चित् न = कुछ भी प्राप्तव्य नहीं,
अविशिष्यत = बचा है ।।३४ ।।

मन्त्र

यदयं निहतः शत्रुरस्माकं महिषासुरः ।
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ।।३५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

यत् अयम् निहतः शत्रुः अस्माकम् महिषासुरः ।
यदि च अपि वरः देयः त्वया अस्माकम् महा-ईश्वरि ।।३५ ।।

अन्वित-पदार्थ

महेश्वरि = हे अधीश्वरी !,
यत् = क्योंकि,
अस्माकम् = हमारा,
शत्रुः = शत्रु,
अयं महिषासुरः = यह महिषासुर,
निहतः = मारा गया उसके बाद कुछ प्राप्तव्य नहीं बचा,
अपि च = तथापि,
यदि = यदि,
त्वया = आपके द्वारा,
अस्माकम् = हमको,
वरः = वर,
देयः = दिया जाना है तो ।।३५ ।।

मन्त्र

संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ।।३६ ।।

पदच्छेद

सम्-स्मृता सम्-स्मृता त्वम् नः हिंसेथाः परम-आपदः ।
यः च मर्त्यः स्तवैः एभिः त्वाम् स्तोष्यति अमल-आनने ।।३६ ।।

अन्वित-पदार्थ

अमलानने = हे निर्मल मुखमण्डलवाली देवि !,
त्वम् = आप,
संस्मृता = स्मरण किये जाने पर,
नः = हम देवताओं का,
यः च = और जो,
मर्त्यः = मनुष्य,
एभिः = इन,
स्तवैः = स्तुतियों द्वारा,
त्वाम् = आपकी,
स्तोष्यति = प्रार्थना करेगा उसके,
संस्मृता = स्मरण करने पर,
परमापदः = कठिनतम आपत्तियों को,
हिंसेथाः = नष्ट कर डालें ।।३६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके।। ३७ ।।

पदच्छेद

तस्य वित्तेन ऋद्धिभिः वि-भवैः धन-दारा-आदि-सम्पदाम् ।
वृद्धये अस्मत् प्र-सन्ना त्वम् भवेथाः सर्वदा अम्बिके ।।३७ ।।

अन्वित-पदार्थ

अम्बिके = हे अम्बिके !,
अस्मात् प्रसन्ना = हम लोगों से प्रसन्न,
त्वम् = आपकी,
तस्य = उस भक्त के,
वित्तेन = ज्ञान,
ऋद्धिभिः = सम्पत्ति,
विभवैः = ऐश्वर्य के साथ,
धनदारादिसम्पदाम् = धन, स्त्री, पुत्र, क्षेत्र आदि सम्पत्तियों की,
वृद्धये = समृद्धि के लिए,
सर्वदा = सदा कृपा,
भवेथाः = बनी रहे ।।३७ ।।

मन्त्र

ऋषिरुवाच ।।३८ ।।

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽऽत्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ।।३९ ।।

पदच्छेद

ऋषिः उवाच ।।३८ ।।
इति प्र-सादिता देवैः जगतः अर्थे तथा आत्मनः ।
तथा-इति उक्त्वा भद्र-काली बभूव अन्तः-हिता नृप ।।३९ ।।

अन्वित-पदार्थ

ऋषिः उवाच = सुमेधा ऋषि बोले ।।३८ ।।
नृप = हे राजन् !,
जगतः = इस प्रकार
अर्थे = लाभ के लिए,
देवैः = देवगणों द्वारा,
प्रसादिता = प्रसन्न की हुई,
भद्रकाली = माता,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जगत् के,
तथा = तथा,
आत्मनः = अपने,
तथा = 'ऐसा ही हो',
इति उक्त्वा = यह कहकर अन्तर्धान हो गई ।।३९ ।।

मन्त्र

इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ।।४० ।।

पदच्छेद

इति एतत् कथितम् भूप सम्भूता सा यथा पुरा ।
देवी देव-शरीरेभ्यः जगत्-त्रयस्य हित-एषिणी ।।४० ।।

अन्वित-पदार्थ

भूप = हे राजन् !,
सा = वह,
जगत्त्रयस्य = तीनों लोकों का,
हितैषिणी = हित करनेवाली,
देवी = भगवती,
पुरा = प्राचीनकाल में,
यथा = जिस रूप में,
देवानाम् = देवताओं के,
शरीरेभ्यः = शरीरों से,
सम्भूता = प्रकट हुई थी,
इति एतत् = यह कथा जैसे की तैसी,
कथितम् = कही गई है ।।४० ।।

मन्त्र

पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ।।४१ ।।

पदच्छेद

पुनः च गौरी देहात् सा सम्-उद्-भूता यथा अभवत् ।
वधाय दुष्ट-दैत्यानाम् तथा शुम्भ-निशुम्भयोः ।।४१ ।।

अन्वित-पदार्थ

पुनः च = फिर से,
सा = वे महादेवी,
शुम्भनिशुम्भयोः = शुम्भ
वधाय = वध के लिए,
गौरी देहात् = गौरी के शरीर से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निशुम्भ,
यथा = जैसे,
दुष्टदैत्यानाम् = दुष्ट दानवों के,
यथा = जिस प्रकार,
समुद्भूता = प्रकट,
अभवत् = हुई थीं ।।४१ ।।

मन्त्र

रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाऽऽख्यातं यथावत्कथयामि ते ।।४२ ।।

पदच्छेद

रक्षणाय च लोकानाम् देवानाम् उपकारिणी ।
तत् शृणुष्व मया आख्यातम् यथावत् कथयामि ते ।।४२ ।।

अन्वित-पदार्थ

देवानाम् = देवताओं का,
उपकारिणी = कल्याण करनेवाली अम्बा,
लोकानाम् = संसार के,
रक्षणाय च = रक्षा के लिए जैसे प्रकट हुई थीं,
मया = मैने,
आख्यातम् = पूर्व में बताया है,
तत् = उस वृत्तान्त को,
यथावत् = ज्यों का त्यों,
ते कथयामि = तुम्हें बता रहा हूँ,
शृणुष्व = सुनो ।।४२ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। पञ्चमोऽध्यायः ।।

मन्त्र

ऋषिरुवाच ।। १ ।।

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ।।२ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।
पुरा शुम्भ-निशुम्भाभ्याम् असुराभ्याम् शचीपतेः ।
त्रैलोक्यम् यज्ञभागाः च हृताः मद-बल-आश्रयात् ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
पुरा = प्राचीन काल में,
शुम्भनिशुम्भाभ्याम् = शुम्भ और निशुम्भ नामक,
असुराभ्याम् = राक्षसों द्वारा,
शचीपतेः = इन्द्र से,
त्रैलोक्यम् = तीनों लोक,
यज्ञभागाश्च = तथा यज्ञ के भाग,
मदबलस्य = मदोन्मत्तता के,
आश्रयात् = कारण,
हृताः = छीन लिया गया था ।।२ ।।

मन्त्र

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च ।।३।।

पदच्छेद

तौ एव सूर्यताम् तद् वत् अधिकारम् तथा ऐन्दवम् ।
कौबेरम् अथ याम्यम् च चक्राते वरुणस्य च ।।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तौ = उन दोनों ने,
एव = ही,
सूर्यताम् = सूर्यत्व पर अधिकार कर लिया,
तद् वत् = इसी प्रकार,
ऐन्दवम् = चन्द्रत्व,
तथा = इसी प्रकार,
कौबेरम् = धनपतित्व,
अथ च = और,
याम्यम् = मृत्यु पर,
वरुणस्य च = और वरुण के जलतत्त्व पर,
अधिकारम् = कब्जा,
चक्राते = कर लिया था ।।३ ।।

मन्त्र

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ।।४ ।।

पदच्छेद

तौ एव पवन-ऋद्धिम् च चक्रतुः वह्नि-कर्म च ।
ततः देवाः वि-निः-धूताः भ्रष्ट-राज्याः पर-आ-जिताः ।।४ ।।

अन्वित-पदार्थ

तौ = उन दोनों ने,
एव = ही,
पवनस्य च = वायु की,
ऋद्धिम् = सम्पत्ति,
वह्निकर्म च = और आग के जलाने की शक्ति पर,
चक्रतुः = अधिकार कर लिया था,
ततः = उसके बाद,
पराजिताः = हारे हुए,
भ्रष्टराज्याः = अपने राज्य से हीन,
विनिर्धूताः = निष्कासित,
देवाः = देवतागण ।।४ ।।

मन्त्र

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ।।५ ।।

पदच्छेद

हृताः अधि-काराः त्रि-दशाः ताभ्याम् सर्वे निर्-आकृताः ।
महा-असुराभ्याम् ताम् देवीम् सम्-स्मरन्ति अ-परा-जिताम् ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ताभ्याम् = उन्हीं,
महासुराभ्याम् = विकट राक्षसों द्वारा,
सर्वे = सभी,
हृताः = छिने हुए,
अधिकाराः = अधिकारवाले,
निराकृताः = भगा दिए गए,
त्रिदशाः = देवतागण,
ताम् = उन्हीं,
अपराजिताम् = सदाविजेत्री,
देवीम् = देवी की,
संस्मरन्ति = याद कर रहे हैं ।।५ ।।

मन्त्र

तयास्माकं वरो दत्तो यथाऽऽपत्सु स्मृताखिलाः ।
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ।।६ ।।

पदच्छेद

तया अस्माकम् वरः दत्तः यथा आपत्सु स्मृता अखिला ।
भवताम् नाशयिष्यामि तत् क्षणात् परमाः आ-पदः ।।६ ।।

अन्वित-पदार्थ

तया = देवी अपराजिता के द्वारा,
अस्माकम् = हम लोगों को,
वरः = वर,
दत्तः = दिया गया है,
यथा = कि,
आपत्स = विपत्तियों में,
स्मृता = स्मरण करने पर,
भवताम् = आप लोगों की,
अखिला = अशेष,
परमापदः = कठिनतम विपत्ति का,
तत्क्षणात् = उसी क्षण;
नाशयिष्यामि = विनाश कर दूँगी ।।६ ।।

मन्त्र

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।
जग्मुस्तत्र ततो देवी विष्णुमायां प्रतुष्टुवुः ।।७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

इति कृत्वा मतिम् देवाः हिम-वन्तम् नग-ईश्वरम्।
जग्मुः तत्र ततः देवी विष्णु-मायाम् प्र-तुष्टुवुः ।।७।।

अन्वित-पदार्थ

देवाः = सभी देवतागण,
इति मतिम् = इस प्रकार का विचार,
कृत्वा = बना कर,
हिमवन्तं नगेश्वरम् = पर्वतराज हिमालय की ओर,
जग्मुः = चले गए,
ततः = इसके बाद,
तत्र = वहाँ,
देवीम् = भगवती,
विष्णुमायाम् = विष्णु की माया को,
प्रतुष्टुवुः = प्रसन्न किया ।।७।।

मन्त्र

देवा ऊचुः ।।८।।

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।।९।।

पदच्छेद

देवा ऊचुः ।।८।।
नमः देव्यै महा-देव्यै शिवायै सततम् नमः।
नमः प्र-कृत्यै भद्रायै नि-यताः प्र-णताः स्म ताम् ।।९।।

अन्वित-पदार्थ

देवा उचुः = देवता बोले ।।८।।
देव्यै = देवी को,
नमः = प्रणाम,
महादैव्यै = महादेवी,
शिवायै = शिवा को,
सततम् = सतत,
नमः = प्रणाम,
भद्रायै = कल्याण कारिणी,
प्रकृत्यै = प्रकृति को,
नमः = प्रणाम,
महासुरान् = महाराक्षसों का,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपरान् च = और कुछ दूसरों को,
जघान = संहार कर डाला ।।१६ ।।

मन्त्र

केषांचित्पाटयामास नखैः कोष्ठानि केसरी ।
तथा तलप्रहारेण शिरांसि कृतवान् पृथक्।। १७ ।।

पदच्छेद

केषाम्-चित् पाटयामास नखैः कोष्ठानि केसरी ।
तथा तल-प्र-हारेण शिरांसि कृत-वान् पृथक्।। १७ ।।

अन्वित-पदार्थ

केसरी = सिंह ने,
केषाञ्चित् = कुछ राक्षसों के,
कोष्ठानि = पेट को,
नखैः = नखों से,
पाटयामास = विदीर्ण कर दिया,
तथा = इसी प्रकार,
तलस्य = हथेली के,
प्रहारेण = चोट से,
शिरांसि = सरों को,
पृथक् = अलग,
कृतवान् = कर डाला ।।१७ ।।

मन्त्र

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ।।१८ ।।

पदच्छेद

वि-च्छिन्न-बाहु-शिरसः कृताः तेन तथा अ-परे ।
पपौ च रुधिरम् कोष्ठात् अन्येषाम् धुत-केसरः ।।१८ ।।

अन्वित-पदार्थ

तेन = उस सिंह के आक्रमणों से,
अपरे = कुछ दूसरे,
विच्छिन्नबाहुशिरसः = हथकटे तथा सरकटे,
तथा अन्येषाम् च = इसी प्रकार कुछ राक्षसों के,
कोष्ठात् = पेट फाड़कर,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृताः = बना दिए गए,
धुतकेसर = अयालों को झटककर सिंह ने,
रुधिरम् = खून,
पपौ = पी डाला ।।१८।।

मन्त्र

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ।।१९।।

पदच्छेद

क्षणेन तत् बलम् सर्वम् क्षयम् नीतम् महा-आत्मना ।
तेन केसरिणा देव्याः वाहनेन अति-कोपिना ।।१९।।

अन्वित-पदार्थ

तेन = उन,
अतिकोपिना = भयानक कोपाविष्ट,
देव्याः वाहनेन = भगवती के वाहन,
महात्मना = दिव्यात्मा,
केसरिणा = सिंह द्वारा,
तत् = वह,
सर्वम् = समस्त,
बलम् = सैन्यबल,
क्षणेन = कुछ पलों में,
क्षयम् = विनाश को,
नीतम् = पहुँचा दिया गया ।।१९।।

मन्त्र

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं कृत्स्नं देवी केसरिणा ततः ।।२०।।

पदच्छेद

श्रुत्वा तम् अ-सुरम् देव्या नि-हतम् धूम्रलोचनम् ।
बलम् च क्षयितम् कृत्स्नम् देवी-केसरिणा ततः ।।२०।।

अन्वित-पदार्थ

तम् = प्रतापी,
धूम्रलोचनम् = धूम्रलोचन,
असुरम् = राक्षस,
देवीकेसरिणा च = द्योतनशील सिंह द्वारा,
कृत्स्नम् = सम्पूर्ण,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देव्या = भगवती के हुंकार से,
निहतम् = मारा गया,
ततः = उसके बाद,
बलम् = सेना,
क्षयितम् = विनष्ट कर डाली गई,
श्रुत्वा = यह सुनकर ।।२० ।।

मन्त्र

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ।।२१ ।।

पदच्छेद

चुकोप दैत्यानाम् अधि-पतिः शुम्भः प्र-स्फुरित-अधरः ।
आज्ञापया-मास च तौ चण्ड-मुण्डौ महा-असुरौ ।।२१ ।।

अन्वित-पदार्थ

दैत्यानाम् = दैत्यों का,
अधिपतिः = स्वामी,
शुम्भः = शुम्भ,
चुकोप = अत्यन्त कुपित हो गया,
प्रस्फुरिताधरः च = और फड़कते हुए होठों से,
तौ = उन दोनों,
महासुरौ = महादैत्य,
चण्डमुण्डौ = चण्डमुण्ड को,
आज्ञापयामास = आज्ञा दी ।।२१ ।।

मन्त्र

हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ।
तत्र गच्छत गत्वा च सा समानीयतां लघु ।।२२ ।।

पदच्छेद

हे चण्ड हे मुण्ड बलैः बहुभिः परि-वारितौ ।
तत्र गच्छत गत्वा च सा समानीयताम् लघु ।।२२ ।।

अन्वित-पदार्थ

हे चण्ड हे मुण्ड = हे चण्ड मुण्ड तुम दोनों,
गच्छत = जाओ,
गत्वा च = एवं जाकर,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बहुभिः = ढेर सारी,
बलैः = सेनाओं से,
परिवारितौ = सुसज्जित होकर,
तत्र = वहाँ,
लघ = तुरन्त,
सा = उसे,
समानीयताम् = लेकर आओ ।।२२ ।।

मन्त्र

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ।।२३ ।।

पदच्छेद

केशेषु आ-कृष्य बद्ध्वा वा यदि वः सम्-शयः युधि ।
तदा अ-शेषैः आ-युधैः सर्वैः असुरैः वि-नि-हन्यताम् ।।२३ ।।

अन्वित-पदार्थ

केशेषु = बालों को पकड़,
आकृष्य = घसीटकर,
वा बद्ध्वा = अथवा बाँधकर लाओ,
यदि वा = अन्यथा अगर,
युधि = युद्ध जीतने में,
संशयः = सन्देह हो,
तदा = तो,
अशेषैः = सारे,
आयुधैः = हथियारों के प्रयोग करके,
सर्वैः = सभी,
असुरैः = राक्षसों के माध्यम से,
विनिहन्त्यताम् = मार डालो ।।२३ ।।

मन्त्र

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ।।२४ ।।

पदच्छेद

तस्याम् हतायाम् दुष्टायाम् सिंहे च वि-निपातिते ।
शीघ्रम् आ-गम्यताम् बद्ध्वा गृहीत्वा ताम् अथ अम्बिकाम् ।।२४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तस्याम् = उस,
दुष्टायाम् = दुष्टा के,
हतायाम् = मारे जाने पर,
सिंहे च = एवं सिंह के,
विनिपातिते = धराशायी कर दिये जाने पर,
अथ = अथवा,
ताम् = उस,
अम्बिकाम् = अम्बिका को,
गृहीत्वा = पकड़कर,
बद्ध्वा = सिंह को बाँधकर,
शीघ्रम् = तुरन्त,
आगम्यताम् = ले आओ ।।२४।।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये धूम्रलोचनसंहारोनाम षष्ठोऽध्यायः ।। ६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। सप्तमोऽध्यायः ।।

मन्त्र

ऋषिरुवाच ।। १ ।।

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ।। २ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।
आ-ज्ञप्ताः ते ततः दैत्या चण्ड-मुण्ड-पुरः-गमाः ।
चतुर्-अङ्गेण बलेन उप-इताः ययुः अभि-उद्यत-आ-युधाः ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
ततः = इसके पश्चात्,
आज्ञप्ताः = शुम्भ की आज्ञा पाकर,
चण्डमुण्डपुरोगमाः = चण्डमुण्ड के नेतृत्व में,
ते दैत्याः = वे सभी दैत्य,
चतुरङ्गेण = हाथी घोड़े रथ एवं पैदल,
बलेन = सेना से,
उपेताः = सुसज्जित होकर,
अभ्युद्यतायुधाः = शस्त्रों को युद्ध के लिए तैयार किये हुए,
ययुः = गए ।।२ ।।

मन्त्र

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ।।३ ।।

पदच्छेद

ददृशुः ते ततः देवीम् ईषत् हासाम् वि-अव-स्थिताम् ।
सिंहस्य उपरि शैलेन्द्र-शृङ्गे महति काञ्चने ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = तत्पश्चात्,
ते = उन राक्षसों ने,
महति = अत्यन्त ऊँचे,
काञ्चने = सुवर्णमय,
शैलेन्द्रस्य = पर्वतराज के,
शृङ्गे = शिखर पर,
सिंहस्य = सिंह के,
उपरि = ऊपर,
व्यवस्थिताम् = विराजमान,
ईषत् = थोड़ी,
हासाम् = मुस्कुराती हुई,
देवीम् = देदीप्यमान भगवती को,
ददृशुः = देखा ।।३ ।।

मन्त्र

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ।।४ ।।

पदच्छेद

ते दृष्ट्वा ताम् सम्-आ-दातुम् उद्-यमम् चक्रुः उद्-यताः ।
आ-कृष्ट-चाप-असि धराः तथा अन्ये तत् समीपगाः ।।४ ।।

अन्वित-पदार्थ

ते = उन राक्षसों ने,
ताम् = उस स्वरूप में भगवती को,
दृष्ट्वा = देखकर,
समादातुम् = उन्हें पकड़ने के लिए,
उद्यताः = उत्सुक होकर,
उद्यमम् = प्रयास,
चक्रुः = करने लगे,
अन्ये = दूसरे राक्षस,
आकृष्टचाप = धनुष खींचे हुए,
असिधराः = हाथों में तलवार लिये हुए,
तत् = उनके,
समीपगाः = निकट जाते हुए,
तथा = वैसा ही करने लगे ।।४ ।।

मन्त्र

ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ।
कोपेन चास्या वदनं मषीवर्णमभूत्तदा ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ततः कोपम् चकार उच्चैः अम्बिका तान् अरीन् प्रति ।
कोपेन च अस्याः वदनम् मषी-वर्णम् अभूत् तदा ।।५ ।।

अन्वित-पदार्थ

ततः = इस घटना के बाद, **चकार** = किया,
अम्बिका = अम्बिका ने, **तदा च** = और उस समय,
तान् = उन, **कोपेन** = कोप के कारण,
अरीन् = शत्रुओं के, **अस्याः** = इनका,
प्रति = प्रति, **वदनम्** = चेहरा,
उच्चैः = तीव्र, **मषीवर्णम्** = स्याही के रंग का,
कोपम् = क्रोध, **अभूत्** = हो गया ।।५ ।।

मन्त्र

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ।।६ ।।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ।।७ ।।
अतिविस्तारवदना जिह्वाललनभीषणा ।
निमग्नारक्तनयना नादापूरितदिङ्मुखा ।।८ ।।

पदच्छेद

भ्रु-कुटी-कुटिलात् तस्याः ललाट-फलकात् द्रुतम् ।
काली कराल-वदना वि-निष्-क्रान्ता असि-पाशिनी ।।६ ।।
वि-चित्र-खट्वाङ्ग-धरा नर-माला-वि-भूषणा ।
द्वीपि-चर्म-परीधाना शुष्क-मांसा अति-भैरवा ।।७ ।।
अति-विस्तार-वदना जिह्वा-ललन-भीषणा ।
निमग्ना रक्त-नयना नाद-आपूरित दिङ्-मुखा ।।८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

तस्याः = उनके,
भ्रूकुट्या = भौहों के,
कुटिलात् = टेढ़ेपन के कारण,
ललाटस्य = माथे के,
फलकात् = तल के कारण,
करालवदना = भयानक मुखमण्डलवाली,
असि-पाशिनी = खड्ग एवं पाश धारण करनेवाली,
विचित्रखट्वाङ्ग-धरा = आश्चर्यजनक नरपञ्जर धारण करनेवाली,
नरमालाभिः = नरमुण्डों की माला से,
विभूषणा = सुसज्जित,
द्वीपचर्मपरीधाना = हाथी की खाल वस्त्र के रूप में पहने हुए,
शुष्कमांसा = सूखे मांसवाली,
अतिभैरवा = अत्यन्त भयानक,
अतिविस्तारवदना = मुख को अत्यधिक फैलाए हुए,
जिह्वायाः = जीभ के,
ललनेन = लपलपाने के कारण,
भीषणा = भय उत्पन्न करनेवाली,
निमग्ना = धँसी हुई,
रक्तनयना = लाल आँखोंवाली,
नादेन = गर्जन से,
आपूरित-दिङ्मुखाकाली = सभी दिशाओं को गुञ्जायमान करनेवाली काली,
विनिष्क्रान्ता = प्रकट हुई ।।६-८ ।।

मन्त्र

सा वेगेनाभिपतिता घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणामभक्षयत् तद्बलम् ।।९ ।।

पदच्छेद

सा वेगेन अभि-पतिता घातयन्ती महा-असुरान् ।
सैन्ये तत्र सुर-अरीणाम् अभक्षयत् तत् बलम् ।।९ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

सा = वे भगवती काली,
वेगेन = तीव्रता पूर्वक,
महासुरान् = राक्षसों को,
घातयन्ती = मारती हुई,
सैन्ये = सेना पर,
अभिपतिता = टूट पड़ी,
तत्र = तथा समर में,
सुरारीणाम् = राक्षसों के,
तत् = उस विशाल,
बलम् = सैन्य बल को,
अभक्षयत् = भक्षण कर गईं ।।९ ।।

मन्त्र

पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ।
समादायैकहस्तेन मुखे चिक्षेप वारणान् ।। १० ।।

पदच्छेद

पार्ष्णि-ग्राह-अङ्कुश-ग्राही योध-घण्टा-सम्-अनु-इतान् ।
सम्-आदाय एकेन हस्तेन मुखे चिक्षेप वारणान् ।।१० ।।

अन्वित-पदार्थ

पर्ष्णिग्राह = गज शिक्षक,
अङ्कुशग्राही = महावत,
योधः = हाथी पर बैठकर युद्ध करनेवाले योद्धा,
घण्टा = हाथी के गले में लटकनेवाला घण्टा,
तत् समन्वितान् = इन सब के सहित,
वारणान् = हाथियों को,
एकेन हस्तेन = एक हाथ से,
समादाय = पकड़ कर,
मुखे = मुख में,
चिक्षेप = झोंक देती थीं ।।१० ।।

मन्त्र

तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ।।११ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तथा एव योधम् तुरगैः रथम् सारथिना सह ।
नि-क्षिप्य वक्त्रे दशनैः चर्वयन्ती अति-भैरवम् ।।११ ।।

अन्वित-पदार्थ

तथा एव = इसी प्रकार से,
तुरगैः सह = घोड़ों के साथ,
योधम् = घुड़सवार को,
सारथिना सह = सारथी सहित,
रथम् = रथ को,
वक्त्रे = मुख में,
निक्षिप्य = डालकर,
दशनैः = दाँतों से,
अतिभैरवम् = अतिशय भयानक रूप से,
चर्वयन्ती = चबाती हुई ।।११ ।।

मन्त्र

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ।।१२ ।।

पदच्छेद

एकम् जग्राह केशेषु ग्रीवायाम् अथ च अ-परम् ।
पादेन आ-क्रम्य च -एव अन्यम् उरसा अन्यम् अप-ऊथयत् ।।१२ ।।

अन्वित-पदार्थ

एकम् = एक को,
केशेषु = बालों से,
जग्राह = पकड़ा,
अथ च = ऐसे ही,
अपरम् = दूसरे को,
पादेन एव = चरण से ही,
अन्यम् = दूसरे को,
आक्रम्य = कुचल कर,
अन्यम् = अन्य को,
उरसा = सीने से,
अपोथयत् = मसल डाला ।।१२ ।।

मन्त्र

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ।।१३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तैः मुक्तानि च शस्त्राणि महा-अस्त्राणि तथा असुरैः ।
मुखेन जग्राह रुषा दशनैः मथितानि अपि ।।१३ ।।

अन्वित-पदार्थ

तथा = इसी प्रकार,
तैः = उन,
असुरैः = राक्षसों द्वारा,
मुक्तानि = छोड़े गए,
शस्त्राणि = शस्त्रों,
महास्त्राणि = खतरनाक प्रक्षेपास्त्रों को,
रुषा = क्रोध से,
मुखे = मुख द्वारा,
जग्राह = पकड़ लिया,
दशनैः = दाँतों से,
मथितानि अपि = पीस भी डाला ।।१३ ।।

मन्त्र

बलिनां तद् बलं सर्वमसुराणां दुरात्मनाम् ।
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ।।१४ ।।

पदच्छेद

बलिनाम् तत् बलम् सर्वम् अ-सुराणाम् दुः-आत्मनाम् ।
ममर्द अभक्षयत् च अन्यान् अन्यान् च अताडयत् तथा ।।१४ ।।

अन्वित-पदार्थ

तथा = ऐसे ही,
महात्मनाम् = बड़े-बड़े,
बलिनाम् = विशाल सैन्यबलवाले,
असुराणाम् = राक्षसों की,
तत् सर्वम् = वह सारी,
बलम् = सेना,
ममर्द = कुचल डाला,
अन्यान् च = कुछ को,
अभक्षयत् = भक्षण कर लिया,
अन्यान् च = कुछ को,
अताडयत् = पीट दिया ।।१४ ।।

मन्त्र

असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ।।१५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

असिना नि-हताः केचित् केचित् खट्वाङ्ग ताडिताः ।
जग्मुः वि-नाशम् अ-सुराः दन्त-ग्राह अभि-हताः तथा ।।१५ ।।

अन्वित-पदार्थ

तथा = इसी प्रकार,
केचित् = कुछ,
असिना = तलवार से,
निहताः = मारे गए,
केचित् = कुछ,
खट्वाङ्गेन = अस्थिपंजरों से बने शस्त्र से,
ताडिताः = पीटे गए,
दन्तग्राहेण = दाँतों की नोक से,
अभिहताः = घायल किये गए,
असुराः = दैत्यगण,
विनाशम् = विनाश की ओर,
जग्मुः = चले गए ।।१५ ।।

मन्त्र

क्षणेन तद् बलं सर्वमसुराणां निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ।।१६ ।।

पदच्छेद

क्षणेन तत् बलम् सर्वम् अ-सुराणाम् नि-पातितम् ।
दृष्ट्वा चण्डः अभि-दुद्राव ताम् कालीम् अति-भीषणाम् ।।१६ ।।

अन्वित-पदार्थ

असुराणाम् = राक्षसों की,
तत् सर्वम् = वह सारी,
बलम् = सेना,
क्षणेन = कुछ ही पलों में,
विनिपातितम् = धराशायी,
दृष्ट्वा = देखकर,
चण्डः = चण्ड,
ताम् = उन,
अतिभीषणाम् = महाभयानक,
कालीम् = काली की ओर,
अभिदुद्राव = दौड़ पड़ा ।।१६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ।।१७।।

पदच्छेद

शर-वर्षैः महा-भीमैः भीमाक्षीम् ताम् महा-सुरः।
छादयामास चक्रैः च मुण्डः क्षिप्तैः सहस्रशः ।।१७।।

अन्वित-पदार्थ

महासुरः = विशाल दैत्य,
मुण्डः = मुण्ड ने,
महाभीमैः = अत्यन्त भयानक,
शरवर्षैः = बाणों की वर्षा से,
सहस्रशः च = और हजारों,
चक्रैः = चक्रों को,
क्षिप्तैः = फेंक कर,
ताम् = उन,
भीमाक्षीम् = भयानक आँखोंवाली काली को,
छादयामास = आच्छादित कर दिया ।।१७।।

मन्त्र

तानि चक्राण्यनेकानि विशमानानि तन्मुखम्।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ।।१८।।

पदच्छेद

तानि चक्राणि अनेकानि विशमानानि तत् मुखम्।
बभुः यथा अर्कस्य बिम्बानि सु-बहूनि घन-उदरम् ।।१८।।

अन्वित-पदार्थ

तत् = उनके,
मुखम् = मुख से,
विशमानानि = घुसते हुए,
तानि = वे,
अनेकानि = अनेकों,
चक्राणि = चक्र,
घनस्य उदरम् = घने बादल के भीतर,
विशमानानि = घुसे हुए,
सुबहूनि = ढेर सारे,
अर्कस्यबिम्बानि = सूर्य-बिम्बों,
यथा = की तरह,
बभुः = शोभित हो रहे थे ।।१८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ततो जहासातिरुषा भीमं भैरवनादिनी।
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ।।१९।।

पदच्छेद

ततः जहास अति-रुषा भीमम् भैरव-नादिनी।
काली कराल-वक्त्र-अन्तः दुर्दर्श-दशन-उज्ज्वला ।।१९।।

अन्वित-पदार्थ

ततः = चण्ड द्वारा आक्रमण के पश्चात्,
करालवक्त्रस्य = भयानक मुख के,
अन्तः = भीतर,
दुर्दर्शैः = दीखनेवाले भयंकर,
दशनैः = दाँतों के कारण,
उज्ज्वला = चमकती हुई,
भैरवनादिनी = भयावह ध्वनि में गर्जन करनेवाली,
काली = भगवती काली ने,
अतिरुषा = अत्यन्त क्रोध पूर्वक,
भीमम् = भयावह,
जहास = अट्टहास किया ।।१९।।

मन्त्र

उत्थाय च महासिं हं देवी चण्डमधावत।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ।।२०।।

पदच्छेद

उत्थाय च महा-असिं हम् देवी चण्डम् अधावत।
गृहीत्वा च अस्य केशेषु शिरः तेन असिना अच्छिनत् ।।२०।।

अन्वित-पदार्थ

देवी च = और भगवती काली,
महाऽसिम् = विशालखड्ग को,
उत्थाय = उठाकर,
केशेषु = बालों से,
गृहीत्वा = पकड़ कर,
तेन = उसी,
असिना = खड्ग से,
हम् = हम् बोलते हुए,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चण्डम् = चण्ड की ओर,
अधावत = दौड़ पड़ी,
अस्य च = और उसको,
शिरः = शिर को,
अच्छिनत् = काट डाला ।।२० ।।

मन्त्र

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ।।२१ ।।

पदच्छेद

अथ मुण्डः अभि-अधावत् ताम् दृष्ट्वा चण्डम् नि-पातितम् ।
तम् अपि अपातयत् भूमौ सा खड्गेनं अभि-हतम् रुषा ।।२१ ।।

अन्वित-पदार्थ

अथ = इसके बाद,
मुण्डः = मुण्ड,
चण्डम् = चण्ड को,
निपातितम् = धराशायी,
दृष्ट्वा = देखकर,
ताम् = उनकी ओर,
अभ्यधावत = दौड़ा,
रुषा = क्रोध पूर्वक,
खड्गेन = खड्ग से,
अभिहतम् = घातित,
तम् अपि = उस मुण्ड को भी,
सा = उन्होंने,
भूमौ = धरती पर,
अपातयत् = गिरा दिया ।।२१ ।।

मन्त्र

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ।।२२ ।।

पदच्छेद

हत शेषम् ततः सैन्यम् दृष्ट्वा चण्डम् नि-पातितम् ।
मुण्डम् च सु-महा-वीर्यम् दिशः भेजे भय-आतुरम् ।।२२ ।।

अन्वित-पदार्थ

ततः = इसके अनन्तर,
सुमहावीर्यम् = महापराक्रमी,
शेषम् = बची हुई,
सैन्यम् = सेना,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चण्डम् = चण्ड,
मुण्डम् च = और मुण्ड को,
विनिपातितम् = गिरा हुआ,
दृष्ट्वा = देखकर,
हतेभ्यः = भगवती द्वारा मरने से,
भयेन = भय से,
आतुरम् = व्याकुल होकर,
दिशः = विभिन्न दिशाओं में,
भेज = भाग गई ।।२२ ।।

मन्त्र

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ।।२३ ।।

पदच्छेद

शिरः चण्डस्य काली च गृहीत्वा मुण्डम् एव च ।
प्राह प्र-चण्ड अट्टहासेन मिश्रम् अभि-एत्य चण्डिकाम् ।।२३ ।।

अन्वित-पदार्थ

काली च = और देवी काली,
चण्डस्य = चण्ड का,
शिरः = शिर,
मुण्डम् एव च = तथा मुण्ड को ही,
गृहीत्वा = लेकर,
चण्डिकाम् = भगवती चण्डी के,
अभ्येत्य = पास जाकर,
प्रचण्डाट्टहासेन = जोरदार ठहाके,
मिश्रम् = सहित,
प्राह = बोली ।।२३ ।।

मन्त्र

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ।।२४ ।।

पदच्छेद

मया तव अत्र उपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ।।२४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

मया = मेरे द्वारा,
अत्र = इस,
युद्धयज्ञे = युद्ध रूपी यज्ञ में,
महापशू = दो महापशु,
चण्डमुण्डौ = चण्ड और मुण्ड,
तव = आपको,
उपहृतौ = उपहार रूप में दिये जा रहे हैं,
शुम्भम् = शुम्भ,
निशुम्भम् च = और निशुम्भ को,
स्वयम् = स्वयम् आप,
हनिष्यसि = नष्ट करेंगी ।।२४।।

मन्त्र

ऋषिरुवाच ।।२५।।

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः ।।२६।।

पदच्छेद

ऋषिः उवाच ।।२५।।
तौ आनीतौ ततः दृष्ट्वा चण्ड-मुण्डौ महा-सुरौ ।
उवाच कालीम् कल्याणी ललितम् चण्डिका वचः ।।२६।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि ने कहा ।।२५।।
ततः = इसके बाद,
तौ = उन दोनों,
महासुरौ = महादैत्य,
चण्डमुण्डौ = चण्डमुण्ड को,
आनीतौ = लाया हुआ,
दृष्ट्वा = देखकर,
कल्याणी = मंगलमयी,
चण्डिका = चण्डिका ने,
कालीम् = काली से,
ललितम् = मनोरम्,
वचः = वाणी,
उवाच = बोली ।।२६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता।
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ।।ॐ ।।२७ ।।

पदच्छेद

यस्मात् चण्डम् च मुण्डम् च गृहीत्वा त्वम् उप-आगता।
चामुण्डा इति ततः लोके ख्याता देवि भविष्यसि ।।ॐ ।।२७ ।।

अन्वित-पदार्थ

यस्मात् = क्योंकि,
त्वम् = आप,
चण्डम् च = चण्ड,
मुण्डम् च = तथा मुण्ड को,
गृहीत्वा = लेकर,
उपागता = यहाँ आई हैं,
ततः = इसलिए,
लोके = समाज में,
'चामुण्डा = 'चामुण्डा,
देवी' = देवी',
ख्याता = के नाम प्रसिद्ध,
भविष्यसि = होंगी ।।२७ ।।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये चण्डमुण्डवधोनाम सप्तमोऽध्यायः ।। ७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। अष्टमोऽध्यायः ।।

मन्त्र

ऋषिरुवाच ।।१ ।।

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ।।२ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।
चण्डे च नि-हते दैत्ये मुण्डे च वि-नि-पातिते ।
बहुलेषु च सैन्येषु क्षयितेषु असुर-ईश्वरः ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
चण्डे दैत्ये च = राक्षस चण्ड के,
निहते = मारे जांने पर,
मुण्डे च = तथा मुण्ड के,
विनिपातित = धराशायी कर दिये जाने पर,
बहुलेषु च = और अधिकांश,
सैन्येषु = सेना के,
क्षयितेषु = समाप्त हो जाने पर,
असुरेश्वरः = राक्षसराज ।।२ ।।

मन्त्र

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ।।३ ।।

पदच्छेद

ततः कोप-पराधीन-चेताः शुम्भः प्रतापवान् ।
उद्-योगम् सर्व-सैन्यानाम् दैत्यानाम् आदिदेश ह ।।३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = इसके बाद,
कोपपराधीनचेताः = क्रोध के वशीभूत,
प्रतापवान् = प्रतापी,
शुम्भः = शुम्भ ने,
सर्वसैन्यानाम् = सम्पूर्ण सेना से सुसज्जित,
दैत्यानाम् = दैत्यों को,
उद्योगम् = तैयारी के लिए,
आदिदेश ह = आदेश दिया ।।३ ।।

मन्त्र

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ।।४ ।।

पदच्छेद

अद्य सर्वैः बलैः दैत्याः षडशीतिः उद्-आयुधाः ।
कम्बूनाम् चतुर्-अशीतिः निः-यान्तु स्व-बलैः वृताः ।।४ ।।

अन्वित-पदार्थ

षडशीतिः = छियासी,
उदायुधाः = उदायुध जाति के,
दैत्याः = दैत्यगण,
सर्वैः = सम्पूर्ण,
बलैः = सेना के साथ,
कम्बूनाम् = कम्बु जाति के,
चतुरशीतिः = चौरासी,
स्वबलैः = अपनी सेनाओं से,
वृताः = सुसज्जित होकर,
अद्य = आज ही,
निर्यान्तु = प्रयाण करें ।।४ ।।

मन्त्र

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ।।५ ।।

पदच्छेद

कोटि-वीर्याणि पञ्चाशत् अ-सुराणाम् कुलानि वै ।
शतम् कुलानि धौम्राणाम् निर्-गच्छन्तु मम आज्ञया ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

पञ्चशत् = पचास,
असुराणाम् = राक्षसोंवाला,
कोटिवीर्याणि = कोटिवीर्यों का,
कुलानि = परिवार,
धौम्राणाम् = धूम्रवंशियों के,
शतम् = एक सौ,
कुलानि = परिवार,
मम = मेरी,
आज्ञया = आज्ञा से,
निर्गच्छन्तु = निकलें ।।५ ।।

मन्त्र

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ।।६ ।।

पदच्छेद

कालकाः दौर्हृदाः मौर्याः कालकेयाः तथा असुराः ।
युद्धाय सज्जाः निर्-यान्तु आज्ञया त्वरिताः मम ।।६ ।।

अन्वित-पदार्थ

तथा = इसी प्रकार,
कालकाः = कालक,
दौर्हृदाः = दौर्हृद,
मौर्याः = मौर्य,
कालकेयाः = कालकेय जातियों के,
असुराः = राक्षसगण,
त्वरिताः = तुरन्त,
युद्धाय = युद्ध के लिए,
सज्जाः = तैयार होकर,
मम = मेरी,
आज्ञया = आज्ञा से,
निर्यान्त = प्रस्थान करें ।।६ ।।

मन्त्र

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ।।७ ।।

पदच्छेद

इति आ-ज्ञाप्य असुराणाम् पतिः शुम्भः भैरव-शासनः ।
निर्-जगाम् महा-सैन्य सहस्रैः बहुभिः वृतः ।। ७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

इति = इस प्रकार से,
आज्ञाप्य = आज्ञा देकर,
असुराणाम् = राक्षसों का,
पतिः = स्वामी,
भैरवशासनः = कठोर शासक,
शुम्भः = शुम्भ स्वयम्,
बहुभिः = अनेकों प्रकार की,
महासैन्यसहस्रैः = विशाल सेनाओं की टुकड़ियों से,
वृतः = सुसज्जित होकर,
निर्जगाम = निकला ।।७।।

मन्त्र

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ।। ८ ।।

पदच्छेद

आ-यान्तम् चण्डिका दृष्ट्वा तत् सैन्यम् अति-भीषणम् ।
ज्या-स्वनैः पूरयामास धरणी-गगन-अन्तरम् ।।८ ।।

अन्वित-पदार्थ

चण्डिका = भगवती चण्डिका ने,
तत् = उस,
अतिभीषणाम् = अत्यन्त भयानक,
सैन्यम् = सेना को,
आयान्तम् = आते हुए,
दृष्ट्वा = देख कर,
ज्यायाः = धनुष की प्रत्यञ्चा के,
स्वनैः = टंकारों से,
धरणीगगनान्तम् = धरती एवं आकाश के मध्यभाग अन्तरिक्ष को,
पूरयामास = गुँजा डाला ।।८ ।।

मन्त्र

ततः सिंहो महानादमतीव कृतवान् नृप ।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ।।९ ।।

पदच्छेद

ततः सिंह महा-नादम् अति-इव कृतवान् नृप ।
घण्टा-स्वनेन तत् नादम् अम्बिका च उप-बृंहयत् ।।९ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

नृप = हे राजन् !,
ततः = इन टंकारों के बाद,
सिंह = भगवती के वाहन सिंह ने,
अतीव = अत्यन्त,
महानादम् = भयानक गर्जन,
कृतवान् - किया,
अम्बिका च = तथा अम्बिका ने,
तत् = उस,
नादम् = गर्जन को,
घण्टायाः = अपने घण्टा की,
स्वनेन = ध्वनि के द्वारा,
उपबृंहयत् = और बढ़ा दिया ।।९ ।।

मन्त्र

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारिताननना ।।१० ।।

पदच्छेद

धनुर्-ज्या-सिंह-घण्टानाम् नादेन आ-पूरित-दिङ्मुखा ।
नि-नादैः भीषणैः काली जिग्ये वि-स्तारित आनना ।।१० ।।

अन्वित-पदार्थ

धनुषः = भगवती के धनुष की,
ज्यायाः = प्रत्यञ्चा की टंकार,
सिंहस्य = सिंह एवम्,
घण्टायाः = घण्टा के,
भीषणैः = भीषण,
निनादैः = ध्वनियों से,
नादेन = तथा गर्जना से,
आपूरित-दिङ्मुखा = दिशाएँ भर गईं,
विस्तारिताननना = जो मुख को विस्तारित की हुई,
काली = भगवती काली द्वारा,
जिग्ये = जीत ली गई ।।१० ।।

मन्त्र

तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ।।११ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तत् नि-नादम् उप-श्रुत्य दैत्य सैन्यैः चतुर्-दिशम् ।
देवी सिंहः तथा काली स-रोषैः परि-वारिताः ।।११ ।।

अन्वित-पदार्थ

तत् = उस,
चतुर्दिशम् = चारों दिशाओं में व्याप्त,
निनादम् = महानाद को,
उपश्रुत्य = सुनकर,
देवी = देवी,
सिंहः = उनका सिंह,
तथा = एवं,
काली = काली,
दैत्यानाम् = दैत्यों की,
सरोषैः = क्रुद्ध,
सैन्यैः = सेनाओं द्वारा,
परिवारिताः = घेर लिये गए ।।११ ।।

मन्त्र

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ।।१२ ।।

पदच्छेद

एतस्मिन् अन्तरे भूप वि-नाशाय सुर-द्विषाम् ।
भवाय अमरसिंहानाम् अति-वीर्य-बलअन्विताः ।।१२ ।।

अन्वित-पदार्थ

भूप = हे राजन् !,
एतस्मिन् = इसी,
अन्तर = बीच,
सुरद्विषाम् = देवद्रोही राक्षसों के,
विनाशाय = विनाश के लिए तथा,
अमरसिंहानाम् = श्रेष्ठ देवों की,
भवाय = समृद्धि के लिए,
अतिवीर्यबलन्विताः = अति उत्साह एवं शक्ति से सम्पन्न ।।१२।।

मन्त्र

ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ।।१३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ब्रह्म-ईश-गुह-विष्णूनाम् तथा एव इन्द्रस्य च शक्तयः।
शरीरेभ्यः वि-निष्-क्रम्य तत् रूपैः चण्डिकाम् ययुः ।।१३ ।।

अन्वित-पदार्थ

ब्रह्मणः = ब्रह्मा की,
ईशस्य = शिव की,
गुहस्य = स्कन्द कुमार की,
विष्णोः = विष्णु की,
तथा एव = इसी प्रकार,
इन्द्रस्य = इन्द्र की,
शक्तयः = शक्तियाँ,
शरीरेभ्यः = उनके शरीरों से,
विनिष्क्रम्यः = निकल कर,
तत् = उन्हीं देवों के,
रूपैः = रूपों में,
चण्डिकाम् = भगवती की ओर,
ययुः = गई ।।१३ ।।

मन्त्र

यस्य देवस्य यद्रूपं यथाभूषणवाहनम्।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ।।१४ ।।

पदच्छेद

यस्य देवस्य यत् रूपम् यथा भूषणम् वाहनम्।
तत् वत् एव हि तत् शक्तिः अ-सुरान् योद्धुम् आ-ययौ ।।१४ ।।

अन्वित-पदार्थ

यस्य = जिस,
देवस्य = देव का,
यत् = जो,
रूपम् = रूप,
यथा = जैसा,
भूषणम् = अलंकार एवम्,
वाहनाम् = वाहन था,
तद् वत् एव हि = उसी रूप में ही,
तत् शक्तिः = उनकी शक्ति,
असुरान् = राक्षसों से,
योद्धुम् = लड़ने के लिए,
आययौः = आ पहुँची ।।१४ ।।

मन्त्र

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ।।१५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

हंस-युक्त वि-मान अग्रे स-अक्ष-सूत्रम् स-कमण्डलुः।
आ-याताः ब्रह्मणः शक्तिः ब्रह्माणी सा अभि-धीयते ।।१५ ।।

अन्वित-पदार्थ

ब्रह्मणः = ब्रह्मा की,
शक्तिः = शक्ति,
हंसेन = हंस से,
युक्तस्य = जुते हुए,
विमानस्य = विमान के,
अग्रे = अग्रिम आसन पर विराजमान,
साक्षसूत्रकमण्डलुः = अक्षमाला एवं कमण्डलु लिए हुए,
आयाता = आईं,
सा = उन्हें,
ब्रह्माणी = ब्रह्माणी,
अभिधीयते = कहा जाता है ।।१५ ।।

मन्त्र

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ।।१६ ।।

पदच्छेद

माहेश्वरी वृष-आ-रूढा त्रिशूल-वर-धारिणी।
महा-अहि-वलया प्राप्ता चन्द्र-रेखा-वि-भूषणा ।।१६ ।।

अन्वित-पदार्थ

वृषे = वृषभ पर,
आरूढा = विराजमान,
त्रिशूलस्य = त्रिशूल एवम्,
वरस्य = वरदान की मुद्रा,
धारिणी = धारण करनेवाली,
महाहिवलया = विशाल नाग का कंगन पहने हुए,
चन्द्ररेखाविभूषणा = चन्द्रमा की सोलहवीं कला से विभूषित,
माहेश्वरी = महेश्वर शिव की शक्ति माहेश्वरी,
प्राप्ता = उपस्थित हुईं ।।१६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ।।१७ ।।

पदच्छेद

कौमारी शक्ति-हस्ता च मयूर-वर-वाहना ।
योद्धुम् अभि-आ-याययौ दैत्यान् अम्बिका गुह-रूपिणी ।।१७ ।।

अन्वित-पदार्थ

गुहरूपिणी = स्कन्द रूप में,
अम्बिका = भगवती,
कौमारी च = कौमारी कार्तिकेय की शक्ति,
शक्तिहस्ता = शल्य शस्त्र को हाथ में लिये,
मयूरवरवाहना = श्रेष्ठ मयूर पर विराजमान होकर,
योद्धुम् = युद्ध के लिए,
अभ्याययौ = आ पहुँची ।।१७ ।।

मन्त्र

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ।।१८ ।।

पदच्छेद

तथा एव वैष्णवी शक्तिः गरुड-उपरि सम्-स्थिता ।
शङ्ख-चक्र-गदा-शार्ङ्ग-खड्ग-हस्ता अभि-उप-आययौ ।।१८ ।।

अन्वित-पदार्थ

तथा एव = इसी प्रकार से,
गरुडस्य = गरुड के,
उपरि = ऊपर,
संस्थिता = विराजमान,
शंखचक्रगदाशार्ङ्गहस्ता = शंख-चक्र-गदा एवं शार्ङ्ग धनुष हाथों में धारण किये हुए,
वैष्णवीशक्ति = विष्णु की शक्ति,
अभ्युपाययौ = आगई ।।१८ ।।

मन्त्र

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं विभ्रती तनुम् ।।१९ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

यज्ञ-वाराहम् अ-तुलम् रूपम् या बिभ्रतः हरेः ।
शक्तिः सा अपि आ-ययौ तत्र वाराहीम् वि-भ्रती तनुम् ।।१९ ।।

अन्वित-पदार्थ

अतुलम् = अनुपमेय,
यज्ञवाराहम् = यज्ञ वाराह का,
रूपम् = रूप,
विभ्रतः = धारण करनेवाली,
हरेः या = श्रीहरि की जो,
शक्तिः = शक्ति हैं,
सा अपि = वे भी,
वाराहीम् = वाराही,
तनुम् = विग्रह,
विभ्रती = धारण किये हुए,
तत्र = उस रणभूमि में,
आययौ = आ गईं ।।१९ ।।

मन्त्र

नारसिंही नृसिंहस्य विभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ।।२० ।।

पदच्छेद

नारसिंही नृसिंहस्य वि-भ्रती सदृशम् वपुः ।
प्राप्ता तत्र सटा-आक्षेप-क्षिप्त-नक्षत्र-संहतिः ।।२० ।।

अन्वित-पदार्थ

सटायाः = आयालों के,
क्षेपेण = झटकने से,
क्षिप्ता = बिखराए गए हैं,
नक्षत्राणाम् = नक्षत्रों का,
संहतिः यया = समूह जिसके द्वारा वे,
नृसिंहस्य = नृसिंह के,
सदृशम् = समान,
वपुः = शरीर,
विभ्रती = धारण की हुई,
नारसिंही = नृसिंह की शक्ति,
तत्र = उस स्थान पर,
प्राप्ता = आ गईं ।।२० ।।

मन्त्र

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ।।२१ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

वज्र-हस्ता तथा एव ऐन्द्री गज-राज-उपरि स्थिता।
प्राप्ता सहस्र-नयना यथा शक्रः तथा एव सा ।।२१ ।।

अन्वित-पदार्थ

तथा एव = इसी प्रकार,
यथा = जिस तरह,
शक्रः = इन्द्र हैं,
सा = उसी रूप में,
वज्रहस्ता = इन्द्र की शक्ति वज्र हाथ में लिये हुए,
गजराजस्य = गजराज ऐरावत के,
उपरि = ऊपर,
स्थिता = बैठी हुई,
सहस्रनयना = हजार नेत्रोंवाली,
ऐन्द्री = ऐन्द्री,
प्राप्ता = आईं ।।२१ ।।

मन्त्र

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम् ।।२२ ।।

पदच्छेद

ततः परिवृतः ताभिः ईशानः देवानाम् शक्तिभिः।
हन्यन्ताम् असुराः शीघ्रम् मम प्रीत्या आह चण्डिकाम् ।।२२ ।।

अन्वित-पदार्थ

ततः = इसके पश्चात्,
ताभिः = उन,
देवशक्तिभिः = देव शक्तियों से,
परिवृतः = परिवेष्टित,
ईशानः = परमेश्वर ईशान शिव ने,
चण्डिकाम् = भगवती चण्डिका से,
आह = कहा कि,
मम = मेरी,
प्रीत्या = प्रसन्नता के लिए,
शीघ्रम् = शीघ्र,
असुराः = राक्षसगण,
हन्यन्ताम् = विनष्ट किये जाएँ ।।२२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ।।२३ ।।

पदच्छेद

ततः देव्याः शरीरात् तु वि-निष्-क्रान्ता अति-भीषणा ।
चण्डिका-शक्तिः अति-उग्रा शिवा-शत-नि-नादिनी ।।२३ ।।

अन्वित-पदार्थ

ततः = इसी अवसर पर,
देव्याः = भगवती कौशिकी के,
शरीरात् = शरीर से,
अतिभीषणा = अत्यन्त भयानक,
अति उग्रा = अत्यन्त रौद्र स्वभाववाली,
शिवानाम् शतेन = अकेली ही एक सौ शृगालियों की,
निनादिनी = ध्वनि करनेवाली,
चण्डिकायाः = चण्डिका की,
शक्तिः = शक्ति,
विनिष्क्रान्ता = प्रकट हुई ।।२३ ।।

मन्त्र

सा चाह धूम्रजटिलमीशानमपराजिता ।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ।।२४ ।।

पदच्छेद

सा च आह धूम्र-जटिलम् ईशानम् अ-परा-जिता ।
दूत त्वम् गच्छ भगवन् पार्श्वम् शुम्भ-निशुम्भयोः ।।२४ ।।

अन्वित-पदार्थ

सा च = और उन,
अपराजिता = भगवती अपराजिता ने,
धूम्रजटिलम् = धुएँ के समान काली जटाओंवाले,
भगवान् ! = हे ऐश्वर्यसम्पन्न ईश्वर संदेश वाहक रूप में,
त्वम् = आप,
शुम्भनिशुम्भयोः = शुम्भनिशुम्भ के,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ईशानम् = ईशान शिव से,
आह = कहा,
पार्श्वम् = पास,
गच्छ = जाओ ।।२४।।

मन्त्र

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ।।२५।।

पदच्छेद

ब्रूहि शुम्भम् निशुम्भम् च दानवौ अति-गर्वितौ ।
ये च अन्ये दानवाः तत्र युद्धाय सम्-उपस्थिताः ।।२५।।

अन्वित-पदार्थ

अति-गर्वितौ = अति घमण्डी,
दानवौ = दोनों दैत्यों,
शुम्भम् निशुम्भम् च = शुम्भ और निशुम्भ से,
ये च = और जो,
अन्ये = दूसरे,
दानवाः = दैत्य,
तत्र युद्धाय = युद्ध के लिए,
समुपस्थिता = तैयार हैं,
ब्रूहि = उनसे कहो ।।२५।।

मन्त्र

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ।।२६।।

पदच्छेद

त्रैलोक्यम् इन्द्रः लभताम् देवाः सन्तु हवि(षः) भुजः ।
यूयम् प्रयात पातालम् यदि जीवितुम् इच्छथ ।।२६।।

अन्वित-पदार्थ

इन्द्र = इन्द्र,
त्रैलोक्यम् = त्रैलोक्य,
लभताम् = पा जाएँ,
देवाः = देवतागण,
हविषः = यज्ञ भाग का,
भुजः = भोग करनेवाले,
सन्त = हो जाएँ,
यदि यूयम् = यदि तुम दोनों,
जीवितुम् = जीवित रहना,
इच्छथ = चाहते हो तो,
पातालम् = पाताल,
प्रयात = चले जाओ ।।२६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ।।२७ ।।

पदच्छेद

बल-अव-लेपाद् अथ चेत् भवन्तः युद्ध-काङ्क्षिणः ।
तत् आ-गच्छत तृप्यन्तु मम शिवाः पिशितेन वः ।।२७ ।।

अन्वित-पदार्थ

अथ चेत् = किन्तु यदि,
बलस्य = शक्ति के,
अवलेपात् = घमण्ड के कारण,
भवन्तः = आपलोग,
युद्धकांक्षिणः = युद्ध की इच्छा रखते हो,
तत् = तो,
आगच्छत = आओ,
मम = मेरी,
शिवाः = शिवाएँ,
वः = तुम सभी के,
पिशितेन = मांस से,
तृप्यन्ताम् = तृप्त हों ।।२७ ।।

मन्त्र

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ।।२८ ।।

पदच्छेद

यतः नियुक्तः दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूती इति लोके अस्मिन् ततः सा ख्यातिम् आ-गता ।।२८ ।।

अन्वित-पदार्थ

यतः = क्योंकि,
तया = उन,
देव्या = भगवती के द्वारा,
स्वयम् = साक्षात्,
शिवः = शिव,
दौत्येन = संदेशवाहन हेतु,
ततः = इसलिए,
सा = वह शक्ति,
अस्मिन् = इस,
लोके = जगत में,
शिवदूती इति = शिवदूती इस नाम से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नियुक्तः = नियोजित किये गए थे,
ख्यातिम् = विख्यात,
आगता = हुईं ।।२८।।

मन्त्र

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ।।२९।।

पदच्छेद

ते अपि श्रुत्वा वचः देव्याः शर्व आख्यातम् महा-सुराः ।
अमर्ष-आपूरिताः जग्मुः यतः कात्यायनी स्थिता ।।२९।।

अन्वित-पदार्थ

ते = वे,
महासुराः = महाराक्षस,
अपि = भी,
शर्वेण = शिव के द्वारा,
आख्यातम् = बताए गए,
देव्याः = भगवती के,
वचः = वचनों को,
श्रुत्वा = सुन कर,
अमर्षेण = क्रोध से,
आपूरिताः = भरे हुए,
यतः = जहाँ,
कात्यायनी = भगवती कात्यायनी,
स्थिता = विराजमान थीं वहाँ,
जग्मुः = गए ।।२९।।

मन्त्र

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ।।३०।।

पदच्छेद

ततः प्रथमम् एव अग्रे शर-शक्ति-ऋष्टि-वृष्टिभिः ।
ववर्षुः उद्धत-अमर्षाः ताम् देवीम् अमरारयः ।।३०।।

अन्वित-पदार्थ

ततः = इसके पश्चात्,
उद्धतामर्षाः = क्रोध से बौखलाए,
अमरारयः = देवशत्रुओं ने,
शराणाम् = बाणों,
शक्तीनाम् = शल्यों,
ऋष्टीणाम् = विशेष प्रकार के दो धारवाले खड्गों के,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रथमम् = पहले,
एव = ही,
अग्रे = सम्मुख आकर,
वृष्टिभिः = सन्धानों से,
ताम् = उन,
देवीम् = भगवती पर,
ववर्षुः = वर्षा की दी ।।३० ।।

मन्त्र

सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तैर्महेषुभिः ।।३१ ।।

पदच्छेद

सा च तान् प्रहितान् बाणान् शूल-शक्ति-परश्वधान् ।
चिच्छेद लीलया आ-ध्मात-धनुर्-मुक्तैः महा-इषकुभिः ।।३१ ।।

अन्वित-पदार्थ

सा च = और उन्होंने,
प्रहितान् = प्रहार किए गए,
तान् = उन,
बाणान् = बाणों,
शूलान् = भालों,
शक्तीः = शल्यों,
परश्वधान् = फरसों को,
धनुषा = अपने धनुष द्वारा,
मुक्तैः = छोड़े गए,
आध्मातैः = सनसनाते हुए,
महेषुभिः = विशाल बाणों द्वारा,
लीलया = खेल-खेल में,
चिच्छेद = काट डाला ।।३१ ।।

मन्त्र

तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा ।।३२ ।।

पदच्छेद

तस्याः अग्रतः तथा काली शूल-पातेन वि-दारितान् ।
खट्वाङ्ग-पोथितान् च अन्यान् कुर्वती व्यचरत् तदा ।।३२ ।।

अन्वित-पदार्थ

तथा = इसी प्रकार से,
तदा = उस समय,
खट्वांगेण = नरकंकाल निर्मित शस्त्र से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्याः = उन भगवती के,
अग्रतः = आगे होकर,
अन्यान् च = दूसरे राक्षसों को,
शूलपातविदारितान् = भालों के आघात से विदीर्ण,
पोथितान् = चीथड़े,
कुर्वती = करती हुई,
काली = भगवती काली,
व्यचरत = विचरण करने लगी ।।३२ ।।

मन्त्र

कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ।।३३ ।।

पदच्छेद

कमण्डलु-जल-आक्षेपात् हत-वीर्यान् हत-ओजसः ।
ब्रह्माणी च अकरोत् शत्रून् येन येन स्म धावति ।।३३ ।।

अन्वित-पदार्थ

ब्रह्माणी = ब्रह्माणी,
येन-येन = जिस-जिस ओर से,
धावति स्म = दौड़ती थीं उधर,
कमण्डलोः = कमण्डलु के,
जलाक्षेपात् = अभिमन्त्रित जल के प्रक्षेप से,
शत्रून् = शत्रुओं को,
हतवीर्यान् = उत्साहहीन,
हतौजसः च = और निस्तेज,
अकरोत् = कर देती थीं ।।३३ ।।

मन्त्र

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ।।३४ ।।

पदच्छेद

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्यान् जघान कौमारी तथा शक्त्या अतिकोपना ।।३४ ।।

अन्वित-पदार्थ

माहेश्वरी = माहेश्वरी ने,
त्रिशूलेन = त्रिशूल से,
अतिकोपना = अत्यन्त गुस्सेवाली,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा = इसी प्रकार से,
वैष्णवी = वैष्णवी ने,
चक्रेण = चक्र से,
तथा = और,
कौमारी = कौमारी ने,
शक्त्या = शक्ति शस्त्र से,
दैत्यान् = दैत्यों को,
जघान = मारा ।।३४।।

मन्त्र

ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ।।३५।।

पदच्छेद

ऐन्द्री-कुलिश-पातेन शतशः दैत्य दानवाः ।
पेतुः वि-दारिताः पृथ्व्याम् रुधिर-ओघस्य प्र-वर्षिणः ।।३५।।

अन्वित-पदार्थ

ऐन्द्र्याः = ऐन्द्री के,
कुलिशपातेन = वज्रपात से,
विदारिताः = चीरे गए,
रुधिराणाम् = अतः रक्त की,
ओघस्य = धारा,
प्रवर्षिणः = बरसानेवाले,
शतशः = सैकड़ों,
दैत्याः = दैत्य,
दानवाः = दानव,
पेतुः = गिर पड़े ।।३५।।

मन्त्र

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ।।३६।।

पदच्छेद

तुण्ड-प्रहार वि-ध्वस्ताः दंष्ट्रया अग्रेण क्षत-वक्षसः ।
वाराह (स्य) मूर्त्याः नि-अपतन् चक्रेण च वि-दारिताः ।।३६।।

अन्वित-पदार्थ

वाराहस्य = शूकर के,
मूर्त्याः = रूप में वाराही के,
तुण्डस्य = नथुने के,
प्रहारेण = प्रहार से,
विध्वस्ताः = विनष्ट,
क्षतवक्षसः = फटी हुई छातीवाले,
चक्रेण च = तथा चक्र से,
विदारिताः = काटे गए (राक्षस),

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दंष्ट्रयोः = दाढ़ों के,
अग्रेण = नोकों से,
न्यपतन् = धराशायी हो रहे थे ।।३६ ।।

मन्त्र

नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ।।३७ ।।

पदच्छेद

नखैः वि-दारितान् च अन्यान् भक्षयन्ती महा-सुरान् ।
नारसिंही चचार आजौ नाद-आपूर्ण-दिग्-अम्बरा ।।३७ ।।

अन्वित-पदार्थ

आजौ च = और युद्ध में,
नादेन = गर्जना से,
आपूर्णदिगम्बरा = दिशाओं और आकाश को भर देनेवाली,
नारसिंही = नारसिंही,
नखैः = नख से,
विदारितान् = फाड़े हुए,
अन्यान् = अन्य,
महासुरान् = महाराक्षसों का,
भक्षयन्ती = भक्षण करती हुई,
चचार = विचरण कर रही थीं ।।३७ ।।

मन्त्र

चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ।।३८ ।।

पदच्छेद

चण्ड अट्टहासैः अ-सुराः शिव-दूती-अभि-दूषिताः ।
पेतुः पृथिव्याम् पतितान् तान् चखाद अथ सा तदा ।।३८ ।।

अन्वित-पदार्थ

शिवदूत्या = शिवदूती से उत्पन्न,
चण्डैः = भयानक,
अट्टहासैः = अट्टहासों से,
अभिदूषिताः = मूर्छित,
असुराः = राक्षसगण,
अथ = इसके पश्चात्,
तदा = तब,
सा = उन्होंने,
पतितान् = गिरे हुए,
तान् = असुरों का,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृथिव्या = धरती पर,
पेतुः = गिर गए थे,
चखाद = भक्षण कर डाला ।।३८ ।।

मन्त्र

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ।।३९ ।।

पदच्छेद

इति मातृ-गणम् क्रुद्धम् मर्दयन्तम् महा-सुरान् ।
दृष्ट्वा-अभि-उपायैः वि-विधैः नेशुः देव-अरि-सैनिकाः ।।३९ ।।

अन्वित-पदार्थ

इति = इस प्रकार,
विविधैः = अनेक प्रकार के,
अभ्युपायैः = युद्ध के उपकरणों के द्वारा,
महासुरान् = विशाल राक्षसों को,
मर्दयन्तम् = कुचलते हुए,
क्रुद्धम् = कुपित,
मातृगणम् = मातृ शक्तियों को,
दृष्ट्वा = देखकर,
देवारीणाम् = देवद्रोही राक्षसों के,
सैनिकाः = सैनिक,
नेशुः = भाग गए ।।३९ ।।

मन्त्र

पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ।।४० ।।

पदच्छेद

पलायन-परान् दृष्ट्वा दैत्यान् मातृ-गण अर्दितान् ।
योद्धुम् अभि-आ-ययौ क्रुद्धः रक्तबीजः महा-असुरः ।।४० ।।

अन्वित-पदार्थ

मातृगणैः = मातृ शक्तियों से,
अर्दितान् = प्रताड़ित,
दैत्यान् = राक्षसों को,
पलायनपरान् = भागते हुए,
दृष्ट्वा = देखकर,
महासुरः = महाराक्षस,
रक्तबीजः = रक्तबीज,
क्रुद्धः = गुस्साया हुआ,
योद्धुम् = लड़ने के लिए,
अभ्याययौ = आ गया ।।४० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ।।४१ ।।

पदच्छेद

रक्त-बिन्दुः यदा भूमौ पतति अस्य शरीरतः ।
सम्-उत्-पतति मेदिन्याम् तत्-प्रमाणः तदा असुरः ।।४१ ।।

अन्वित-पदार्थ

यदा = जब,
अस्य = इसके,
शरीरतः = शरीर से,
रक्तस्य = खून की,
बिन्दुः = बूँद,
भूमौ = भूमि पर,
पतति तदा = गिरती है तब,
तत्प्रमाणः = उसी के समान,
महासुरः = विशाल दैत्य,
मेदिन्याम् = धरती पर,
समुत्पतति = पैदा हो जाता है ।।४१ ।।

मन्त्र

युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ।।४२ ।।

पदच्छेद

युयुधे सः गदा-पाणिः इन्द्र-शक्त्या महा-असुरः ।
ततः च ऐन्द्री स्व-वज्रेण रक्त-बीजम् अ-ताडयत् ।।४२ ।।

अन्वित-पदार्थ

गदापाणिः = हाथ में गदा लेकर,
सः = उस,
महासुरः = महाराक्षस ने,
इन्द्रस्य = इन्द्र की,
शक्त्या = शक्ति के साथ,
युयुध = युद्ध किया,
ततः च = और तब,
ऐन्द्री = ऐन्द्री ने,
स्ववज्रेण = अपने वज्र से,
रक्तबीजम् = रक्तबीज को,
अताडयत् = मारा ।।४२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ।।४३ ।।

पदच्छेद

कुलिशेन आहतस्य आशु बहु सुस्राव शोणितम् ।
सम्-उत्-तस्थुः ततः योधाः तद्-रूपाः तत्-पराक्रमाः ।।४३ ।।

अन्वित-पदार्थ

कुलिशेन = वज्र से,
आहतस्य = घायल राक्षस का,
बहु = अत्यधिक,
शोणितम् = रक्त,
आशु = तत्काल,
सुस्राव = बह निकला,
ततः = तदनन्तर,
तद्रूपाः = उसी के समान,
तत्पराक्रमाः = वैसे ही पराक्रमी,
योद्धाः = लड़ाके राक्षस,
समुत्तस्थुः = उठ खड़े हुए ।।४३ ।।

मन्त्र

यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ।।४४ ।।

पदच्छेद

यावन्तः पतिताः तस्य शरीरात् रक्त-बिन्दवः ।
तावन्तः पुरुषाः जाताः तद्-वीर्य-बल-वि-क्रमाः ।।४४ ।।

अन्वित-पदार्थ

यावन्तः = जितनी,
रक्तस्य = रक्त की,
बिन्दवः = बूँदें,
तस्य = उसके,
शरीरात् = शरीर से,
पतिताः = गिरीं,
तावन्तः = उतने,
तद्वीर्यबलविक्रमाः = उसी के समान तीखे, बली एवं पराक्रमी,
पुरुषाः = पुरुष,
जाताः = उत्पन्न हो गए थे ।।४४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ।।४५ ।।

पदच्छेद

ते च अपि युयुधुः तत्र पुरुषाः रक्त-सम्भवाः ।
समम् मातृभिः अति-उग्र-शस्त्र-पात-अति-भीषणम् ।।४५ ।।

अन्वित-पदार्थ

अपि च = और,
ते = वे,
रक्तसम्भवाः = खून से उत्पन्न,
पुरुषाः = पुरुष,
तत्र = उस रणभूमि में,
अत्युग्राणाम् = अत्यन्त मारक,
शस्त्राणाम् = शस्त्रों के,
पातैः = प्रहारों द्वारा,
मातृभिः = मातृ शक्तियों के,
समम् = साथ,
अतिभीषणम् = अत्यन्त भयानक,
युयुधुः = युद्ध करने लगे ।।४५ ।।

मन्त्र

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ।।४६ ।।

पदच्छेद

पुनः च वज्र(स्य) पातेन क्षतम् अस्य शिरः यदा ।
ववाह रक्तम् पुरुषाः ततः जाताः सहस्रशः ।।४६ ।।

अन्वित-पदार्थ

पुनः च = और फिर से,
वज्रस्य = वज्र के,
पातेन = प्रहार से,
यदा = जब,
अस्य = इसका,
शिरः = शिर,
क्षतम् = घायल हुआ,
रक्तम् = रक्त,
ववाह = बहा,
ततः = उससे,
सहस्रशः = हजारों,
पुरुषाः = पुरुष,
जाताः = पैदा हो गए ।।४६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

वैष्णवी समरे चैनं चक्रेणाभिजघान ह।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ।।४७।।

पदच्छेद

वैष्णवी समरे च एनम् चक्रेण अभि-जघान ह।
गदया ताडयामास ऐन्द्री तम् असुर-ईश्वरम् ।।४७।।

अन्वित-पदार्थ

वैष्णवी च = और वैष्णवी ने,
समरे = रण में,
एनम् = इसे,
चक्रेण ह = चक्र से,
अभिजघान = मारा,
ऐन्द्री = ऐन्द्री ने,
तम् = उस,
असुरेश्वरम् = राक्षसराज को,
गदया = गदा से,
ताडयामास = घायल किया ।।४७।।

मन्त्र

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ।।४८।।

पदच्छेद

वैष्णवी-चक्र-भिन्नस्य रुधिर-स्राव-सम्भवैः।
सहस्रशः जगत्-व्याप्तम् तत् प्रमाणैः महा-असुरैः ।।४८।।

अन्वित-पदार्थ

वैष्णव्याः = वैष्णवी के,
चक्रेण = चक्र से,
भिन्नस्य = कटे असुर के,
रुधिरस्रावात् = खून की धारा से,
सम्भवैः = उत्पन्न,
तत्प्रमाणैः = उसी के समान,
सहस्रशः = हजारों,
महासुरैः = महाराक्षसों से,
जगत् = संसार,
व्याप्तम् = व्याप्त हो गया ।।४८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

शक्त्या जघान कौमारी वाराही च तथासिना।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ।।४९ ।।

पदच्छेद

शक्त्या जघान कौमारी वाराही च तथा असिना।
माहेश्वरी त्रि-शूलेन रक्तबीजम् महा-असुरम् ।।४९ ।।

अन्वित-पदार्थ

महासुरम् = महाराक्षस,
रक्तबीजम् = रक्तबीज को,
कौमारी = कौमारी ने,
शक्त्या = शल्य से,
तथा च = और इसी प्रकार,
वाराही = वाराही ने,
असिना = खड्ग से,
माहेश्वरी = माहेश्वरी ने,
त्रिशूलेन = त्रिशूल से,
जघान = मारा ।।४९ ।।

मन्त्र

स चापि गदया दैत्यः सर्वा एवाहनत् पृथक्।
मातृः कोपसमाविष्टो रक्तबीजो महासुरः ।।५० ।।

पदच्छेद

स च अपि गदया दैत्यः सर्वाः एव अहनत् पृथक्।
मातृः कोप-सम्-आविष्टः रक्तबीजः महा-असुरः ।।५० ।।

अन्वित-पदार्थ

अपि च = तथा,
सः = उस,
कोपेन = क्रोध से,
समविष्टः = भरे हुए,
महासुरः = महाराक्षस,
रक्तबीजः = रक्तबीज,
दैत्यः = दैत्य ने,
सर्वा एव = सभी,
मातृ = मातृ शक्तियों को,
पृथक् = अलग-अलग,
गदया = गदा से,
अहनत् = मारा ।।५० ।।

मन्त्र

तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि।
पपात यो रक्तौघस्तेनासञ्छतशोऽसुराः ।।५१ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तस्य आ-हतस्य बहुधा शक्ति-शूल-आदिभिः भुवि।
पपातः यः वै रक्त-ओघः तेन आसन् शतशः असुराः ।।५१ ।।

अन्वित-पदार्थ

बहुधा = अनेक बार,
आहतस्य = मारे गए,
तस्य = उसकी,
यः = जो,
रक्तस्य = रक्त की,
ओघः = धारा,
भुवि = धरती पर,
पपात वै = गिरी थी,
तेन = उससे,
शतशः = सैकड़ों,
असुराः = राक्षस,
आसन् = हो गए थे ।।५१ ।।

मन्त्र

तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत्।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ।।५२ ।।

पदच्छेद

तैः च असुर-आसृक्-सम्-भूतैः असुरैः सकलम् जगत्।
व्याप्तम् आसीत् ततः देवाः भयम् आजग्मुः उत्तमम् ।।५२ ।।

अन्वित-पदार्थ

असुरस्य = दानव रक्तबीज के,
असृजा = खून से,
सम्भूतैः = पैदा हुए,
असुरैः = राक्षसों से,
सकलम् = सम्पूर्ण,
जगत् = संसार,
व्याप्तम् = भर गया,
आसीत् = था,
ततः = इस से,
देवाः = देवतागण,
उत्तमम् = सर्वाधिक,
भयम् = भय,
आजग्मुः = ग्रस्त हो गए थे ।।५२ ।।

मन्त्र

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ।।५३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा।
उवाच कालीम् चामुण्डे विस्तीर्णं वदनम् कुरु ।।५३ ।।

अन्वित-पदार्थ

तान् = उन,
सुरान् = देवताओं को,
विषण्णान् = दुःखी,
दृष्ट्वा = देखकर,
सत्वरा = तुरन्त,
चण्डिका = चण्डिका भगवती ने,
कालीम् = काली से,
उवाच = कहा,
चामुण्डे = हे चामुण्डे !,
वदनम् = मुख को,
विस्तीर्णम् = विस्तीर्ण,
कुरु = करो ।।५३ ।।

मन्त्र

मच्छस्त्रपातसम्भूतान् रक्तबिन्दून्महासुरान्।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ।।५४ ।।

पदच्छेद

मम शस्त्रस्य पातेन सम्-भूतान् रक्त-बिन्दून् महा-असुरान्।
रक्त-बिन्दोः प्रति-इच्छ त्वम् वक्त्रेण अनेन वेगिना ।।५४ ।।

अन्वित-पदार्थ

मम = मेरे,
शस्त्रस्य = शस्त्र के,
पातेन = प्रहार से,
सम्भूतान् = उत्पन्न,
रक्तबिन्दून् = रक्तबिन्दुओं और,
रक्तबिन्दोः = रक्तबिन्दु से उत्पन्न,
महासुरान् = राक्षसों को,
अनेन = इस,
वक्त्रेण = विस्तृत मुख से,
त्वम् = तुम,
वेगिना = तेजी से,
प्रतीच्छ = पकड़ो ।।५४ ।।

मन्त्र

भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान्।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ।। ५५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

भक्षयन्ती चर रणे तद्-उत्पन्नान् महा-असुरान्।
एवम् एष क्षयम् दैत्यः क्षीण-रक्तः गमिष्यति ।। ५५ ।।

अन्वित-पदार्थ

रणे = युद्धभूमि में,
तदुत्पन्नान् = उस रक्तबिन्दुओं से उत्पन्न,
महासुरान् = राक्षसों को,
भक्षयन्ती = भक्षण करते हुए,
चर = विचरण करो,
एवम् = इस प्रकार,
एषः = यह,
दैत्यः = राक्षस,
क्षीणरक्तः = रक्त विहीन होकर,
क्षयम् गमिष्यति = समाप्त हो जाएगा ।।५५ ।।

मन्त्र

भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ।।५६ ।।

पदच्छेद

भक्ष्यमाणाः त्वया च उग्राः न च उत्-पत्स्यन्ति च अपरे।
इति उक्त्वा ताम् ततः देवी शूलेन अभि-जघान तम् ।।५६ ।।

अन्वित-पदार्थ

त्वया च = और तुम्हारे द्वारा,
भक्ष्यमाणाः = भक्षित हो रहे,
अपरे = दूसरे,
उग्राः = भयानक रक्तबीज से उत्पन्न राक्षस,
न च = नहीं,
उत्पत्स्यन्ति = उत्पन्न होंगे,
इति = इस प्रकार,
ताम् = उनसे,
उक्त्वा = कहकर,
ततः च = उसके पश्चात्,
देवी = भगवती ने,
तम् = उस राक्षस को,
शूलेन = भाले से,
अभिजघान = आहत किया ।।५६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।। ५७ ।।

पदच्छेद

मुखेन काली जगृहे रक्त-बीजस्य शोणितम् ।। ५७ ।।

अन्वित-पदार्थ

रक्तबीजस्य = रक्तबीज का, **मुखेन** = मुख द्वारा,
शोणितम् = रक्त, **जगृहे** = ग्रहण कर
काली = काली ने, लिया ।।५७ ।।

मन्त्र

ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ।
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।। ५८ ।।

पदच्छेद

ततः असौ आजघान अथ गदया तत्र चण्डिकाम् ।
न च अस्याः वेदनाम् चक्रे गदा-पातः अल्पिकाम् अपि ।। ५८ ।।

अन्वित-पदार्थ

अथ ततः = और इसके बाद, **गदयाः** = गदा का,
तत्र = रणक्षेत्र में, **पातः** = प्रहार,
असौ = उनसे, **अस्याः** = उनको,
गदया = गदा से, **अल्पिकाम्** = तनिक,
चण्डिकाम् = भगवती **अपि** = भी,
चण्डिका को, **वेदनाम्** = पीड़ा,
अजघान = मारा, **न चक्रे** = नहीं दे
पाया ।।५८ ।।

मन्त्र

तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ।
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।।५९ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

तस्य आ-हतस्य देहात् तु बहु सुस्राव शोणितम्।
यतः ततः तद् वक्त्रेण चामुण्डा सम्-प्रति-इच्छति ।।५९ ।।

अन्वित-पदार्थ

आहतस्य = घायल,
तस्य = उस राक्षस के,
देहात् तु = शरीर से तो,
बहु = बहुत,
शोणितम् = खून,
सुस्राव = बह रहा था,
यतः ततः = यहाँ वहाँ से बहते हुए,
तत् = उस रक्त को,
वक्त्रेण = मुख से,
चामुण्डा = चामुण्डा देवी,
सम्प्रतीच्छति = ग्रहण कर लेती थीं ।।५९ ।।

मन्त्र

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ।।६० ।।

पदच्छेद

मुखे सम्-उद्गताः ये अस्या रक्त-पातात् महा-असुराः ।
तान् चखाद अथ चामुण्डा पपौ तस्य च शोणितम् ।।६० ।।

अन्वित-पदार्थ

ततः = इसके बाद,
ये = जो रक्तबीज,
महासुरा = राक्षस,
रक्तपातात् = रक्त के गिरने के कारण,
अस्याः = उनके,
मुखे = मुख से,
समुद्गता = उत्पन्न हुए थे,
अथ = उत्पन्न होते ही,
चामुण्डा = चामुण्डा,
तान् = उनको,
चखाद = भक्षण कर गई,
तस्य च = और उनके,
शोणितम् = रक्त को,
पपौ = पी गई ।।६० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ।। ६१ ।।

पदच्छेद

देवी शूलेन वज्रेण बाणैः असिभिः ऋष्टिभिः ।
जघान रक्त-बीजम् तम् चामुण्ड (या) पीत-शोणितम् ।।६१ ।।

अन्वित-पदार्थ

शूलेन = भालों,
वज्रेण = वज्रों,
बाणैः = बाणों,
असिभिः = तलवारों,
ऋष्टिभिः = कटारों से,
देवी = देवी कौशिकी ने,
चामुण्डया = चामुण्डा के द्वारा,
पीतशोणितम् = जिसका पूरा खून पिया जा चुका था,
तम् = उस,
रक्तबीजम् = रक्तबीज को,
जघान = मारा,
शस्त्रसंघैः = शस्त्र समूहों से,
समाहतः = वह मारा गया ।।६१ ।।

मन्त्र

स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ।
नीरक्तश्च महीपाल रक्तबीजो महासुरः ।।६२ ।।

पदच्छेद

स पपात् मही-पृष्ठे शस्त्र-संघैः समाहतः ।
निर्-रक्तः च मही-पाल रक्त-बीजः महा-असुरः ।।६२ ।।

अन्वित-पदार्थ

सः = वह राक्षस,
महीपृष्ठे = धरती पर,
पपात = गिर पड़ा,
महीपाल = हे धरतीपति सुरथ !,
नीरक्तः च = और रक्त विहीन,
महासुरः = महाराक्षस,
रक्तबीज = रक्तबीज के गिरने पर ।।६२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ।
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ।। ६३ ।।

पदच्छेद

ततः ते हर्षम् अ-तुलम् अवापुः त्रिदशाः नृप ।
तेषाम् मातृ-गणः जातः ननर्त असृक्-मद-उद्धतः ।।६३ ।।

अन्वित-पदार्थ

नृप = हे राजन् !,
ततः = इसके बाद,
ते त्रिदशाः = वे देवतागण,
अतुलम् = अपार,
हर्षम् = आनन्द,
अवापुः = पाए,
तस्मिन् = उस रणस्थल में,
तेषाम् = उन राक्षसों के मारे जाने पर,
मातृगणः = मातृशक्तियों का समूह,
असृजः = रक्त के,
मदेन = मद से,
उद्धत = मस्त,
जातः = हो गया,
ननर्त = तथा नृत्य करने लगा ।।६३ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। नवमोऽध्यायः ।।

मन्त्र

राजोवाच ।।१ ।।

विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ।।२ ।।

पदच्छेद

राजा उवाच ।।१ ।।
वि-चित्रम् इदम् आ-ख्यातम् भगवन् भवता मम ।
देव्याः चरित्र-माहात्म्यम् रक्त-बीज-वध-आश्रितम् ।।२ ।।

अन्वित-पदार्थ

राजा उवाच = सुरथ राजा ने कहा ।।१ ।।
भगवन् = हे भगवन् !,
भवता = आपके द्वारा,
इदम् = यह,
रक्तबीजस्य = रक्तबीज के,
वधे = वध पर,
आश्रितम् = आधारित,
देव्याः = भगवती के,
चरित्रम् = कार्य एवम्,
विचित्रम् = उनकी अद्भुत,
माहात्म्यम् = महिमा,
मम = मुझे,
आख्यातम् = बताई गई ।।२ ।।

मन्त्र

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ।।३ ।।

पदच्छेद

भूयः च इच्छामि अहम् श्रोतुम् रक्त-बीजे नि-पातिते ।
चकार शुम्भः यत् कर्म निशुम्भ च अति-कोपनः ।।३ ।।

अन्वित-पदार्थ

अति कोपनः = अत्यन्त
यत् कर्म = जो प्रतिकार कर्म,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुपित,
शुम्भः = शुम्भ,
निशुम्भः च = एवं निशुम्भ ने,
रक्तबीजे = रक्तबीज के,
निपातिते = मारे जाने पर,
चकार = किया था,
अहम् = मैं,
भूयः च = विस्तार से,
श्रोतुम् = सुनना,
इच्छामि = चाहता हूँ ।।३ ।।

मन्त्र

ऋषिरुवाच ।।४ ।।

चकार कोपमतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ।।५ ।।

पदच्छेद

ऋषिः उवाच ।।४ ।।
चकार कोपम् अ-तुलम् रक्त-बीजे नि-पातिते ।
शुम्भ-असुरः निशुम्भः च हतेषु अन्येषु च आहवे ।।५ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।४ ।।
रक्तबीज = रक्तबीज के,
निपातित = धराशायी होने पर,
आहवे च = तथा युद्ध में,
अन्येषु = अन्य राक्षसों के,
हतेषु = मारे जाने पर,
शुम्भासुरः = शुम्भ राक्षस,
निशुम्भः च = और निशुम्भ ने,
अतुलम् = अतुलनीय,
कोपम् = क्रोध,
चकार = किया ।।५ ।।

मन्त्र

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ।।६ ।।

पदच्छेद

हन्यमानम् महा-सैन्यम् वि-लोक्य अमर्षम् उद्-वहन् ।
अभि-अधावत् निशुम्भः अथ मुख्यया असुर-सेनया ।।६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

अथ = इसके बाद,
निशुम्भः = निशुम्भ ने,
महासैन्यम् = भारी भरकम सेना का,
हन्यमानम् = विनाश होता,
विलोक्य = देखकर,
अमर्षम् = क्रोध,
उद्वहन् = किये हुए,
असुराणाम् = राक्षसों की,
मुख्यया = प्रधान,
सेनया = सेना के साथ,
अभ्यधावत = आक्रमण किया ।।६ ।।

मन्त्र

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ।।७ ।।

पदच्छेद

तस्य अग्रतः तथा पृष्ठे पार्श्वयोः च महा-असुराः ।
संदष्ट-ओष्ठपुटाः क्रुद्धाः हन्तुम् देवीम् उप-आ-ययुः ।।७ ।।

अन्वित-पदार्थ

तस्य = उसके,
अग्रतः = आगे,
तथा पृष्ठे = इसी प्रकार पीछे,
पार्श्वयोः च = और अगल-बगल,
संदष्टौपुटाः = दाँतों में ओठ दबाए,
क्रुद्धाः = क्रोध से भरे हुए,
महासुराः = महादैत्यों का समूह,
देवीम् = भगवती को,
हन्तुम् = मारने के लिए,
उपाययुः = निकट आ पहुँचा ।।७ ।।

मन्त्र

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।
निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ।।८ ।।

पदच्छेद

आजगाम महावीर्यः शुम्भः अपि स्व(स्य) बलैः वृतः ।
निहन्तुम् चण्डिकाम् कोपात् कृत्वा युद्धम् तु मातृभिः ।।८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

महावीर्यः = महाबलशाली,
शुम्भः = शुम्भ,
अपि = भी,
स्वस्य = अपनी,
बलैः = सेना से,
वृतः = सुसज्जित होकर,
मातृभिः तु = ब्रह्माणी आदि मातृकाओं से,
युद्धम् = युद्ध,
कृत्वा = करके,
कोपात् = क्रोध पूर्वक,
चण्डिकाम् = भगवती चण्डिका को,
निहन्तुम् = मारने के लिए,
आजगाम = आ गया ।।८ ।।

मन्त्र

ततो युद्धमतीवासीद् देव्या शुम्भनिशुम्भयोः ।
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ।।९ ।।

पदच्छेद

ततः युद्धम् अति-इव आसीत् देव्या शुम्भ-निशुम्भयोः ।
शर-वर्षम् अतीव उग्रम् मेघयोः इव वर्षतोः ।।९ ।।

अन्वित-पदार्थ

ततः = इसके अनन्तर,
देव्या = भगवती के साथ,
शुम्भनिशुम्भयोः = शुम्भनिशुम्भ का,
मेघयोः इव = जैसे दो-दो बादल,
वर्षतोः = बरस रहे हों इस प्रकार,
अतीव उग्रम् = अत्यन्त तीव्र,
शरवर्षम् = बाणों की वर्षावाला,
युद्धम् = युद्ध,
आसीत् = हुआ था ।।९ ।।

मन्त्र

चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ।
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ।।१० ।।

पदच्छेद

चिच्छेद अस्तान् शरान् ताभ्याम् चण्डिका स्व-शर-उत्करैः ।
ताडयामास च अङ्गेषु शस्त्र-ओघैः असुर-ईश्वरौ ।।१० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

चण्डिका = भगवती चण्डी ने,
स्वस्य = अपने,
शराणाम् = बाणों के,
उत्करैः = गुच्छकों से,
ताभ्याम् = उन दोनों के द्वारा,
अस्तान् = चलाए गए,
शरान् = बाणों को,
चिच्छेद = काट डाला,
शस्त्राणाम् च = तथा आयुधों के,
ओघैः = पुञ्जों से,
असुरेश्वरौ = दोनों राक्षसों के,
अङ्गेषु = अंगों को,
ताडयामास = प्रहार किया ।।१० ।।

मन्त्र

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ।।११ ।।

पदच्छेद

निशुम्भः निशितम् खड्गम् चर्म च आदाय सुप्रभम् ।
अताडयत् मूर्ध्नि सिंहम् देव्याः वाहनम् उत्तमम् ।।११ ।।

अन्वित-पदार्थ

निशुम्भः = निशुम्भ ने,
निशितम् = तीखा,
खड्गम् = खड्ग,
सुप्रभम् च = तथा चमकता हुआ,
चम = चर्मशस्त्र,
आदाय = लेकर,
देव्याः = भगवती के,
उत्तमम् = श्रेष्ठ,
वाहनम् सिंहम् = वाहन सिंह के,
मूर्ध्नि = सिर पर,
अताडयत् = वार किया ।।११ ।।

मन्त्र

ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ।।१२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ताडिते वाहने देवी क्षुरप्रेण असिम् उत्तमम् ।
निशुम्भस्य आशु चिच्छेद चर्म च अपि अष्टचन्द्रकम् ।।१२ ।।

अन्वित-पदार्थ

वाहन = वाहन सिंह पर,
ताडिते = प्रहार किये जाने,
देवी = भगवती ने,
क्षुरप्रेण = अपने क्षुरप्रशस्त्र से,
निशुम्भस्य = निशुम्भ के,
उत्तमम् = उत्तम,
असिम् = खड्ग,
अष्टचन्द्रकम् चापि = तथा आठ चन्द्राकार चाकुओं से निर्मित घातक शस्त्रवाले,
चम = चर्म को,
आशु = तत्काल,
चिच्छेद = काट डाला ।।१२ ।।

मन्त्र

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ।।१३ ।।

पदच्छेद

छिन्ने चर्मणि खड्गे च शक्तिम् चिक्षेप सः असुरः ।
ताम् अपि अस्य द्विधा चक्रे चक्रेण अभि-मुख-आगताम् ।।१३ ।।

अन्वित-पदार्थ

चर्मणि = अष्टचन्द्र,
खड्गे च = तथा खड्ग के,
छिन्ने = काटे जाने पर,
सः = उस,
असुरः = राक्षस ने,
शक्तिम् = शक्ति का,
चिक्षेप = प्रक्षेप किया,
अस्य = उसकी,
ताम् = उस,
अभिमुखागताम् = सामने चली आ रही शक्ति को,
चक्रेण = भगवती ने चक्र से,
द्विधा = दो टुकड़े,
चक्रे = कर डाला ।।१३ ।।

मन्त्र

कोपाध्मातो निशुम्भोऽथ शूलं जाग्राह दानवः ।
आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ।।१४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

कोपेन आ-ध्मातः निशुम्भः अथ शूलम् जग्राह दानवः ।
आ-यान्तम् मुष्टि-पातेन देवी तत् च अपि अचूर्णयत् ।।१४ ।।

अन्वित-पदार्थ

अथ = इसके बाद,
कोपेन = क्रोध से,
आध्मातः = हाँफते हुए,
निशुम्भः = निशुम्भ,
दानवः = राक्षस ने,
शूलम् = भाला,
जग्राह = लिया,
तत् अपि च = उसे भी,
आयान्तम् = अपनी ओर आता देख,
देवी = भगवती ने,
मुष्टिपातेन = मुक्के के प्रहार से,
अचूर्णयत् = धूल बना दिया।।१४ ।।

मन्त्र

आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ।
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ।।१५ ।।

पदच्छेद

आ-विध्य अथ गदाम् सः अपि चिक्षेप चण्डिकाम् प्रति ।
सा अपि देव्या त्रिशूलेन भिन्ना भस्मत्वम् आ-गता ।।१५ ।।

अन्वित-पदार्थ

अथ = इसके बाद,
सः = उसने,
अपि = भी,
गदाम् = गदा को,
आविध्य = घुमाकर,
चण्डिकाम् = चण्डिका की ओर,
चिक्षेप = फेंका,
सा अपि = वह गदा भी,
देव्या = भगवती के,
त्रिशूलेन = त्रिशूल से,
भिन्ना = विखण्डित होकर,
भस्मत्वम् = राख,
आगता = हो गई ।।१५ ।।

मन्त्र

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघैरपातयत भूतले ।।१६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ततः परशु-हस्तम् तम् आ-यान्तम् दैत्य-पुङ्गवम् ।
आहत्य देवी बाण ओघैः अपातयत् भूतले ।।१६ ।।

अन्वित-पदार्थ

ततः = इसके बाद,
देवी = भगवती ने,
परशुहस्तम् = हाथ में परशु लेकर,
आयान्तम् = आ रहे,
तम् = उस,
दैत्यपुङ्गवम् = महादैत्य को,
बाणानाम् = बाणों के,
ओघैः = बौछार से,
आहत्य = मारकर,
भूतले = भूमि पर,
अपातयत् = गिरा दिया ।।१६ ।।

मन्त्र

तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ।।१७ ।।

पदच्छेद

तस्मिन् नि-पतिते भूमौ निशुम्भे भीम-विक्रमे ।
भ्रातरि अति-इव सम्-क्रुद्धः प्र-ययौ हन्तुम् अम्बिकाम् ।।१७ ।।

अन्वित-पदार्थ

भीमविक्रम = भयानक पराक्रमी,
भ्रातरि = भाई,
निशुम्भे = निशुम्भ के,
तस्मिन् = उस,
भूमौ = रणभूमि में,
निपतिते = धराशायी हो जाने पर,
अतीव = अत्यन्त,
संक्रुद्धः = कुपित शुम्भ,
अम्बिकाम् = अम्बिका की ओर,
हन्तुम् = मारने के लिए,
प्रययौ = चल पड़ा ।।१७ ।।

मन्त्र

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ।।१८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

सः रथस्थः तथा अति-उच्चैः गृहीत-परम-आ-युधैः ।
भुजैः अष्टाभिः अ-तुलैः व्याप्य अशेषम् बभौ नभः ।।१८ ।।

अन्वित-पदार्थ

तथा = युद्ध के लिए प्रस्थान करने पर,
सः = वह शुम्भ,
अतिउच्चैः = अत्यन्त ऊँचे,
रथस्थः = रथ पर सवार,
गृहीतपरमायुधैः = परमशक्तिशाली आयुधों से युक्त,
अष्टाभिः = आठ,
अतुलैः = विशाल,
भुजैः = भुजाओं से,
अशेषम् = सम्पूर्ण,
नभः = आकाश को,
व्याप्त = आच्छादित करके,
बभौ = सुशोभित हो रहा था ।।१८ ।।

मन्त्र

तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ।।१९ ।।

पदच्छेद

तम् आ-यान्तम् सम्-आ-लोक्य देवी शङ्खम् अवादयत् ।
ज्या-शब्दम् च अपि धनुषः चकार अतीव दुःसहम् ।।१९ ।।

अन्वित-पदार्थ

तम् = उस सुसज्जित शुम्भ को,
आयान्तम् = आता हुआ,
समालोक्य = देखकर,
देवी = भगवती ने,
शंखम् = शंख,
अवादयत् = नाद किया,
धनुषः च = तथा धनुष का,
अतीव = अत्यन्त,
दुःसहम् = (कठोर) असहनीय,
ज्याशब्दम् = टंकार,
अपि = भी,
चकार = किया ।।१९ ।।

मन्त्र

पूरयामास ककुभो निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना ।।२० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

पूरयामास: ककुभ: निज-घण्टा (या:) स्वनेन च।
समस्तानाम् दैत्य-सैन्यानाम् तेज:-वध-विधायिना ।।२० ।।

अन्वित-पदार्थ

समस्तानाम् च = और सम्पूर्ण,
दैत्यसैन्यानाम् = राक्षस सेना के,
तेजस: = मनोबल को,
वधविधायिना = समाप्त कर देनेवाले,
निजघण्टाया: = अपने घण्टा की,
स्वनेन = ध्वनि से,
ककुभ: = दिशाओं को,
पूरयामास = भर डाला ।।२० ।।

मन्त्र

तत: सिंहो महानादैस्त्याजितेभमहामदै: ।
पूरयामास गगनं गां तथैवोप दिशो दश ।।२१ ।।

पदच्छेद

तत: सिंह: महा-नादै: त्याजित-इभ-महा-मदै: ।
पूरयामास गगनम् गाम् तथा उप-दिश: दश ।।२१ ।।

अन्वित-पदार्थ

तत: = इसके पश्चात्,
सिंह: = सिंह ने,
त्याजितेभमहामदै: = मतवाले हाथी के मद को दूर कर देनेवाले,
महानादै: = महा गर्जन से,
गगनम् = आकाश,
दश = दसों,
गाम् = दिशाओं,
तथा = तथा,
उपदिश: = उपदिशाओं को,
पूरयामास = गुञ्जायमान कर डाला ।।२१ ।।

मन्त्र

तत: काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिता: ।।२२ ।।

पदच्छेद

तत: काली समुत्पत्य गगनम् क्ष्माम् अताडयत् ।
कराभ्याम् तत् निनादेन प्राक् स्वना: ते तिरोहिता: ।।२२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = तभी,
काली = काली ने,
समुत्पत्य = प्रकट होकर,
कराभ्याम् = दोनों हाथों से,
गगनम् = अन्तरिक्ष एवम्,
क्ष्माम् = भूलोक पर,
अताडयत् = आघात किया,
तत् = उस,
निनादेन = भयानक नाद से,
ते = वे,
प्राक् स्वनाः = पहले की ध्वनियाँ,
तिरोहिताः = दब गईं ।।२२।।

मन्त्र

अट्टाट्टहासमशिवं शिवदूती चकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ।।२३।।

पदच्छेद

अट्ट-अट्टहासम् अ-शिवम् शिव-दूती चकार ह ।
तैः शब्दैः असुराः त्रेसुः शुम्भः कोपम् परम् ययौ ।।२३।।

अन्वित-पदार्थ

शिवदूती = शिवदूती ने,
अशिवम् = भयकारक,
अट्टाट्टहासम् = महाहास,
ह चकार = किया,
तैः = उन,
शब्दैः = गर्जनों से,
असुराः = समस्त राक्षसगण,
त्रेसु = भयग्रस्त हो गए,
शुम्भः = शुम्भ,
परम् कोपम् ययौ = अत्यधिक गुस्से से बौखला गया ।।२३।।

मन्त्र

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ।।२४।।

पदच्छेद

दुरात्मन् तिष्ठ तिष्ठ इति वि-आ-जहार अम्बिका यदा ।
तदा जय इति अभि-हितम् देवैः आकाश-सम्-स्थितैः ।।२४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

यदा = जब,
अम्बिका = भगवती अम्बिका ने,
दुरात्मन् = दुष्ट,
तिष्ठ तिष्ठ = रुक रुक,
इति = इस प्रकार,
व्याजहार = ललकारा,
तदा = तो,
आकाशे = आकाश में,
संस्थितैः = विराजमान्,
देवैः = देवताओं द्वारा,
जय = जय,
इति = यह,
अभिहितम् = घोष किया गया ।।२४।।

मन्त्र

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ।।२५।।

पदच्छेद

शुम्भेन आ-गत्य या शक्तिः मुक्ता ज्वाला-अति-भीषणा ।
आ-यान्ती वह्नि-कूटाभा सा निरस्ता महा-उल्कया ।।२५।।

अन्वित-पदार्थ

आगत्य = आगे आकर शुम्भ द्वारा,
या = जो,
ज्वालया = आग की लपटों से युक्त,
अतिभीषणा = अत्यन्त भयानक,
शक्तिः = शक्ति,
मुक्ता = छोड़ी गई,
वह्निकूटाभा = अग्निपुञ्ज के समान दीप्तिमती,
आयान्ती = चली आ रही,
सा = वह शक्ति,
महोल्कया = महोल्का नामक प्रतिकारिणी शक्ति द्वारा,
निरस्ता = व्यर्थ कर दी गई ।।२५।।

मन्त्र

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।
निर्घातनिःस्वनो घोरो जितवानवनीपते ।।२६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

सिंह(स्य) नादेन शुम्भस्य व्याप्तम् लोक-त्रय-अन्तरम्।
निर्घात-निःस्वनः घोरः जितवान् अवनी-पते ।। २६ ।।

अन्वित-पदार्थ

अवनीपते ! = हे राजन् सुरथ !,
शुम्भस्य = शुम्भ का,
सिंहनादेन = सिंह के समान गर्जन से,
लोकत्रयस्य = तीनों लोकों का,
अन्तरम् = मध्यभाग या अन्तरिक्ष,
व्याप्तम् = व्याप्त था,
घोर = प्रचण्ड,
निर्घातनिः स्वनः = महोल्काशक्तिपात की ध्वनि ने,
जितवान् = शुम्भनाद को जीत लिया ।।२६ ।।

मन्त्र

शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान्।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ।।२७ ।।

पदच्छेद

शुम्भ मुक्तान् शरान् देवी शुम्भः तत् प्रहितान् शरान्।
चिच्छेद स्व(स्य) शरैः उग्रैः शतशः अथ सहस्रशः ।।२७ ।।

अन्वित-पदार्थ

देवी = भगवती ने,
शुम्भेन = शुम्भ द्वारा,
मुक्तान् = छोड़े गए,
शरान् = बाणों को,
स्वस्य = अपने,
उग्रैः = प्रचण्ड,
शरैः = बाणों से,
शतशः = सैकड़ों,
अथ = अथवा,
सहस्रशः = हजारों,
चिच्छेद = टुकड़े कर डाला,
शुम्भः = एवं शुम्भ ने,
तत् = उनके द्वारा,
प्रहितान् = छोड़े गए,
शरान् = बाणों को उसी प्रकार काट डाला ।।२७ ।।

मन्त्र

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम्।
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ।।२८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ततः सा चण्डिका क्रुद्धा शूलेन अभि-जघान् तम्।
सः तदा अभि-हतः भूमौ मूर्च्छितः निपपात ह ।।२८।।

अन्वित-पदार्थ

ततः = इस प्रकार बराबरी का युद्ध करने के कारण,
क्रुद्धा = कुपित,
सा = उन,
चण्डिका = चण्डिका ने,
तम् = उसे,
शूलेन = शूल से,
अभिजघान = कठोरता पूर्वक मारा,
तदा = तब,
सः = वह दानव,
अभिहतः = घायल होकर,
मूर्छितः = मूर्छित होकर,
भूमौ ह = भूमि पर,
निपपात = गिर गया ।।२८।।

मन्त्र

ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः।
आजघान शरैर्देवीं कालीं केसरिणं तथा ।।२९।।

पदच्छेद

ततः निशुम्भः सम्-प्राप्य चेतनाम् आत्त-कार्मुकः।
आ-जघान शरैः देवीम् कालीम् केसरिणम् तथा ।।२९।।

अन्वित-पदार्थ

ततः = तभी,
निशुम्भः = निशुम्भ,
चेतनाम् = मूर्छा के बाद चेतना,
संप्राप्य = प्राप्त करके,
आत्तकार्मुकः = धनुष लेकर,
देवीम् = भगवती,
कालीम् = काली को,
तथा = इसी तरह,
केसरिणम् - सिंह को,
शरैः = बाणों से,
अजघान = मारा ।।२९।।

मन्त्र

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः।
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ।।३०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

पुनः च कृत्वा बाहूनाम् अयुतम् दनुज-ईश्वरः ।
चक्र-आयुधेन दितिजः छादयामास चण्डिकाम् ।।३० ।।

अन्वित-पदार्थ

दितिजः = दिति के वंशज,
दनुजानाम् ईश्वरः = राक्षसों के राज निशुम्भ ने,
बाहूनाम् अयुतम् = दस हजार भुजाएँ,
कृत्वा = मायाबल से करके,
चक्राणाम् अयुधेन = चक्रों के अस्त्रों से,
चण्डिकाम् = चण्डिका को,
छादयामास = आच्छादित कर दिया ।।३० ।।

मन्त्र

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ।।३१ ।।

पदच्छेद

ततः भगवती क्रुद्धा दुर्गा दुर्ग-आर्ति-नाशिनी ।
चिच्छेद तानि चक्राणि स्व-शरैः सायकान् च तान् ।।३१ ।।

अन्वित-पदार्थ

ततः = तब,
दुर्गस्य = कठिन,
आर्तेः = दुःख का,
नाशिनी = नाश करनेवाली,
भगवती = भगवती,
दुर्गा = दुर्गा ने,
क्रुद्धा = कुपित होकर,
स्वस्य = अपने,
शरैः = बाणों से,
तानि = उन,
चक्राणि = चक्रों,
तान् च = एवं उन,
शरान् = बाणों को,
चिच्छेद = काट हाला ।।३१ ।।

मन्त्र

ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ।।३२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ततः निशुम्भः वेगेन गदाम् आदाय चण्डिकाम् ।
अभि-अधावत वै हन्तुम् दैत्य-सैन्य-सम्-आवृतः ।।३२ ।।

अन्वित-पदार्थ

ततः = तत्पश्चात्,
दैत्यानाम् = दैत्यों की,
सेनया = सेना से,
समावृतः = घिरा हुआ,
निशुम्भः = निशुम्भ,
गदाम् = गदा को,
आदाय वै = लेकर,
चण्डिकाम् = चण्डिका को,
हन्तुम् = मारने के लिए,
अभ्यधावत = दौड़ा ।।३२ ।।

मन्त्र

तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ।।३३ ।।

पदच्छेद

तस्य अपतत् एव आशु गदाम् चिच्छेद चण्डिका ।
खड्गेन शित-धारेण सः च शूलम् सम-आददे ।।३३ ।।

अन्वित-पदार्थ

तस्य = उसकी,
गदाम् = गदा को,
अपतत् एव = गिरते ही,
चण्डिका = चण्डिका ने,
शितेन = तीखे,
धारेण = धारवाले,
खड्गेन = खड्ग से,
चिच्छेद = काट दिया,
सः च = एवं उसने,
शूलम् = भाले को,
समादद = उठाया ।।३३ ।।

मन्त्र

शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ।।३४ ।।

पदच्छेद

शूल-हस्तम् सम्-आ-यान्तम् निशुम्भम् अमर-अर्दनम् ।
हृदि विव्याध शूलेन वेग-आ-विद्धेन चण्डिका ।।३४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

अमराणाम् = देवताओं के,
अर्दनम् = हिंसक,
शूलहस्तम् = भाला हाथ में लेकर,
आयान्तम् = आते हुए,
निशुम्भम् = निशुम्भ को,
चण्डिका = भगवती चण्डिका ने,
वेगात् = तीव्रता से,
आविद्धेन = प्रहार किये गए,
शूलेन = अपने भाले से,
हृदि = छाती में,
विव्याध = बींध डाला ।।३४ ।।

मन्त्र

भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ।।३५ ।।

पदच्छेद

भिन्नस्य तस्य शूलेन हृदयात् निःसृतः अपरः ।
महा-बलः महा-वीर्यः तिष्ठ इति पुरुषः वदन् ।।३५ ।।

अन्वित-पदार्थ

शूलेन = भाले से,
भिन्नस्य = विदारित,
तस्य = उसके,
हृदयात् = हृदय से,
महाबलः = महाबली एवम्,
महावीर्यः = महापराक्रमी,
अपरः = दूसरा,
पुरुषः = पुरुष,
तिष्ठ इति = ठहर ऐसा,
वदन् = बोलता हुआ,
निःसृतः = निकला ।।३५ ।।

मन्त्र

तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ।।३६ ।।

पदच्छेद

तस्य निष्क्रामतः देवी प्रहस्य स्वनवत् ततः ।
शिरः चिच्छेद खड्गेन ततः असौ अपतत् भुवि ।।३६ ।।

अन्वित-पदार्थ

ततः = तभी,
देवी = देवी ने,
शिरः = शिर को,
खड्गेन = खड्ग से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वनवत् = जोर से,
प्रहस्य = ठहाका लगाकर,
निष्क्रामतः = निकल ही रहे,
तस्य = उस राक्षस के,
चिच्छेद = काट डाला,
ततः = जिससे,
भुवि = धरती पर,
अपतत् = गिर गया ।।३६ ।।

मन्त्र

ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान् ।
असुरांस्तांस्तथा काली शिवदूती तथापरान् ।।३७ ।।

पदच्छेद

ततः सिंहः चखाद उग्रम् दंष्ट्राभिः क्षुण्ण-शिरोधरान् ।
असुरान् तान् तदा काली शिव-दूती तथा अ-परान् ।।३७ ।।

अन्वित-पदार्थ

ततः = निशुम्भ के ढेर होने के बाद,
तदा = उसी समय,
क्षुण्णशिरोधरान् = कटे हुए सिरवाले,
तान् = उन,
असुरान् = राक्षसों को,
सिंहः = सिंह तथा,
काली = काली ने,
तथा = इसी प्रकार,
अपरान् = बचे हुए दूसरों को,
शिवदूती = शिवदूती ने,
दंष्ट्राभिः = दाढ़ों से,
उग्रम् = दाबते हुए कर्कशता पूर्वक,
चखाद = भक्षण कर डाला ।।३७ ।।

मन्त्र

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ।।३८ ।।

पदच्छेद

कौमारी शक्ति निर्-भिन्नाः केचित् नेशुः महा-असुराः । ब्रह्माणी मन्त्र-पूतेन तोयेन अन्ये निर् आकृताः ।।३८ ।।

अन्वित-पदार्थ

केचित् = कुछ,
महासुराः = राक्षस,
नेशुः = नष्ट हुए,
अन्ये = दूसरे,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कौमार्याः = स्कन्द की शक्ति के,
शक्त्या = शल्य प्रहार से,
निर्भिन्नाः = टुकड़े होकर,
ब्रह्माण्याः = ब्रह्माणी के,
मन्त्रपूतेन = प्रणव से भावित,
तोयेन = जल प्रक्षेप से,
निराकृताः = ध्वस्त हुए ।।३८।।

मन्त्र

माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ।
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ।।३९ ।।

पदच्छेद

माहेश्वरी त्रिशूलेन भिन्नाः पेतुः तथा अपरे ।
वाराही-तुण्ड-घातेन केचित् चूर्णीकृताः भुवि ।।३९ ।।

अन्वित-पदार्थ

तथा = इसी प्रकार,
अपरे = कुछ अन्य,
माहेश्वर्याः = माहेश्वरी के,
त्रिशूलेन = त्रिशूल से,
भिन्नाः = टुकड़े होकर,
पेतुः = गिरे,
केचित् = कुछ,
वाराह्याः = वाराही के,
तुण्डस्य = नथुनों के,
घातेन = प्रहार से,
भुवि = जमीन पर,
चूर्णीकृताः = चूर-चूर कर डाले गए ।।३९ ।।

मन्त्र

खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ।।४० ।।

पदच्छेद

खण्डम् खण्डम् च चक्रेण वैष्णव्याः दानवाः कृताः ।
वज्रेण च ऐन्द्री-हस्त-अग्रात् वि-मुक्तेन तथा अ-परे ।।४० ।।

अन्वित-पदार्थ

वैष्णव्याः = वैष्णवी के,
चक्रेण = चक्र से,
दानवाः = दैत्य समूह,
ऐन्द्र्या = ऐन्द्री से,
हस्तस्य = हाथ के,
अग्रात् = अग्रभाग से,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खण्डम्-खण्डम् = टुकड़े-टुकड़े,
कृताः = कर डाले गए,
अपरे च = और दूसरे,
विमुक्तेन = छोड़े हुए,
वज्रेण = वज्र द्वारा,
तथा = उसी प्रकार विखण्डित हुए ।।४० ।।

मन्त्र

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ।।४१ ।।

पदच्छेद

केचित् विनेशुः असुराः केचित् नष्टाः महा-आहवात् ।
भक्षिताः च अ-परे काल्या शिव-दूती मृग-अधिपैः ।।४१ ।।

अन्वित-पदार्थ

महाहवात् = महा संग्राम के कारण,
केचित् = कुछ,
असुराः = राक्षस,
विनेशुः = मर गए,
केचित् = कुछ,
नष्टाः = भाग गए,
अपरे च = और दूसरे,
काल्या = काली,
शिवदूत्याः = शिवदूती एवम्,
मृगाधिपैः = सिंह द्वारा,
भक्षिताः = खा डाले गए ।।४१ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधो नाम नवमोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। दशमोऽध्यायः ।।

मन्त्र

ऋषिरुवाच ।।१ ।।

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मतम् ।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ।।२ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।
निशुम्भम् नि-हतम् दृष्ट्वा भ्रातरम् प्राण-सम्-मतम् ।
हन्यमानम् बलम् च एव शुम्भः क्रुद्धः अब्रवीत् वचः ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
प्राणसम्मतम् = प्राणों के समान प्रिय,
भ्रातरम् = भाई,
निशुम्भम् = निशुम्भ के,
निहतम् = मारे जाने पर,
बलम् च = तथा सेना को,
हन्यमानम् एव = लगभग समाप्त होता हुआ,
दृष्ट्वा = देखकर,
क्रुद्धः = क्रोधित,
शुम्भः = शुम्भ राक्षस,
वचः = यह वचन,
अब्रवीत् = बोला ।।२ ।।

मन्त्र

बलावलेपाद् दुष्टे त्वं मा दुर्गे गर्वमावह ।
अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ।।३ ।।

पदच्छेद

बल-अव-लेपात् दुष्टे त्वम् मा दुर्गे गर्वम् आ-वह ।
अन्यासाम् बलम् आ-श्रित्य युद्ध्यसे या अति-मानिनी ।।३ ।।

अन्वित-पदार्थ

दुष्टे = दुर्विनीते,
या = जो तुम,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गे = दुर्गे,
त्वम् = तुम,
बलस्य = बल की,
अवलेपात् = कलई चढ़ने के कारण,
मा = मत,
गर्वम् = घमण्ड,
आवह = करो,
अतिमानिनी = अति घमण्डी होकर,
अन्यासाम् = दूसरी शक्तियों के,
बलम् = बल को,
आश्रित्य = सहारा बनाकर,
युध्यसे = युद्ध कर रही हो वह तुम्हारा प्रताप नहीं है ।।३ ।।

मन्त्र

देव्युवाच ।।४ ।।

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ।।५ ।।

पदच्छेद

देवी उवाच ।।४ ।।
एका एव अहम् जगति अत्र द्वितीयाः का मम अपरा ।
पश्य एताः दुष्ट मयि एव विशन्त्यः मत् वि-भूतयः ।।५ ।।

अन्वित-पदार्थ

देवी उवाच = भगवती ने कहा ।।४ ।।
अहम् = मैं,
एका = स्वगत, सजातीय, विजातीय भेदभावहीन होने के कारण एक,
एव = ही हूँ,
अत्र = इस,
जगति = जगत में,
अपरा = दूसरी,
मम = मेरी सहयिका शक्ति,
का = कौन है,
दुष्ट = रे दुष्ट,
एताः = इन सभी,
मद् विभूतयः = मेरी कायव्यूह द्वारा विरचित शक्तियों को,
मयि एव = मुझमें ही,
विशन्त्यः = प्रवेश करती हुई,
पश्य = देख ।।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम्।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ।।६ ।।

पदच्छेद

ततः समस्ताः ताः देव्यः ब्रह्माणी-प्रमुखाः लयम्।
तस्याः देव्याः तनौ जग्मुः एका एव आसीत् तदा अम्बिका ।।६ ।।

अन्वित-पदार्थ

ततः = इसके बाद,
ब्रह्माणी प्रमुखाः = ब्रह्माणी आदि,
ताः = वे,
समस्ता = सभी,
देव्यः = देवियाँ,
तस्या = उन,
देव्याः = भगवती के,
तनौ = शरीर में,
जग्मु = चली गईं,
तदा = उस समय,
अम्बिका = अम्बिका,
एका एव = एक ही,
आसीत् = थीं ।।६ ।।

मन्त्र

देव्युवाच ।।७ ।।
अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ।।८ ।।

पदच्छेद

देवी उवाच ।।७ ।।
अहम् वि-भूत्या बहुभिः इह रूपैः यत् आ-स्थिता।
तत् सम्-हृतम् मया एका एव तिष्ठामि आजौ स्थिरः भव ।।८ ।।

अन्वित-पदार्थ

देवी उवाच = देवी बोलीं ।।७ ।।
अहम् = मैं,
यत् = जो,
इह = यहाँ,
विभूत्या = ऐश्वर्य के द्वारा,
बहुभिः = अनेक रूपों से,
मया = मेरे द्वारा,
संहृतम् = सिकोड़ लिया गया है,
स्थिरः = स्थिर,
भव = हो जाओ,
आजौ = रण में,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आस्थिता = विद्यमान थी,
तत् = उस अनेकता को,
एका एव = अकेली ही,
तिष्ठामि = रहूँगी ।। ८ ।।

मन्त्र

ऋषिरुवाच ।। ९ ।।

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्वदेवानामसुराणां च दारुणम् ।। १० ।।

पदच्छेद

ऋषिः उवाच ।। ९ ।।
ततः प्रववृते युद्धम् देव्याः शुम्भस्य च उभयोः ।
पश्यताम् सर्वेषाम् देवानाम् असुराणाम् च दारुणम् ।।१० ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।९ ।।
ततः = भगवती के समस्त शक्तियों को समाहत करने के बाद,
सर्वेषाम् = सभी,
देवानाम् = देवताओं,
असुराणाम् च = और असुरों के,
पश्यताम् = देखते-देखते,
देव्याः = देवी,
शुम्भस्य च = और शुम्भ,
उभयोः = दोनों का,
दारुणम् = भयानक,
युद्धम् = युद्ध,
प्रववृते = आरम्भ हो गया ।।१० ।।

मन्त्र

शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।
तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ।।११ ।।

पदच्छेद

शर-वर्षैः शितैः शस्त्रैः तथा अस्त्रैः च एव दारुणैः ।
तयोः युद्धम् अभूत् भूयः सर्व-लोक-भयङ्करम् ।।११ ।।

अन्वित-पदार्थ

शितैः = तीखे,
शराणाम् = बाणों के,
वर्षैः = बौछारों,
दारुणैः = भयानक,
तयोः = दोनों का,
सर्वेषाम् = सभी,
लोकानाम् = लोकों को,
भूयः = अत्यधिक,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शस्त्रैः = शस्त्रों,
तथैव च = और इसी कोटि के,
अस्त्रैः = प्रक्षेपास्त्रों के माध्यम से,
भयङ्करम् = भय उत्पन्न करनेवाला,
युद्धम् = युद्ध,
अभूत् = हो रहा था ।।११ ।।

मन्त्र

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ।।१२ ।।

पदच्छेद

दिव्यानि यानि अस्त्राणि शतशः मुमुचे यानि अथ अम्बिका ।
बभञ्ज तानि दैत्यानाम् इन्द्रः तत् प्रती-घात-कर्तृभिः ।।१२ ।।

अन्वित-पदार्थ

अथ = युद्धारम्भ के बाद,
यानि यानि = जिन जिन,
शतशः = सैकड़ों,
दिव्यानि = दिव्य,
अस्त्राणि = प्रक्षेपास्त्रों को,
अम्बिका = भगवती ने,
मुमुचे = छोड़ा,
दैत्येन्द्रः = राक्षसराज शुम्भ ने,
तत्प्रतीघातकर्तृभिः = उनका प्रतिकार करनेवाले अस्त्रों से,
तानि = उन सभी को,
बभञ्ज = काट दिया ।।१२ ।।

मन्त्र

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्र हुङ्कारोच्चारणादिभिः ।।१३ ।।

पदच्छेद

मुक्तानि तेन च अस्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलया एव उग्र-हुङ्कार-उच्चारण आदिभिः ।।१३ ।।

अन्वित-पदार्थ

परमेश्वरी च = और भगवती ने,
तेन मुक्तानि = उसके द्वारा चलाए हुए,
दिव्यानि अस्त्राणि = द्योतनशील अस्त्रों को,
उग्रहुंकारोच्चारणादिभिः = तीव्र हुंकार गर्जन आदि द्वारा,
लीलया एव = खेल खेल में ही,
बभञ्ज = काट हाला ।।१३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ।।१४ ।।

पदच्छेद

ततः शर-(णात्) शतैः देवीम् आच्छादयत सः असुरः ।
सा अपि तत् कुपिता देवी धनुः चिच्छेद च इषुभिः ।।१४ ।।

अन्वित-पदार्थ

ततः = तब,
सः = उस,
असुरः = राक्षस ने,
शराणाम् शतैः = सैकड़ों बाणों से,
देवीम् = भगवती को,
आच्छादयत = ढक डाला,
तत् कुपिता च = और इससे क्रुद्ध होकर,
सा अपि = उन्होंने भी,
इषुभिः = बाणों के साथ,
धनुः = धनुष को भी,
चिच्छेद = काट दिया ।।१४ ।।

मन्त्र

छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ।।१५ ।।

पदच्छेद

छिन्ने धनुषि दैत्य-इन्द्रः तथा शक्तिम् अथ आ-ददे ।
चिच्छेद देवी चक्रेण ताम् अपि अस्य करे स्थिताम् ।।१५ ।।

अन्वित-पदार्थ

अथ = इसके बाद,
तथा = उस प्रकार से,
धनुषि = धनुष के,
छिन्न = कट जाने पर,
दैत्येन्द्रः = असुरराज ने,
शक्तिम् = शक्ति-शल्य को,
आददे = संधान के लिए लिया,
ताम् अपि = उसे भी,
देवी = भगवती ने,
अस्य = उसके,
करे = हाथ में,
स्थिताम् = ही रहते,
चक्रेण = चक्र से,
चिच्छेद = काट हाला ।।१५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत्तां देवीं दैत्यानामधिपेश्वरः ।।१६ ।।

पदच्छेद

ततः खड्गम् उप-आदाय शत-चन्द्रम् च भानुमत् ।
अभि-अधावत ताम् देवीम् दैत्यानाम् अधि प-ईश्वरः ।।१६ ।।

अन्वित-पदार्थ

ततः = इसके बाद,
भानुमत् = तेजस्वी,
दैत्यानाम् = राक्षसों के,
अधिपानाम् = राजाओं का,
ईश्वरः = स्वामी शुम्भ,
खड्गम् = खड्ग,
शतचन्द्रम् च = और सौ चन्द्रोंवाले चर्म शस्त्र को,
उपादाय = लेकर,
ताम् = उन,
देवीम् = भगवती की ओर,
अभ्यधावत् = दौड़ पड़ा ।।१६ ।।

मन्त्र

तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ।।१७ ।।

पदच्छेद

तस्य अपतत् एव आशु खड्गम् चिच्छेद चण्डिका ।
धनुः-मुक्तैः शितैः बाणैः चर्म च अर्क-कर-अमलम् ।।१७ ।।

अन्वित-पदार्थ

चण्डिका = भगवती चण्डी ने,
तस्य = उस दैत्य के,
अपतत् एव = पास आते ही,
धनुषा = अपने धनुष से,
मुक्तैः = छोड़े हुए,
बाणैः = बाणों से,
अर्कस्य = सूर्य की,
करामलम् = किरणों के समान उज्ज्वल,
खड्गम् = खड्ग,
चर्म च = और चर्म को भी,
चिच्छेद = काट दिया ।।१७ ।।

मन्त्र

अश्वाँश्च पातयामास रथं सारथिना सह ।
हताश्वः स तदा दैत्याश्छिन्नधन्वा विसारिथिः ।।१८ ।।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

अश्वान् च पातयामास रथम् सारथिना सह।
हताश्वः सः तदा दैत्यः छिन्न धन्वा विसारिथिः।
जग्राह मुद्गरम् घोरम् अम्बिका(याः) निधनाय उद्यतः ।।१८ ।।

अन्वित-पदार्थ

सारथिना स = रथचालक सहित,
रथम् = रथ,
अश्वान् च = तथा घोड़ों को,
पातयामास = मार गिराया,
तदा = तब,
हताश्वः = मृत अश्ववाले,
छिन्ने धन्वा = विदीर्ण धनुषवाले,
विसारथिः = सारथी विहीन,
अम्बिकायाः = तथापि भगवती के,
निधनाय = समापन के लिए,
उद्यतः = प्रयासरत,
सः = उस,
दैत्यः = दैत्य ने,
घोरम् = भयानक,
मुद्गरम् = मुद्गर,
जग्राह = लिया ।।१८ ।।

मन्त्र

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।।१९ ।।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्।

पदच्छेद

चिच्छेद अपतत् तस्य मुद्गरम् निशितैः शरैः।
ततो अपि सः अभि-अधावत् ताम् मुष्टिम् उद्यम्य वेगवान् ।।१९ ।।

अन्वित-पदार्थ

तस्य = उसके,
अपतत् = गिरते हुए अवस्था में ही,
मुद्गरम् = मुद्गर को,
निशितैः = तीखे,
शरैः = बाणों से,
चिच्छेद = काट दिया,
वेगवान् = तीव्र, गतिशील,
सः = वह राक्षस,
तथापि = फिर भी,
मुष्टिम् = मुट्ठी,
उद्यम्य = उठाकर,
ताम् = उनकी ओर,
अभ्यधावत् = दौड़ पड़ा ।।१९ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।।२० ।।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ।

पदच्छेद

सः मुष्टिम् पातयामास हृदये दैत्यपुङ्गवः ।
देव्याः तम् च अपि सा देवी तलेन उरसि अताडयत् ।।२० ।।

अन्वित-पदार्थ

सः = उस,
दैत्यपुंगवः = दानवप्रवर ने,
देव्याः = भगवती के,
हृदये = हृदय पर,
मुष्टिम् = मुक्के का,
पातयामास = प्रहार किया,
सा च = उन,
देवी = भगवती ने,
तम् = उसको,
अपि = भी,
उरसि = छाती पर,
तलेन = हथेली से सीधा,
अताडयत् = वार किया ।।२० ।।

मन्त्र

तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः ।।२१ ।।

पदच्छेद

तल(स्य) प्रहार अभिहतः निपपात महीतले ।
सः दैत्यराजः सहसा पुनः एव तथा उत्थितः ।।२१ ।।

अन्वित-पदार्थ

सः = वह,
दैत्यराजः = दैत्यराज,
तलस्य = भगवती की हथेली के,
प्रहारेण = सीधे प्रहार से,
अभिहतः = घायल होकर,
महीतल = धरती पर,
निपपात = पुनः गिर पड़ा फिर,
सहसा = तुरन्त,
तथा एव = पूर्ववत्,
उत्थितः = उठ खड़ा हुआ ।।२१ ।।

मन्त्र

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।।२२ ।।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ।।२३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

उत्पत्य च प्र-गृह्य उच्चैः देवीम् गगनम् आ-स्थितः ।।२२ ।।
तत्र अपि सा निर्-आधारा युयुधे तेन चण्डिका ।।२३ ।।

अन्वित-पदार्थ

उत्पत्य च = और उठकर,
देवीम् = भगवती को,
उच्चैः = ऊपर से,
प्रगृह्य = पकड़ कर,
गगनम् = आकाश को,
आस्थितः = आश्रय बना लिया,
निराधारा = आधारहीन स्थिति में,
सा चण्डिका = वह भगवती चण्डिका,
तत्रापि = वहाँ भी,
तेन = उसके साथ,
युयुधे = युद्ध कर रही थीं ।।२२-२३ ।।

मन्त्र

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।
चक्रतुः प्रथमं युद्धंमुनिविस्मयकारकम् ।।२४ ।।

पदच्छेद

नि-युद्धम् खे तदा दैत्यः चण्डिका च परस्परम् ।
चक्रतुः प्रथमम् युद्धम् मुनि-वि-स्मय-कारकम् ।।२४ ।।

अन्वित-पदार्थ

तदा = उसी समय,
खे = आकाश में,
दैत्यः = शुम्भ राक्षस,
चण्डिका च = तथा चण्डिका ने,
परस्परम् = परस्पर,
मुनीनाम् = मुनियों को,
विस्मयकारकम् = आश्चर्यचकित करनेवाले,
प्रथमम् = प्रथम बार,
नियुद्धम् = शस्त्रविहीन करयुद्ध नामक,
युद्धम् = युद्ध,
चक्रतुः = किया ।।२४ ।।

मन्त्र

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ।।२५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेद

ततः नि-युद्धम् सु-चिरम् कृत्वा तेन अम्बिका सह।
उत्-पात्य भ्रामयामास चिक्षेप धरणी-तले ।।२५ ।।

अन्वित-पदार्थ

ततः = इसके बाद,
अम्बिका = अम्बिका ने,
तेन सह = उसके साथ,
सुचिरम् = दीर्घ काल तक,
नियुद्धम् = नियुद्ध,
कृत्वा = करके अन्ततः,
उत्पात्य = उठाकर,
भ्रामयामास = घुमाया तथा,
धरणीतले = धरती पर,
चिक्षेप = पटक दिया ।।२५ ।।

मन्त्र

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगतः।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ।।२६ ।।

पदच्छेद

सः क्षिप्तः धरणीम् प्राप्य मुष्टिम् उद्यम्य वेगतः।
अभि-अधावत दुष्टात्मा चण्डिकायाः नि-धन (स्य) इच्छया ।।२६ ।।

अन्वित-पदार्थ

सः दुष्टात्मा = वह दुष्ट राक्षस,
क्षिप्तः = पटके जाने पर,
धरणीम् = धरती पर,
प्राप्य = पहुँच कर,
मुष्टिम् = घूँसा,
उद्यम्य = उठाकर,
चण्डिकायाः = चण्डिका के,
निधनस्य = प्राण हरण की,
इच्छया = इच्छा से,
वेगतः = तीव्रता से,
अभ्यधावत = उनकी ओर दौड़ा ।।२६ ।।

मन्त्र

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ।।२७ ।।

पदच्छेद

तम् आ-यान्तम् ततः देवी सर्व-दैत्य-जन-ईश्वरम्।
जगत्याम् पातयामास भित्त्वा शूलेन वक्षसि ।।२७ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

ततः = इसके पश्चात्,
देवी = भगवती ने,
तम् = उस,
सर्वेषाम् = सभी,
दैत्यजनानाम् = दैत्यों के,
ईश्वरम् = स्वामी शुम्भ को,
आयान्तम् = पास आते ही,
वक्षसि = छाती में,
शूलेन = शूल द्वारा,
भित्त्वा = भेदन करके,
जगत्याम् = धरती पर,
पातयामास = गिरा दिया ।।२७।।

मन्त्र

स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ।।२८।।

पदच्छेद

सः गत-असुः पपात उर्व्याम् देवी-शूल-अग्रेण वि-क्षतः ।
चालयन् सकलाम् पृथ्वीम् साब्धि-द्वीपाम् सपर्वताम् ।।२८।।

अन्वित-पदार्थ

देव्याः = भगवती के,
शूलाग्रेण = भाले से,
विक्षतः = विदीर्ण होकर,
साब्धिद्वीपाम् = समुद्रों,
द्वीपों,
सपर्वताम् = पर्वतों सहित,
पृथ्वीम् = धरती को,
चालयन् = कम्पित करते हुए,
गतासुः = निष्प्राण,
सः = वह शुम्भ,
उर्व्याम् = धरती पर,
पपात = गिर गया ।।२८।।

मन्त्र

ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ।।२९।।

पदच्छेद

ततः प्रसन्नम् अ-खिलम् हते तस्मिन् दुरात्मनि ।
जगत् स्वास्थ्यम् अति-इव आप निर्मलम् च अभवत् नभः ।।२९।।

अन्वित-पदार्थ

तस्मिन् = उस,
दुरात्मनि = दुष्ट के,
नभः च = और आकाश,
निर्मलम् = निर्मल,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हते = मारे जाने पर,
जगत् = संसार,
अतीव = अत्यन्त,
स्वास्थ्यम् = स्वस्थता,
आप = प्राप्त कर चुका था,
अभवत् = हो गया था,
तत् = इसके पश्चात्,
अखिलम् = सम्पूर्ण जगत्,
प्रसन्नम् = प्रसादयुक्त हो गया था ।।२९ ।।

मन्त्र

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ।।३० ।।

पदच्छेद

उत्-पात-मेघाः स-उल्काः ये प्राग् आसन् ते शमम् ययुः ।
सरितः मार्ग-वाहिन्यः तथा आसन् तत्र पातिते ।।३० ।।

अन्वित-पदार्थ

पतित = शुम्भ के मारे जाने पर,
ये = जो,
सोल्काः = उल्कापिण्डों के साथ,
उत्पातमेघाः = प्रलयकारी बादल,
प्राक् = युद्ध के पूर्व,
आसन् = छाये थे,
ते शमम् = वे शान्त,
ययुः = हो गए थे,
तथा = इसी प्रकार,
तत्र सरितः = वहाँ नदियाँ,
मार्गवाहिन्यः = उचित मार्ग पर बहने लगी,
आसन् = थीं ।।३० ।।

मन्त्र

ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ।।३१ ।।

पदच्छेद

ततः देवगणाः सर्वे हर्ष निर्भर-मानसाः ।
बभूवुः नि-हते तस्मिन् गन्धर्वाः ललितम् जगुः ।।३१ ।।

अन्वित-पदार्थ

ततः = इसके बाद,
सर्वे = सभी,
देवगणाः = देवमण्डली,
तस्मिन् = उसके,
निहते = मारे जाने पर,
गन्धर्वाः = गन्धर्व लोग,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हर्षनिर्भरमानसाः = आनन्द विभोर, **बभूवुः** = हो गईं, **ललितम्** = सुमधुर, **जगुः** = गान कर रहे थे ।।३१ ।।

मन्त्र

अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ।।३२ ।।

पदच्छेद

अवादयन् तथा-एव अन्ये ननृतुः च अप्सरः गणाः ।
ववुः पुण्याः तथा वाताः सु-प्रभः अभूत् दिवाकरः ।।३२ ।।

अन्वित-पदार्थ

तथैव = इसी प्रकार, **अन्ये** = दूसरे गन्धर्व, **अवादयन्** = वाद्यों को बजा रहे थे, **अप्सरोगणाः च** = और अप्सराएँ, **ननृतुः** = नाचने लगी थीं, **पुण्याः** = अनुकूल, **वाता** = वायु, **ववुः** = बह रही थी, **तथा** = इसी प्रकार, **दिवाकरः** = सूर्य, **सुप्रभः** = सुतेजस्वी, **अभूत्** = हो चुके थे ।।३२ ।।

मन्त्र

जज्वलुश्चाग्नयःशान्ताःशान्ता दिग्जनितस्वनाः ।।३३ ।।

पदच्छेद

जज्वलुः च अग्नयः शान्ताः शान्ताः दिग्-जनित-स्वनाः ।।३३ ।।

अन्वित-पदार्थ

शान्ताः च = और बुझी हुई, **अग्नयः** = आहवनीय आदि अग्नियाँ, **जज्वलुः** = जल उठीं, **दिग्जनिताः** = दिशाओं में प्रतिध्वनित होनेवाले, **स्वनाः** = शब्द, **शान्ताः** = शान्त हो गए थे ।।३३ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। एकादशोऽध्यायः ।।

विशेष

दधिमथी ध्यानम्

। । । । ऽ ऽ । । । ।(१२) ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ ऽ (१८)

जयजय वार्या दधिमथि !, जन्माऽन्तामेलनं हृदुन्माथि[1] ।

ऽ ऽ । ऽ । । । ऽ(१२) ऽ ऽ ऽ ऽ । ऽ ऽ ऽ (१५)

आवालचित्रतनुभा, आर्यानव्यास्तथाऽम्बाभा ।।१ ।।

अन्वयः

आवालचित्रतनुभा ! दधिमथि ! (त्वं) जय जय । (त्वं) हृदुन्माथि[1] जन्मान्तामेलनं वार्याः । तथा (त्वं) अम्बाभा । आर्यान् अव्याः ।

देवीस्तवः लघुच्छन्दोऽलङ्कारदर्पणः श्लोक संख्या ।।१।।

आचार्य नित्यानन्द शास्त्री

देवीस्तव – च्छत्रबन्ध चित्रम्



१. पादान्त वर्ण विकल्प से गुरु होते हैं।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

ऋषिरुवाच ।।१ ।।

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः
सुरा वह्निपुरोगमास्ताम् ।
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्जविकाशिताशाः ।।२ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।

देव्या हते तत्र महा-असुर-इन्द्रे स-इन्द्राः
सुराः वह्नि-पुरः-गमाः ताम् ।
कात्यायनीम् तुष्टुवुः इष्ट (स्य) लाभाद्
विकाशि-वक्त्र-अब्ज-विकाशित-आशाः ।।२ ।।

अन्वित-पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
देव्या = भगवती द्वारा,
तत्र = उस महासमर में,
महताम् = बड़े बड़े,
असुराणाम् = राक्षसों के,
इन्द्रे = राजा शुम्भ-निशुम्भ के,
हत = मारे जाने पर,
इष्टस्य लाभाद् = इच्छित वस्तु की प्राप्ति के कारण,
विकाशिताशाः = सभी दिशाएँ जगमगानेवाले,
विकाशिवक्त्राब्जाः = चमकते हुए मुख कमलोंवाले,
वह्निपुरोगमाः = अग्नि के नेतृत्व में,
सेन्द्राः = इन्द्र सहित,
सुराः = देवगण,
ताम् = उन,
कात्यायनीम् = कात्यायनी की,
तुष्टुवुः = स्तुति करने लगे ।।२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्र

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ।।३ ।।

पदच्छेद

देवि प्रपन्न-आर्ति-हरे प्रसीद
प्रसीद मातः जगतः अखिलस्य ।
प्र-सीद विश्व (स्य) ईश्वरि पाहि विश्वम्
त्वम् ईश्वरी देवि चरा-चरस्य ।।३ ।।

अन्वित-पदार्थ

देवि = हे देवि !,
प्रपन्नानाम् = शरणागतों के,
आर्तिहर = दुःखों का निवारण करनेवाली,
प्रसीद = आप प्रसन्न हों,
अखिलस्य जगतः = हे समस्त जगत् की,
मातः = माता,
प्रसीद = आप प्रसन्न हों,
विश्वम् = विश्व का,
पाहि = संरक्षण करें,
देवि त्वम् = हे अम्बे,
चराचरस्य ईश्वरी = आप जड़ चेतन की अधीश्वरी हैं ।।३ ।।

मन्त्र

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ।।४ ।।

पदच्छेद

आधार भूता जगतः त्वम् एका
मही-स्व-रूपेण यतः स्थिता असि ।
अपाम् स्व-रूप-स्थितया त्वया एतत्
आ-प्यायते कृत्स्नम् अ-लङ्घ्य-वीर्ये ।।४ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वित-पदार्थ

त्वम् = हे माता आप,
जगतः = इस जगत् की,
एका = एक मात्र,
